THE

CHOWKHAMBÂ SANSKRIṬ SERIES.

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NOS. 233, 236 & 254.

क्रमदीपिका ।

श्रीमन्महामहोपाध्यायकाश्मीरिक
केशवभट्टविरचिता ।
विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता । तथा-

लघुस्तवराजस्तोत्रम् ।

श्रीमद्वैष्णवाचार्यश्रीश्रीनिवासाचार्यविरचितम् ।
श्रीहयग्रीवानुग्रह जीवन स्वभूदेवपदानन्याश्रित वैष्णव पुरुषोत्तमप्रसादप्रणीत
गुरुभक्तिमन्दाकिन्याख्यव्याख्यया समलंकृतम् ।
श्रीयुतकान्यकुब्जकवीन्द्रवर—दुःखभञ्जनशर्मतनुजनुषा साहित्यसांख्ययोगाद्यनेकशास्त्रा-
ध्यापकेन—देवीप्रसादशर्म्मकविना संशोधितौ ।

KRAMADIPIKA,

By Mahamahopadhyaya Kasmirika Kesav Bhatta.
WITH A COMMENTARY BY Sri Govind Bhattacharya.
and LAGHUSTAVARAJASTOTRAM
By Sri Niwasacharya.
With a commentary "Gurubhakti Mandakini"
By Purushottam Prasada.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS -OTTO HARRASSOWITZ, LEIPZIG.
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY.
PROBSTHAIN & CO, BOOKSELLERS, LONDON
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES
1917
Price Rupees three.

Registered According to Act XXV. of 1867.

अथ मुद्रालक्षणानि ॥

अङ्गुलीः करयुग्मस्य संप्रसार्य प्रकम्पयेत् ।
मध्यपृष्ठगतानामे तर्जनीभ्यां निरोधयेत् ॥ १ ॥
मध्यमाग्रे समं कृत्वा कनिष्ठामध्यमोपरि ।
तयोरुपरि चाङ्गुष्ठौ मुद्रायोनिस्तु खेचरी ॥ २ ॥
तर्जनीशेषमाकुञ्चयशेषाणां च निपीडयेत् ।
अङ्कुशं दर्शयेन्मन्त्री गृहीत्वा दक्षमुष्टिना ॥ ३ ॥
इत्यङ्कुशमुद्रा ॥
आवाहनं स्थापनं संनिधानं सनिरोधनम् ।
संमुखीकरणं सकली करणं चावगुण्ठनम् ॥ ४ ॥
धेनुर्पीयूषकरणं महामुद्रा तथैव च ।
परमीकरणं चैव नवमुद्राः प्रकीर्त्तिताः ॥ ५ ॥
एतेषां लक्षणमाह—
सम्यक् संपूरितः पुष्पैः कराभ्यां कल्पिताञ्जलिः ।
आवाहनी समाख्याताकराभ्यां देशिकोत्तमैः ॥ ६ ॥
अधोमुखी कृता सैव स्थापनीति निगद्यते ।
आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मिका ॥ ७ ॥
सन्निधाने समुद्दिष्टा मुद्रेयं तन्त्रवेदिभिः ।
अङ्गुष्ठगर्भिणी सैव सन्निरोधसमीरिता ॥ ८ ॥
मुष्टिद्वयस्थिताङ्गुष्ठौ सन्मुखौ च परस्परम् ।
संश्लिष्टावुच्छ्रितौ कृत्वा सेयं सन्मुखमुद्रिका ॥ ९ ॥
देवाङ्गेषु षडङ्गानां न्यासः स्यात्सकलीकृतिः ।
हृदयादिशरीरान्ते कनिष्ठाद्यङ्गुलीषु च ॥ १० ॥
हृदादिमन्त्रविन्यासः सकलीकरणं मतम् ।
सव्यहस्तकृतामुष्टिर्दीर्घाधोमुखतर्जनी ॥ ११ ॥
अवगुण्ठनमुद्रेयमभितोभ्रामिता भवेत् ।
अन्योन्यतर्जनीयुग्मं भ्रमणादवगुण्ठनम् ॥ १२ ॥
अन्योन्याभिमुखाश्लिष्टाकनिष्ठानामिका पुनः ।
तथा तु तर्जनीमध्या धेनुमुद्राप्रकीर्त्तिता ॥ १३ ॥

अमृतीकरणं कुर्यात् तया देशिकसत्तमः ।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितकराङ्गुलिः ॥ १४ ॥
महामुद्रेयमुदितापरमीकरणं बुधैः ।
शङ्खं चक्रं गदां पद्मं मुसलं शार्ङ्गखड्गकौ ॥ १५ ॥
पाशाङ्कुशौ वैनतेयं श्रीवत्सं कौस्तुभं तथा ।
वेणुं चैवाऽभयवरौ वनमालां प्रदर्शयेत् ॥ १६ ॥
एतेषां लक्षणमाह—
वामाङ्गुष्ठं विधृत्यैव मुष्टिना दक्षिणेन तु ।
तन्मुष्टेः पृष्ठदेशे तु योजयेच्चतुरङ्गुलीः ॥ १७ ॥
दक्षिणेचोन्मुखेऽङ्गुष्ठे तेषामग्राणि योजयेत् ।
कथिता शङ्खमुद्रेयं वैष्णवार्चनकर्मणि ॥ १८ ॥
अन्योन्याभिमुखाङ्गुष्ठकनिष्ठायुगलं यदा ।
विस्तृतीश्चेतराङ्गुल्यस्तदासौ दर्शिनी मता ॥ १९ ॥
अन्योन्यग्रथिताङ्गुल्यउन्नता मध्यमौ नतौ ।
संलग्नौ चेत् तदा मुद्रा गदेयं संप्रकीर्त्तिता ॥ २० ॥
अन्योन्याभिमुखौ पाणी पद्माकारौ च मध्यतः ।
कर्णिकावनताङ्गुष्ठौ पद्ममुद्रा प्रकीर्त्तिता ॥ २१ ॥
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् ।
कृत्वा मुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ २२ ॥
वामस्थतर्जनीप्रान्तं मध्यमान्ते नियोजयेत् ।
प्रसार्य च करं वामं दक्षिणं करमेव च ॥ २३ ॥
नियोज्यदक्षिणस्कन्धे वाणग्रहणवत्ततः ।
तर्जन्यङ्गुष्ठयोर्योगं कुर्यादेषा प्रकीर्त्तिता ॥ २४ ॥
शार्ङ्गमुद्रेयं मुनिभिर्दर्शयेत्कृष्णपूजने ।
कनिष्ठानामिके द्वे तु दक्षाङ्गुष्ठनिपीडिते ॥ २५ ॥
शेषं प्रसारितं कृत्वा खड्गमुद्रां प्रदर्शयेत् ।
पाशाकारं नियोज्यैवं वामाङ्गुष्ठस्य तर्जनिम् ॥ २६ ॥
दक्षिणं मुष्टिमास्थाय तर्जनीं च प्रसारयेत् ।
तेनैवं संस्पृशेन्मन्त्री वामाङ्गुष्ठस्य मूलकम् ॥ २७ ॥
पाशमुद्रेयमुद्दिष्टा केशवार्चनकर्मणि ।
तर्जनीमीषदाकुञ्च्यशेषाणां च निपीडयेत् ॥ २८ ॥

अङ्कुशं दर्शयेत् तद्वद् गृहीत्वा दक्षमुष्टिना ।
अन्योन्यपृष्ठे संयोज्य कनिष्ठं च परस्परम् ॥ २९ ॥
तर्जन्यग्रं समं कृत्वाऽङ्गुष्ठाग्रं च तथैव च ।
ईषदालम्बनं कृत्वा मध्यमेन च पक्षवत् ॥ ३० ॥
प्रसार्य गारुडी मुद्रा कृष्णपूजा विधौ स्मृता ।
अन्योन्यं संमुखे तत्र कनिष्ठातर्जनीयुगे ॥ ३१ ॥
मध्यमानामिके तद्वदङ्गुष्ठेन निपीडितम् ।
दर्शयेद्वक्षः स्थले मुद्रांयत्नात् श्रीवत्ससंज्ञकाम् ॥ ३२ ॥
अन्योन्याभिमुखे तद्वत्कनिष्ठेसंनियोजयेत् ।
तर्जन्यनामिके तद्वत्करौत्वन्योन्यपृष्ठगौ ॥ ३३ ॥
उच्छ्रितान्योन्यसंलग्नादक्षहस्तकराङ्गुलीम ।
निधायमध्यदेशे तु वाममध्यमतर्जनीम् ॥ ३४ ॥
संयोज्यमाणिवन्धे तु दक्षिणे योजयेत्ततः ।
वामाङ्गुष्ठे तु मुद्रेयं प्रसिद्धा कौस्तुभा मता ॥ ३५ ॥
अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलिभिः संयोज्य परिवर्तयेत् ॥ ३६ ॥
एषा संहारमुद्रा स्याद्विसर्जनाविधौ मता ।
अङ्कं प्रसारितं कृत्वा स्पृष्टशाखं वरानने ॥ ३७ ॥
प्राङ्मुखं तु करं कृत्वा अभयं परिकीर्त्तितम् ।
दक्षं भुजं संप्रसार्यजानूपरि निवेशयेत् ॥ ३८ ॥
प्रसृतं दर्शयेद्देवि वरः सर्वार्थसाधिनी ।
स्पृशेत्कण्ठादिपादान्तं तर्जन्यङ्गुष्ठमूलयोः ॥ ३९ ॥
करद्वयेन मालावन्मुद्रेयं वनमालिका ॥ ४० ॥
छोटिकालक्षणमाह—
द्वौकरौ पृष्ठसंलग्नौ भ्रामयेच्चतुरङ्गुलीः
छोटिका सुसमाख्याता प्रणामे तां प्रदर्शयेत् ॥ ४१ ॥

इति शम् ।

सब प्रकार की संस्कृत पुस्तकों के मिलने का पता—

हरिदासगुप्तः

चौखम्बा संस्कृत सीरीज आफिस

बनारस सिटी ।

सूचीपत्रम् ।

क्रमदीपिका—

निखिलमहीचक्रवालाचार्यचक्रचूडामणिश्रीभगवन्निम्बार्कमहामुनीन्द्रपादपीठाधिकृतजगद्विजयिश्रीकेशवभट्टाचार्यप्रणीता ।

विद्याविनोदश्रीगोविन्दभट्टकृतविवरणोपेता ।

तन्त्रग्रन्थोऽयम् ।

अस्मिन् अष्ट पटलाः सन्ति ।

तत्र प्रथमे मङ्गलाचरणम्, ।

एतद्ग्रन्थस्योपादेयता, ।

सर्वेषु मन्त्रेषु श्रीगोपालमन्त्रस्य सिद्धत्वकथनम्,।

पूजाक्रमः,

भूतशुद्धिः,

केशवादिमूर्त्तिकीर्त्यादिशक्तिन्यासप्रकारः,

तत्र ध्यानम्,

तयोः फलम्,

तत्त्वानां नामानि न्यासः स्थानं च,

न्यासप्रयोजनम्,

मन्त्रविशेषे प्राणायामप्रकारः,

आत्मयागार्थे देहे पीठकल्पना,

पीठशक्तिप्रदर्शनम्,

करशोधनम्,

इति प्रथमः, पटलः,

सर्वेषु मन्त्रेषु दशाक्षराष्टादशाक्षरयोर्मौलीभूतत्वम्,

दशाक्षरमन्त्रराजोद्धारः,

मन्त्रस्य ऋष्यादिकथनम्,

तत्पञ्चाङ्गानि दशाङ्गानि,

मन्त्रविनियोगः,

मन्त्रार्थः,

तत्र प्रकारान्तरम्,

अष्टादशाक्षरमन्त्रराजोद्धारः,

तस्य ऋष्यादिकथनम्,
मन्त्रबीजादि,
न्यासक्रमः,
मातृकान्यासविशेषः,
संहारसृष्टिप्रकारः,
न्यासान्तरम्,
विभूतिपञ्जरन्यासः,
न्यासस्थानम्,
न्यासफलम्,
मूर्त्तिपञ्जरन्यासः,
मस्तके मन्त्रन्यासप्रयोजनम्,
द्वादशाक्षरमन्त्रोद्धारः,
हृदयाद्यङ्गन्यासमुद्राः,
विल्वादिमुद्राकरणप्रकाराः,
एतेषां फलम्,
अस्त्रमन्त्रः ।
इति द्वितीयः पटलः ।
मन्त्रद्वयसाधारणं देवताध्यानम्,
आत्मपूजाक्रमः,
शङ्खपूरणविधिः,
तत्र तीर्थावाहनमन्त्रः ।
स्वदेहे पीठपूजाक्रमः,
पुष्पाञ्जलिविधिकथनम्,
तुलसीप्रदानविभागः,
जपविधिः ।
इति तृतीयः पटलः ।
मन्त्रजपादौ दीक्षितस्यैवाधिकारः,
गुरुलक्षणम्,
गुरुसेवाप्रकारः,
दीक्षाविधिकथनम्,
दीक्षायां पूजाक्रमः,

वैष्णवगन्धाष्टककथनम्,
दीक्षायां भगवत्पूजाविधानम्,
आवरणपूजाक्रमः,
अङ्गदेवताध्यानम्,
रुक्मिण्याद्यष्टशक्तिपूजनम्,
कुण्डविधानम्,
राशिमण्डलविधिः,
दीक्षाविधायकस्य कृत्यम्,
दीपदानविधिः,
नैवेद्यस्वरूपम्,
नैवेद्यार्पणमन्त्रः,
भोजनोपयोगिमुद्राविशेषः,
प्राणादिमुद्रास्वरूपम्,
प्राणादिमुद्रामन्त्राः,
निवेद्यमुद्रामन्त्रौ,
सन्मन्त्रोद्धारः,
दीक्षाङ्गहोमविधिः,
पूजानन्तरप्रकारः,
आत्मसमर्पणमन्त्रः,
आत्मसमर्पणप्रकारः,
अभिषेकप्रकारः,
मन्त्रग्रहणानन्तरं शिष्यकृत्यम्,
मन्त्रदानानन्तरं गुरुकृत्यम् ।
इति चतुर्थः पटलः ।
दीक्षितमन्त्रविधिः,
जपस्थानानि,
जपस्थानेषु क्रमेणाहारनियमः,
पुरश्चरणोत्तरकृत्यम्,
सिद्धमन्त्रस्य कृत्यम्,
पूजायां प्रातःकालिकध्यानम्,
प्रातस्सवनपूजाफलम्,

प्रातः पूजायां नैवेद्यं तर्पणं च,
मध्याह्नसवनध्यानम्,
आवरणनैवेद्यदानप्रकारः,
होमादिकम्,
एतत्फलम्,
तृतीयकालपूजाव्यवस्था,
तृतीयकालपूजाध्यानम्,
आवृतिदेवतानामनिर्देशः,
तर्पणप्रकारः जपसंख्या च,
सायाह्नपूजाफलम्,
रात्रौ पूजाप्रकारः,
रासक्रीडास्वरूपम्,
रात्रिपूजोचितध्यानम्,
आवरणानि,
पूर्वोक्तावृतिसंख्यापूर्वकम् नैवेद्यम्,
रासपूजाफलम्,
उक्तोपसंहारः,
कालत्रयतर्पणद्रव्यम्,
तर्पणमन्त्रः,
उत्तरकृत्यम,
काम्यतर्पणद्रव्यम,
काम्यतर्पणम्,
षोडशद्रव्याणि,
काम्यतर्पणफलम;
काम्यतर्पणान्तरम्,
तस्य फलम्,
तर्पणान्तरम्,
तर्पणस्याशेषफलदातृत्वं तर्पणोत्तरकृत्यं च,
प्रयोगान्तरम्,
यन्त्रः,
तल्लेखनप्रकारः,

संस्कृतयन्त्रधारणफलम्,
यन्त्रस्य धारणादन्यत्राप्युपयोगः,
यन्त्रषडक्षरमन्त्रोद्धारः,
शक्तिबीजोद्धारः,
परमेश्वरपूजास्थाननियतिः,
कथितप्रकाराणां फलम्,
इति पञ्चमः पटलः ।
एवं साधितमन्त्रयोः प्रयोगौ,
प्रयोगार्थं दशाष्टादशाक्षरयोर्ध्यानम्,
तत्फलम्,
तन्मन्त्रः,
ऋष्यादि,
प्रयोगान्तरम्,
मन्त्रान्तरम्,
ऋष्यादि,
मन्त्रान्तरम्,
ऋष्यादि,
प्रयोगः—
प्रयोगान्तरम्,
मन्त्रान्तरम्,
ऋष्यादि,
पूर्वोक्तश्रीमन्मुकुन्देत्यादिचतुर्णां मन्त्राणामङ्गावरणानि,
मृत्युञ्जयविधिः,
मन्त्रान्तरम्,-
एतस्य पुरश्चरणादिकम्,-
अस्मिन्नेवबालरक्षार्थं मन्त्रान्तरम्,
अस्मिन्नेव गोरक्षार्थं मन्त्रान्तरम्,
विषहरणप्रयोगः,
प्रयोगान्तरम्,
कालियमर्दनमन्त्रः,
अस्य मन्त्रस्य अङ्गादिकम्,

अस्य पुरश्चरणम्,
प्रयोगश्च, विषघ्नप्रयोगान्तरम्,
प्रयोगान्तराणि,
जलपानमन्त्रः,
सन्तानगोपालमन्त्रः,
प्रयोगान्तराणि,
अस्य प्रयोजनस्य प्रकारान्तरेणाऽपि सिद्धिः,
अस्मिन्नेवाऽर्थे प्रयोगान्तरम्,
रागान्मारणप्रयोगे प्रायश्चित्तम्,
प्रयोगान्तराणि,
प्रकारान्तरम्,
इति षष्ठः पटलः ।
गोपालध्यानम्,
अष्टमहिषीध्यानम्,
पत्न्यन्तरध्यानम्,
अष्टनिधिध्यानम्,
त्रिंशत्यक्षरमन्त्रोद्धारः,
अस्यऋष्यादिकम्,
पूजाप्रकारः,
अक्षरन्यासस्थानानि,
षडङ्गानि,
आत्मपूजा,
बाह्यपूजाप्रकारः,
कामगायत्र्युद्धारः,
मालामन्त्रोद्धारः,
विनियोगः,
यन्त्रे पूजाप्रकारः,
आवरणानि,
अङ्गानि,
नैवेद्यम्,
फलम्,

प्रयागः,
प्रयोगान्तराणि,
यन्त्रान्तरद्वयम्,
ध्यानम्,
पुरश्चरणजपादिकम्,
क्रमेण मन्त्राणामुद्धारो ध्यानञ्च,
पुरश्चरणम्,
होमविधिस्तत्फलं च,
मन्त्रान्तरम्,
द्वात्रिंशदक्षरमन्त्रान्तरोद्धारः,
ऋष्यादिकं ध्यानं च,
मन्त्रान्तरोद्धारो ध्यानञ्च
पुरश्चरणं पूजा च,
प्रात्यहिकपूजाफलम्,
मन्त्रान्तरोद्धारः,
ऋष्यादिकं ध्यानञ्च,
पुरश्चरणम्,
प्रयोगान्तरम्,
मन्त्रान्तरम्,
ऋष्यादिकं ध्यानं च,
पुरश्चरणम्,
आयतनादिषु पूजाविशेषः,
द्वारपूजा,
विष्णुपार्षदनामानि,
अस्त्रोद्धारः,
पीठपूजा,
आवरणपूजा,
कुमुदादिनामानि,
पूजाफलम्,
मन्त्रान्तरम्,
ऋष्यादिकं ध्यानञ्च,
पुरश्चरणम्,
पूजाप्रकारस्तत्फलं च,

मन्त्रान्तरं ध्यानं च,
एकाक्षरादिगोपालमन्त्राः,
उक्तमन्त्राणामृष्यादि ध्यानं च,
एतेषां पुरश्चरणं तत्फलं च,
मन्त्रान्तरम्,
ध्यानपुरश्चरणपूजातर्पणानि,
यन्त्रान्तरं ध्यानं च,
आरात्रुक्तमन्त्रयोः
प्रयोगः फलं च,
इति सप्तमः पटलः ।
वशीकरणप्रयोगः,
क्षत्रियवैश्यशूद्राणां प्रयोगत्रयम्,
प्रयोगः,
प्रयोगान्तरम्,
पुनः प्रयोगान्तरम्,
पुनः प्रयोगान्तरम्,
पुनः प्रयोगान्तरम्,
पुनः प्रयोगान्तरम्,
समानफलं प्रयोगद्वयम्,
प्रयोगान्तरम्,
होमद्रव्याणि,
प्रयोगान्तरचतुष्टयम्,
मन्त्रयोर्माहात्म्यम,
मोक्षसाधकप्रयोगान्तरम्,
परममन्त्रद्वयम,
ऋष्यादिकम्,
षडङ्गानि,
बाणन्यासध्यानानि,
बाणनामानि,
ध्यानम्,
पूजाप्रकारः,

शक्तिवर्णा

संमोहनगायत्री,

तत्प्रभावः,

मन्त्रद्वयसाधारणतर्पणम्,

मन्त्रद्वयसम्बन्धिप्रयोगान्तरम्,

रुक्मिणीवल्लभमन्त्रोद्धारः,

मन्त्रवर्णसंख्या,

मन्त्रस्यऋष्यादिकम्,-

अङ्गविधिश्च,

न्यासोध्यानं च,

होमः सेवा च,

तत्फलम्,

मन्त्रान्तरेभ्योऽस्यातिशयः,

प्रयोगप्रकारस्तत्फलं च,

उपसंहारः,

इत्यादयोऽन्ये च विषयाःअत्र निरूपिताः सन्ति,

श्रीश्रीहरिः शरणम् ।

विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणसहिता

महामहोपाध्यायकाश्मीरिकश्रीकेशवभट्टविरचिता

क्रमदीपिका

श्रीमद्भगवत्श्रीकृष्णाराधननिरूपण-
प्रवण आगमनिबन्धः ।

वेणुवादनविनोदलालसं दिव्यगन्धपरिलिप्तवक्षसम् ।
वल्लवीहृदयवित्तहारिणं भावये कमपि गोपनन्दनम् ॥ १ ॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकप्रारिप्सितप्रतिबन्धकदुरितनिवृत्त्यसाधारणकारणमिष्टदेवताऽनुस्मरणपूर्वकं मङ्गलमाशीर्व्याजेन कृतं शिष्यशिक्षार्थमादौ निबध्नाति—

कलात्तमायेत्यादिना ।

कलात्तमायालवकान्तमूर्त्तिः
कलक्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं
श्रियेऽस्तु गोपीजनवल्लभो वः ॥ १ ॥

गोपीजनवल्लभो युष्माकं श्रिये सम्पदेऽस्तु भूयादिति योजना, गोपीजनस्य गोपाङ्गनाजनस्य वल्लभः स्वामी तथा च गोपीजनस्यैवाविज्ञातविनयप्रकारस्यापि वल्लभः किं पुनः साधकस्याशेषपूजाविधानकोविदस्येति भावः, यद्वा गोपी प्रकृतिर्जनो महदादिः अनयोर्वल्लभः प्रेरक इत्यर्थः । कीदृशः कलायां ज्ञानस्वरूपे स्वस्मिन् आत्तायाः प्राप्ताया अभ्यस्ताया मायाया लवकेन लेशेन विक्षेपात्मस्वभावेन आत्ता प्राप्ता मूर्तिर्येन स तथोक्तः, एतेन तस्य

शरीरसम्बन्धेऽपि न स्वरूपानुसन्धानप्रच्युतिरावरणशक्तेरप्रामाण्यादिति भावः। अथ वा कल बन्धने, तथा च बन्धनात्मकसंसारप्रवर्तनार्थं स्वीकृतमायालेशात्मकजलतत्त्वात्मनाऽङ्गीकृतमूर्तिरिति तोयेन जीवान् विससर्ज भूम्यामिति। अथ वा संमोहनमन्त्ररूपकं कामबीजं सकलगोपालमन्त्राणां बीजमुद्धरति कलेति, कश्च लश्च कलौ ताभ्यामात्तौ गृहीतौ सम्बद्धौ मायालवकौ चतुर्थस्वरानुस्वारौ ताभ्यामात्ता स्वीकृता बीजरूपा मूर्तिर्येन सः तथोक्तः कल इत्यत्राकारउच्चारणार्थः। पुनः कीदृशः कलमव्यक्तं मधुरं यथा स्यात्तथा क्वणन् शब्दायमानः वेणुर्वंशः कलक्वणंश्चासौ वेणुश्चेति कलक्वणद्वेणुः तस्य निनादेन रम्यः सर्वसुखप्रद इत्यर्थः। पुनः कीदृशः हृदि श्रितः हृत्पङ्कजे स्थितः हृदि ध्येय इत्यर्थः। यद्वा सर्वप्राणिनां हृदयेऽन्तर्यामिरूपेण स्थित इत्यर्थः। किं कुर्वन् त्रयाणां लोकानां समाहारस्त्रिलोकी त्रैलोक्यं व्याकुलयन् कर्तव्येषु विचारशून्यं कुर्वन् मायया मोहयन्नित्यर्थः। तदुक्तं गीतायाम्—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि माययेति॥

अत्र लघुदीपिकाकारः "कलात्तमायेत्यादिना गोपीजनवल्लभ इत्यनेन च बीजसहितोऽत्र दशाक्षरः सूचितः, कलक्वणदित्यादिना ध्यानं सूचितं, त्रिलोकीं व्याकुलयन्नित्यनेन च वश्यादिप्रयोगाः सूचिता"- इत्याह॥ १॥

गुरुनमस्कारपूर्वकं कर्तव्यं प्रतिजानीते—

गुरुचरणेति।

गुरुचरणसरोरुहद्वयोत्थान्
महितरजःकणकान्प्रणम्य मूर्ध्ना।
गदितमिह विविच्य नारदाद्यै-
र्यजनविधिं कथयामि शार्ङ्गपाणेः॥ २॥

इह ग्रन्थे शार्ङ्गपाणेः श्रीकृष्णस्य यजनविधिं पूजाहोमादिकरणप्रकारं विविच्य विवेचनं कृत्वा कथयामि आसमासेर्वर्तमानत्वात्, तथा च प्राचीनग्रन्थेभ्यः स्वग्रन्थस्योपादेयता दर्शि-

त्वा कीदृशं नारदगौतमप्रभृतिभिर्गदितम् एतेन स्वोक्तेः स्वातन्त्र्यं-निराकृतमिति भावः । किं कृत्वा मूर्ध्ना मस्तकेन महिताः पूजिता ये रजःकणका धूलिलेशास्तान् प्रणम्य कीदृशान् गुरुचरणद्वयमेव पद्मद्वयं तदुत्थान् तदुद्भवान्, एतेन गुरुभक्त्यतिशयः सूचितः तथा गुरुध्यानं शिरसि कर्तव्यमित्यपि सूचितम् ॥ २ ॥

मन्त्रान्तरेभ्यो गोपालमन्त्रस्यातिशयितं वक्तुं भूमिकां रचयति-

क्षितीति ।

क्षितिसुरनृपविट्तुरीयजानां-
मुनिवनवासिगृहस्थवर्णिनां च ।
जपहुतयजनादिभिर्मनूनां-
फलति हि कश्चन कस्य चित्कथं चित् ॥ ३ ॥

हि यतः मनूनां गोपालमन्त्रव्यतिरिक्तानां मध्ये कश्चन मन्त्रो-राश्यादिना शोधितः क्षितिसुरप्रभृतीनां वर्णानां मध्ये मुनिवनवा-सिप्रभृतीनामाश्रमाणां चकारात् स्त्रीणां मध्ये कस्य चित्कथं चिज्-जनस्य भाग्यवशाज्जपहोमादिभिः आदिशब्देन तर्पणादेः परिग्रहः फलति फलं ददातीति योजना, हि शब्दोऽत्रावधारण इति काश्चित् क्षितिसुरो ब्राह्मणः, नृपः क्षत्रियः, विट् वैश्यः, तुरीयः शूद्रः, मुनिर्यतिः वनवासी वानप्रस्थः, गृहस्थः कृतदारपरिग्रहः, वर्णी ब्रह्मचारी ॥३॥

अधुना गोपालमन्त्रस्य सर्वेषु सिद्धत्वमाह—

सर्वेष्विति ।

सर्वेषु वर्णेषु तथाऽऽश्रमेषु
नारीषु नानाह्वयजन्मभेषु ।
दाता फलानामभिवाञ्छितानां-
द्रागेव गोपालकमन्त्र एषः ॥ ४ ॥

सिद्धादिगणनानिरपेक्ष एवैष प्रथमोपस्थितो वक्ष्यमाणदशाक्ष-रगोपालमन्त्रो न तु गोपालविषयको मन्त्रगणोऽतिप्रसङ्गात्

स्वाहाप्रणवसंयुक्तं मन्त्रं शूद्रे ददद् द्विजः ।
शूद्रो निरयगामी स्याद् द्विजश्शूद्रोऽभिजायते ॥

इत्यागमविरोधात्, लक्षणापत्तेश्च, वाञ्छितानां स्वाभिमतानां फलानां द्रागेव झटित्येव दाता केषु सर्वेषु वर्णेषु ब्राह्मणादिषु सर्वाश्रमेषु ब्रह्मचारिप्रभृतिषु नारीषु नानाह्वयजन्मभेषु नानाप्रकारनामसु तथा नानाप्रकारजन्मनक्षत्रेषु सत्स्वपीत्यर्थः ॥ ४ ॥

एवं सत्यपि गुरुचरणशुश्रूषापरोपस्थिताय मन्त्रो देय इति व्यनक्ति—

नूनमिति।

नूनमच्युतकटाक्षपातने
कारणं भवति भक्तिरञ्जसा ।
तच्चतुष्टयफलाप्तये ततो-
भक्तिमानधिकृतो हरौ गुरौ ॥ ५ ॥

यस्मान्नूनं निश्चितम् अच्युतकटाक्षपातने श्रीकृष्णकृपाऽवलोकने भक्तिरञ्जसा तत्त्वतः कारणं ततस्तस्मात्कारणात् तच्चतुष्टयफलाप्तये प्रसिद्धधर्मादिपुरुषार्थचतुष्टयरूपफलप्राप्त्यर्थं हरौ विष्णौ गुरौ मन्त्रदातरि च भक्तियुक्तपुरुषो दीक्षादावधिकृतोऽधिकारी भवतीत्यर्थः। एतेन गुरुदेवतयोरभेदेन ध्यानं कर्तव्यमिति सूचितम् ॥ ५ ॥

अधुना पूजाक्रममाह—

स्नात इत्यादिना।

स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तस्सपवित्रमुद्रितकरः श्वेतोर्द्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं-
वाऽऽसीनःस्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः॥६॥

स्नातः स्वगृह्योक्तविधिना आगमोक्तविधिनाऽपीति केचित्, निर्मले विशदे प्रक्षालिते सूक्ष्मे वस्त्रे यस्य स तथोक्तः, धौतेति प्रक्षालितपाणिपादवदनः, स्वाचान्तः स्मृत्युक्तविधिना कृताचमनः, सपवित्रेति पवित्रसहितः मुद्रायुक्तहस्तः, सुपवित्रेतिपाठे अतिशोभनपवित्रेण मुद्रितः मुद्रासम्बद्धो हस्तो यस्ये-

ति, श्वेतेति श्वेतश्चासौ ऊर्ध्वश्चेति श्वेतोर्ध्वः एवम्भूततिलकेनोज्ज्वलः, प्राचीदिग्वदनः पूर्वाभिमुखः अत्र प्राग्वदनस्य कण्ठोक्तत्वात् प्राग्वदनं मुख्यं तदसम्भवे तूदङ्मुखत्वं रात्रौ तु सर्वपूजास्वेवोदङ्मुखत्वं पुराणे च तथैवाभिधानात्, अनन्तरं सुदृढं यथा स्यात्तथा पद्मासनं स्वस्तिकं वा कृत्वा, तत्र पद्मासनं प्रसिद्धं, स्वस्तिकलक्षणं तु—

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायसमासीनं स्वस्तिकं तत्प्रचक्षते ॥

आसीन उपविष्टः स्वगुरून् गणेशं च वन्देत, अथोशब्दश्चार्थेऽनुक्तसमुच्चये तेनाग्रे दुर्गां पृष्ठे क्षेत्रपालं च वन्देत, तदुक्तं गौतमीये—

वामे गुरुं दक्षिणतो गणेशं दुर्गां पुरः क्षेत्रपतिं च पश्चात् ।

इति । प्रयोगश्च गुं गुरुभ्यो नमः, गं गणपतये नमः, दुं दुर्गायै नमः, क्षें क्षेत्रपालाय नमः, बद्धाञ्जलिः कृताञ्जलिपुटः सन्नित्यर्थः अत्र शारदातिलकोक्तक्रमेणैतद् बोद्धव्यं दक्षिणे पूजाद्रव्यस्थापनं वामे जलकुम्भस्थापनं पृष्ठे करप्रक्षालनपात्रस्थापनं पुरतो दीपचामराद्युपकरणस्थापनमिति ॥ ६ ॥

भूतशुद्धेः पूर्वं कृत्यमाह—
ततोऽस्त्रमन्त्रेणेति ।

ततोऽस्त्रमन्त्रेण विशोध्य पाणी
त्रितालदिग्बन्धहुताशशालान् ।
विधाय भूतात्मकमेतदङ्ग-
विशोधयेच्छुद्धमतिः क्रमेण ॥ ७ ॥

ततस्तदनन्तरं भूतात्मकं पृथिव्यादिपञ्चमहाभूतमयमेतदङ्गशरीरं शुद्धमतिः विशदमतिः विशोधयेद् देवताऽऽत्मकं कुर्यादित्यर्थः नादेवो देवमर्चयेदिति वचनात्, क्रमेण वक्ष्यमाणप्रकारेण, किं कृत्वा; अस्त्रमन्त्रेणैव अस्त्राय फडित्यनेन तन्मन्त्राङ्गास्त्रमन्त्रेणैव वा गन्धपुष्पाभ्यां हस्तौ संशोध्य करन्यासं कृत्वाऽस्त्रमन्त्रेणैवोर्ध्वो-

च्छेन्तालत्रयं कुर्यात्, तदुक्तं शारदायाम्—

करन्यासं समासाद्य कुर्यात्तालत्रयं तत इति।

अनन्तरमस्त्रमन्त्रेणैव छोटिकया दशदिग्बन्धनम्, अस्त्रमन्त्रेणैव वह्निप्राकारं जलेनात्मनः परिवेष्टनरूपं विधाय कृत्वा; अत्र सम्प्रदायः हृत्पद्मकर्णिकास्थं दीपशिखानिभं जीवात्मानं हंस इति मन्त्रेण सुषुम्णावर्त्मना मस्तकोपरि सहस्रदलकमलावस्थितपरमात्मनि संयोज्य पृथिव्यादिपञ्चविंशतितत्त्वानि तत्र विलीनानि विभाव्य भूतशुद्धिं कुर्यात् ॥ ७ ॥

भूतशुद्धिमाह—

इडावक्त्र इति।

इडावक्त्रे धूम्रं सततगतिबीजं सलवकं-
स्मरेत् पूर्वं मन्त्री सकलभुवनोच्छोषणकरम् ॥
स्वकं देहं तेन प्रततवपुषाऽऽपूर्य सकलं-
विशोध्य व्यामुञ्चेत्पवनमथ मार्गेण द्युमणेः ॥ ८ ॥

इडावक्त्रे वामनासापुटे सलवकं बिन्दुसहितं सततगतिबीजं वायुबीजं यमितिरूपं पूर्वं प्रथमं मन्त्री साधकः स्मरेत्। किम्भूतं धूम्रं कृष्णवर्णं, पुनः किम्भूतं सकलेति पञ्चभूतमयदेहशोषकं तथा च वामनासापुटेन वायुमाकर्षन् षोडशवारं वायुबीजं जपेदिति भावः। अनन्तरं सकलं सर्वं स्वकीयं शरीरं तेन बीजमयेन वायुना प्रततवपुषा विस्तीर्णशरीरेणापूर्य पूरयित्वा देहस्थवायोर्बाह्येनैक्यं विचिन्त्य विशोषं नीत्वा चतुःषष्टिवारं वायुबीजं कुम्भकेन जप्त्वा द्युमणेः सूर्य्यस्य मार्गेण पिङ्गलया दक्षिणनासापुटेन रेचनेनैव वायुबीजं द्वात्रिंशद्वारं जपन् वायुं व्यामुञ्चेत् त्यजेदित्यर्थः ॥ ८ ॥

तेनेति।

तेनैव मार्गेण विलीनमारुतं-
बीजं विचिन्त्यारुणमाशुशुक्षणेः।

आपूर्य देहं परिदह्य वामतो-
मुञ्चेत्समीरं सह भस्मना बहिः ॥ ९ ॥

तेनैव श्वसनेः सूर्यस्य मार्गेण दक्षिणनासापुटेन विलीनः लम्बको मारुतो वायुर्यत्र तद् आशुशुक्षणेर्वन्हेर्बीजं रमिति अरुणमरुणवर्णं विचिन्त्य वायुनाऽऽपूर्य तद्बीजस्य षोडशवारजपेन पूरकं कृत्वाऽनन्तरं कुम्भकेन चतुर्गुणं रंबीजं जपन् देहं परिदह्य तदूर्ध्वं रमिति द्वात्रिंशद्वारं जपन् वामत इडामार्गेण वामनासापुटेन भस्मना सह बहिः समीरं वायुं मुञ्चेदित्यर्थः ॥ ९ ॥

उत्पत्तिं दर्शयति—
टपरमिति ।

टपरमतीव शुद्धममृतांशुपथेन विधुं-
नयतु ललाटचन्द्रममुतस्सकलार्णमयीम् ।
लपरजपान्निपात्य रचयेच्च तया सकलं-
वपुरमृतौघवृष्टिमथ वक्रकराङ्गमिदम् ॥ १० ॥

टस्य परष्टपरः ठकारस्तमतीव शुद्धं श्वेतं विधुं चन्द्रबीजरूपम् अमृतांशुपथेन वामनासापुटेन षोडशवारजपेन ललाटचन्द्रं ब्रह्मरन्ध्रस्थचन्द्रं नयतु प्रापयतु, ननु सर्वशरीरस्य दग्धत्वात् कथममृतांशुपथेन चन्द्रबीजनयनमिति चेन्न, पूर्वोक्तस्य भावनाऽऽत्मकत्वात्, अथानन्तरम् अमुतः अमृतांशोर्ललाटचन्द्राद्ब्रह्मरन्ध्रस्थशशाङ्कात् सकलार्णमयीं मातृकामयीम् अमृतसमूहवृष्टिं लपरो वकारः वरुणबीजमिति यावत् तज्जपेन कुम्भकेन चतुःषष्टिवारजपेन निपात्य उत्पाद्य तया मातृकामय्या वृष्ट्या इदं सकल शरीरं रचयेदारचयेत्, कीदृशं वपुर्वक्रकराङ्गं वक्रं च करश्च अङ्गम् अवयवरूपं यत्र तत्तथा वक्रकराढ्यमिति पाठे वक्राढ्यं कराढ्यं चेत्यर्थः, अनन्तरं दक्षिणनासापुटेन वायुं रेचयेत् लमिति पृथ्वीबीजं पीतवर्णं द्वात्रिंशद्वारं जपन् तत् शरीरं सुदृढं चिन्तयेत् तदनु सोऽहमित्यात्ममन्त्रेण ब्रह्मरन्ध्राज्जीवं हृदयाम्भोजमानयेदिति सम्प्रदायः ॥ १० ॥

अधुना मातृकान्यासं दर्शयति—

शिरोवदनेति ।

शिरोवदनवृत्तदृक्श्रवणघोणगण्डोष्ठदद्-
द्वये च सशिरोमुखेऽच इति च क्रमाद्विन्यसेत् ।
हलश्च करपादसन्धिषु तदग्रकेष्वादरात्
सपार्श्वयुगपृष्ठनाभ्युदरकेषु याद्यानथ ॥ ११ ॥

अत्र शिरःशब्दो ललाटस्योपलक्षकः ललाटमुखमावृतेति शारदादर्शनात्, एकत्राक्षरद्वयस्यापि न्यासापाताच्च, वदनवृत्तं मुखमण्डलं दृक्श्रवणघोणगण्डोष्ठदन्तानां द्वयमिति समासः द्वयमिति दृगादावपि सर्वत्र सम्बध्यते घोणा नासिका, दद्द्वये दन्तपङ्क्तिद्वये, इत्युक्तेषु स्थानेषु अचः षोडश स्वरान् क्रमेणैकाक्षरक्रमेण विन्यसेत् तथा हलश्च कादीनि व्यञ्जनानि च तत्र कादीनि विंशत्यक्षराणि आदरात् आदरपूर्वकं करपादसन्धिषु तदग्रकेषु च विन्यसेद् अनन्तरं यकारादीनि पञ्चाक्षराणि सपार्श्वयुगपृष्ठनाभ्युदरकेषु पार्श्वयुगेन सह वर्तते यत् पृष्ठनाभ्युदरन्तत्र विन्यसेत् तथाऽनन्तरमनेन वक्ष्यमाणमार्गेण याद्यान् वर्णान् हृदयादिस्थानगतान् अत्रापि करपद्युगयोरुदरवक्त्रयोश्च हृदयपूर्वं यथा स्यात्तथा अन्वहं प्रतिदिनं न्यसतु करपद्युगादीनां पूर्वैः पदैः समस्तानामपि हृदयपूर्वमिति क्रियाविशेषणेन सह सम्बन्धः सापेक्षत्वादत्रासमास इति तु तुल्यप्रधानसापेक्षविषयं द्रष्टव्यं, किमर्थं-शुद्धकलेवरसिद्धये शुद्धशरीरसम्पादनार्थमित्यर्थः ॥ ११ ॥

इत्यारचय्येति ।

हृदयकक्षककुत्करमूलदोः-
पद्युगोदरवक्त्रगतान् बुधः ।
हृदयपूर्वमनेन पथाऽन्वहं-
न्यसतु शुद्धकलेवरसिद्धये ॥ १२ ॥

इत्युक्तप्रकारेण वपुः शरीरम् अर्णशतार्द्धकेन पञ्चाशद्वर्णैः आरचय्य रचयित्वा अनन्तरं तैरेव पञ्चाशद्वर्णैः सार्द्ध-

इत्यारचय्य वपुरर्णशतार्द्धकेन
सार्द्धक्षपेशसविसर्गकसोभयैस्तैः ।
विन्यस्य केशवपुरस्सरमूर्त्तियुक्तैः
कीर्त्यादिशक्तिसहितैर्न्यसतु क्रमेण ॥ १३ ॥

अथ कथयाम्यर्णानां मूर्तीः शक्तीः समस्तभुवनमयीः ।
केशवकीर्ती नारायणकान्ती माधवस्तथा तुष्टिः ॥१४

क्षपेशसविसर्गकसोभयैः अर्द्धक्षपेशेन सह वर्तन्त इति सार्द्धक्षपेशाः अर्द्धचन्द्रसहिताः तैः सानुस्वारैरित्यर्थः सविसर्गकैः विसर्गसहितैः सोभयैरनुस्वारविसर्गसहितैः विन्यस्य तथा आदौ शरीरसम्पादनार्थं शुद्धमातृकाऽक्षरैर्विन्यस्य तदनन्तरं तेष्वेव ललाटादिषु मातृकास्थानेषु अं नम इत्यादीन् क्षं नमइत्यन्तान् तथा अः नम इत्यादीन् क्षः नम इत्यन्तान् तथा अंः नम इत्यादीन् क्षंः नम इत्यन्तान् वर्णान् विन्यस्येदित्यर्थः, एवं चतुर्विधो मातृकान्यासउक्तः। ननु कथमर्णशतार्द्धकेनेत्युक्तं वर्णानामेकपञ्चाशत्त्वादित्युच्यते क्षकारेणाक्षरद्वयस्यैकीकरणात् लत्वेन लकारद्वयस्यैकीकरणाद्वा लोकप्रसिद्धेर्वा प्रकरणेनैकपञ्चाशत्सङ्ख्यायास्तात्पर्येऽधिगते पञ्चाशद्वर्ण एवैकपञ्चाशत्संख्यापर इति प्रपञ्चसारविवरणे श्रीप्रेमानन्दभट्टाचार्यशिरोमणयः। वस्तुतस्तु अर्णशतार्द्धं च कं चार्णशतार्द्धकं तेनाक्षराणामेकपञ्चाशत्त्वमायातम् । असमविभागे वा अर्द्धशब्दः । केशवन्यासमाह विन्यस्य केशवेति, केशवः पुरःसरः प्रथमो यासां मूर्तीनां ताः तथा च केशवादिमूर्तिसहितैः कीर्त्यादिशक्तियुक्तैश्च मातृकाक्षरैर्ललाटादिषूक्तस्थानेषु यथाक्रमं न्यासः कार्यः ॥ १३ ॥ १४ ॥

गोविन्दः पुष्टियुतो विष्णुधृती सूदनश्च मध्वाद्यः ।
शान्तिस्त्रिविक्रमश्च क्रियायुतो वामनो दयायुक्तः ॥ १५ ॥

सूदनश्च मध्वाद्यः मधुसूदन इत्यर्थः ॥ १५ ॥

श्रीधरयुता च मेधा हृषीकनाथश्च हर्षया युक्तः ।
अम्बुजनाभश्रद्धे दामोदरसंयुता तथा लज्जा ॥१६॥

हृषीकनाथो हृषीकेश इत्यर्थः, अम्बुजनाथः पद्मनाथः ॥ १६ ॥

लक्ष्मीः सवासुदेवा
संकर्षणकः सरस्वतीयुक्तः ।
प्राद्यो द्युम्नः प्रीतिसमेतोऽ-
निरुद्धको रतिरिमाः स्वरोपेताः ॥ १७ ॥

प्राद्यो द्युम्नः प्रद्युम्नः ॥ १७ ॥

चक्रिजये गदिदुर्गे
शार्ङ्गी प्रभयाऽन्वितस्तथा खड्गी ।
सत्या शङ्खीचण्डा
हलिवाण्यौ मुसलियुग्विलासिनिका ॥ १८ ॥

शूली विजया पाशी विरजा विश्वान्वितोऽम्बुशीभूयः ।
विमदा मुकुन्दयुक्ता नन्दजसुनन्दे स्मृतिश्च नन्दियुता १९

नरकद्वी नरकजिता
समृद्धिरथ शुद्धियुग्घरिः कृष्णः ।
बुद्धियुतः सत्ययुतभुक्ति-
र्मतियुक्तः स्यात्ततः शौरिः ॥ २० ॥

॥ १८ ॥ १९ ॥ २० ॥

क्षमया शूरो रमया जनार्दनो मेचभूधरः क्लेदी ।
विश्वाद्यमूर्त्तियुक्ता क्लिन्ना वैकुण्ठयुक्तथा वसुदा॥२१॥

क्लेदी क्लेदिनीत्यर्थः छन्दोभङ्गभयात्तथोक्तः । विश्वादिमूर्त्तिरिति विश्वमूर्त्तिरित्यर्थः ॥ २१ ॥

पुरुषोत्तमश्च वसुधा बलिना च वरा बलानुजोपेता ।
भूयः परायणाख्या बालः सूक्ष्मा वृषघ्नसंध्ये च ॥ २२ ॥

॥ २२ ॥

सद्वषा प्रज्ञा हंसः प्रभा वराहो निशा च विमलोऽमोघा।
नरसिंहविद्युते च प्रोक्ता गदिता मूर्तयो हलां शक्तियुताः॥२३

अमोघेतिच्छेदः ॥ २३ ॥

पूर्वोक्तकेशवादिमूर्त्तिकीर्त्यादिशक्तिन्यासप्रकारं दर्शयति—

वर्णानुक्त्वा सार्धचन्द्रान् पुरस्तान्-
मूर्तीः शक्तीर्ङेऽवसाना नतिं च ।
उक्त्वा न्यस्येत् यादिभिः सप्तधातून्
प्राणं जीवं क्रोधमप्यात्मनेऽन्तान् ॥ २४ ॥

पुरस्तात् प्रथमं वर्णान् अकारादिक्षकारान्तान् उक्त्वा कथंभूतान् वर्णान् सार्धचन्द्रान् सबिन्दून् अनन्तरं मूर्तीः केशवाद्याः शक्तीः कीर्त्याद्याः ङेऽवसानाः इत्युभयेन सम्बध्यते तत्र हृदयग्राहि प्रत्यासत्तेः लाघवाच्च अं केशवाय कीर्त्यै नम इति प्रयोगे केशवायेत्यत्र नमःपदस्य योगाभावाच्चतुर्थ्यनुपपत्तिः न हि विष्णवे सूर्याय नम इति भवति, भवति च विष्णवे नम सूर्याय नमः इति तथा च केशवाय नमः कीर्त्यै नम इति प्रयोगापत्तिः उभयत्र वा चकारो देयः समुच्चयख्यापनार्थः, स श्रिये चामृताय चेतिवत् तथा मातृकाक्षराणामपि उभयसम्बन्धार्थे द्विः प्रयोगापत्तिः, अंकेशवकीर्तिभ्यां नम इति प्रयोगे तु नैते दोषाः पतन्ति तत्र द्वन्द्वसमासवशात् सहितावस्थितयोरेवोपस्थितौ चतुर्थ्यर्थान्वयसम्भवात् वर्णान्वयसम्भवाच्च अग्नीषोमयोरिव सहितावस्थितयोर्देवतात्वं, कथं तर्हि यादिषु त्वगादिप्रयोगः कार्य इत्युच्यते यं त्वगात्मने पुरुषोत्तमवसुधाभ्यां नमः रं असृगात्मने बलिपराभ्यां नम इत्येवंरूप इति, मन्त्रमुक्तावलिकारेण तथैवाभिधानात्, आत्मने इत्यस्य सुबन्तप्रतिरूपकनिपातत्वेनादोषादिति तु प्रपञ्चसारविवरणे परमानन्दभट्टाचार्य्याः तथा च अं केशवकीर्तिभ्यां नमः इति प्रयोगः मन्त्रमुक्तावलीकारलघुदीपिकाकारत्रिपाठिरुद्रोपाध्यायाविद्याधराचार्यपरमानन्दभट्टाचार्यसंमतः, अं केशवाय कीर्त्यै नम इति प्रयोगः पद्मपादाचार्यप्रभृतीनां संमत इति, ज्ञात्वा यथागुरुसम्प्रदायं-

व्यवहर्तव्यमिति। अत्रैव न्यासविशेषमाह–यादिभिरिति यकाराद्यैर्द-शभिरक्षरैः सह सप्त धातून् त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राख्यान् आत्मनेऽन्तान् आत्मने इतिशब्दः अन्ते येषान्ते तथा प्राणं जीवं क्रोधं च आत्मनेऽन्तं हृदयादिषु यथास्थानेषु विन्यस्येदित्यर्थः, प्राणं-शक्तिमित्यपि पाठान्तरम् ॥ २४ ॥

केशवादिन्यासे ध्यानमाह—

उद्यदिति।

उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं-
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम्।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं-
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥२५॥

अहं विष्णुं वन्दे कीदृशम् उद्यन्नुदयं गच्छन् प्रद्योतनः सूर्यः तस्य यच्छतं तस्येव रुचिर्दीप्तिर्यस्य तं, पुनः तप्तेति–वह्निम-ध्यनिक्षिप्तकाञ्चनवद्गौरं, पुनः कीदृशं पार्श्वद्वन्द्वे इति–दक्षिणवा-मपार्श्वद्वये जलधिसुतया लक्ष्म्या तथा विश्वधात्र्या पृथिव्या जुष्टं-सेवितं, पुनः किम्भूतं नानाविधरत्नेन शोभितो नाना बहुप्रकार आकल्पो भूषणं यस्य, पुनः कीदृशम् आपीतेति–आसम्यक् प्रका-रेण पीते वस्त्रे यस्य तं, पुनः कीदृशन्दरः शङ्खः पद्मं कमलं कौमो-दकी गदा चक्रम् एतानि पाणौ यस्य तम्, अत्र ऊर्ध्वाधःक्रमेण वाम-भागे शङ्खपद्मे दक्षिणभागे गदाचक्रे इति बोध्यम् ॥ २५ ॥

ध्यानन्यासयोः फलमाह—

ध्यात्वैवमिति।

ध्यात्वैवं परमपुमांसमक्षरैर्यो-
विन्यस्येद्दिनमनु केशवादियुक्तैः।
मेधाऽऽयुःस्मृतिधृतिकीर्तिकान्तिलक्ष्मी-
सौभाग्यैश्चिरमुपबृंहितो भवेत्सः ॥ २६ ॥

एवमुक्तप्रकारं परमपुमांसं विष्णुं ध्यात्वा योऽनुदिनं प्रत्यहं-केशवादिसहितैर्मातृकाक्षैर्विन्यस्येत् स पुरुषः मेधादिभिश्चिरं बहु-

कालम् उपबृंहितउपचितो भवति मेधा धारणावती बुद्धिः आयुर्जीवनं स्मृतिः स्मरणं धृतिर्धैर्यं कीर्त्तिरुत्कृष्टकर्मकथा कान्तिः-सौन्दर्यं लक्ष्मीरैश्वर्यं सौभाग्यं सर्वप्रियत्वम् ॥ २६ ॥

न्यासविशेषमाह—

अमुमिति ।

अमुमेव रमापुरःसरं प्रभजेद्यो मनुजो विधिं बुधः ।
समुपेत्य रमां प्रथीयसीं पुनरन्ते हरितां व्रजत्यसौ॥२७॥

यः पण्डितो मनुष्यः अमुमेव विधिं केशवादिन्यासप्रकारं-रमापुरःसरं श्रीबीजमादौ दत्वा प्रभजेत् करोति असौ पुमान् इह लोके प्रथीयसीं महतीं रमां लक्ष्मीं समुपेत्य प्राप्य पुनरन्ते अवसाने हरितां विष्णुत्वं व्रजति प्राप्नोतीत्यर्थः ॥ २७ ॥

तत्त्वन्यासं दर्शयति—

इत्यच्युतीत्यादि ।

इत्यच्युतीकृततनुर्विदधीत तत्त्व-
न्यासं मपूर्वकपराक्षरनत्युपेतम् ।
भूयः पराय च तदाह्वयमात्मने च
नत्यन्तमुद्धरतु तत्त्वमनून् क्रमेण ॥ २८ ॥

इति पूर्वोक्तप्रकारेण अच्युतीकृततनुः सम्पादितविष्णुशरीरः तत्त्वन्यासं वक्ष्यमाणप्रकारं विदधीत कुर्यात्, प्रकारं दर्शयति—मः पूर्वो यस्य स मपूर्वः कः परो यस्य सः कपरः नत्युपेतं नमःशब्दसहितं तथा च मकारादिव्युत्क्रमेण ककारपर्यन्तमेकैकाक्षरं नमःपदसहितं कृत्वा भूयोऽनन्तरं परायेतिपदं दत्वा अनन्तरं तदाह्वयं तेषां तत्त्वानामाह्वयं वक्ष्यमाणं नाम दत्वा अनन्तरम् आत्मने इतिपदं दत्वा अनन्तरं नत्यन्तं नमःपदमन्ते दत्वा क्रमेण तत्त्वमनून् तत्त्वमन्त्रानुद्धरतु ॥ २८ ॥

अधुना तत्त्वानां नामानि न्यासं स्थानं च दर्शयति—

सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।

कमुखहृदयगुह्याङ्घ्रिष्वथोशब्दपूर्व-
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्वम् ॥ २९ ॥

सकलवपुषि सर्वाङ्गव्यापके जीवं प्राणं च मन्त्रे आयोज्य तेन न्यस्यतु तथा च मं नमः पराय जीवात्मने नमः भं नमः पराय प्राणात्मने नमः इति द्वयं सर्वशरीरे विन्यस्येदित्यर्थः इति, तत्त्वपदं दत्वा मं-नमः पराय जीवतत्त्वात्मने नमः इति के चित्तत्प्रयोगान्कुर्वन्ति तन्न प्रमाणाभावात् मूर्तिपञ्जरन्यासेऽपि मूर्तिपदप्रयोगापत्तेः, अत्र मकारादीनां बिन्दुसाहित्यं सम्प्रदायावगतं बोद्धव्यं, मध्ये हृदये मतिम् अहङ्कारं मनश्च मन्त्रे आयोज्य तेन मन्त्री न्यस्यतु तथा बं नमः पराय मत्यात्मने नमः फं नमः पराय अहंकारात्मने नमः पं नमः पराय मनआत्मने नमः इति त्रयं हृदि विन्यस्येदित्यर्थः । अथोऽनन्तरं कमुखहृदयगुह्याङ्घ्रिषु पञ्चसु स्थानेषु शब्दपूर्वं गुणसमुदायं शब्दस्पर्शरूपरसगन्धात्मकं मन्त्रे आयोज्य तेन न्यस्यतु तथा च नं नमः पराय शब्दात्मने नमः इति शिरसि, धं नमः पराय स्पर्शात्मने नमः इति मुखे, दं नमः पराय रूपात्मने नम इति हृदये, थं नमः पराय रसात्मने नमः इति गुह्ये, तं नमः पराय गन्धात्मने नमः पादयोः विन्यस्येदित्यर्थः । अथानन्तरं श्रोत्रत्वग्दृक्जिह्वाघ्राणात्मकं कर्णादिस्थितं कर्णत्वक्दृक्जिह्वाघ्राणेषु स्थितं यथा स्यात्तथा न्यस्यतु तथा च णं नमः पराय श्रोत्रात्मने नमः इति श्रोत्रयोः, ढं नमः पराय त्वगात्मने नमः इति त्वचि, डं नमः पराय दृगात्मने नमः इति नेत्रयोः, ठं नमः पराय जिह्वात्मने नमः इति जिह्वायां, टं नमः पराय घ्राणात्मने नमः इति घ्राणयोरिति विन्यस्येत् ॥२९॥

वागादीति ।

वागादीन्द्रियवर्गमात्मनिलयेष्वाकाशपूर्वं गणं-
मूर्ध्न्यास्ये हृदये शिवे चरणयोर्हृत्पुण्डरीके हृदि ।
बिम्बानि छिषडष्टयुग्दशकलाढ्यानि सूर्योडुराड्-
वन्हीनां च यतस्तु भूतवसुमुन्यब्धयक्षरैर्मन्त्रवित् ॥३०॥

वागादीन्द्रियवर्गं वाक्पाणिपादपायूपस्थात्मकं कर्मेन्द्रियपञ्चकं-मन्त्रे आयोज्य आत्मनिलयेषु मुखपाणिपादपायूपस्थेषु न्यस्यतु तथा

च अं नमः पराय घ्राणात्मने नमः इति मुखे, झं नमः पराय पाण्यात्मने नमः इति पाण्योः, जं नमः पराय पादात्मने नमः पादयोः, छं नमः पराय पाय्वात्मने नमः इति पायौ, चं नमः पराय उपस्थात्मने नमः इत्युपस्थे विन्यस्येदित्यर्थः, आकाशपूर्वं गणमाकाशवाय्वग्निजलपृथिव्यात्मकं मन्त्रे आयोज्य मूर्धन्यास्ये हृदये शिवे लिङ्गे चरणयोर्न्यस्यतु तथा च ङं नमः पराय आकाशात्मने नम इति शिरसि, घं नमः पराय वाय्वात्मने नमः इति मुखे, गं नमः परायाग्न्यात्मने नम इति हृदये, खं नमः पराय जलात्मने नम इति लिङ्गे, कं नमः पराय पृथिव्यात्मने नमः इति पादयोर्न्यस्येदित्यर्थः । हृत्पुण्डरीकमित्यादेरयमर्थः हृत्पुण्डरीकं तथा सूर्योडुराड्वन्हीनां बिम्बानि सूर्यचन्द्राग्नीनां मण्डलानि त्रीणि द्विषडष्टयुग्दशकलाव्याप्तानि द्वादशषोडशदशकलायुक्तानि यतस्तु भूतवसुमुन्यक्ष्यक्षरैः यतो यकाराद् यो भूतवर्णः पञ्चमवर्णः शकारः वसुवर्णोऽष्टमार्णो हकारः मुनिवर्ण सप्तमः सकारः अक्षिवर्णो द्वितीयवर्णो रेफः एतैश्च सहितानि मन्त्रे आयोज्य हृदि न्यस्यतु तथा च शं नमः पराय हृत्पुण्डरीकात्मने नमः हं नमः पराय द्वादशकलाव्याप्तसूर्यमण्डलात्मने नमः सं नमः पराय षोडशकलाव्याप्तचन्द्रमण्डलात्मने नमः रं नमः पराय दशकलाव्याप्तवन्हिमण्डलात्मने नमः इति चतुष्टयं हृदये न्यस्यतु ॥ ३० ॥

अथ परमेष्ठिपुमांसौ विश्वनिवृत्ती च सर्वइत्युपनिषदः ।
न्यस्येदाकाशादिस्थाने षोपरवलार्णैः सलवकैः ॥ ३१ ॥

अथानन्तरं परमेष्ठिपुमांसौ विश्वनिवृती सर्वइत्युपनिषदो रहस्यान् षोपरवलार्णैरिति षकारः रेफस्य उप समीपं तेन रेफसमीपवर्तिनौ यकारलकारौ लक्ष्येते वकारो लकारश्च एतैः सलवकै र्बिन्दुसहितैः सहितान् आकाशादिस्थाने न्यस्येत् आकाशादि न्यासस्थानेषु मूर्ध्न्यास्ये हृदये लिङ्गे चरणयोर्न्यस्येत् ॥ ३१ ॥

अत्रैव विशेषमाह--

वासुदेवइति ।

वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
नारायणश्च क्रमशः परमेष्ठ्यादिभिर्युताः ॥ ३२ ॥

क्रमशः क्रमेण परमेष्ठ्यादिभिः सहिता वासुदेवादयो न्यसनीया तथा च यं नमः पराय वासुदेवाय परमेष्ठ्यात्मने नमः इति शिरसि, यं नमः पराय संकर्षणाय पुरुषात्मने नमः इति मुखे, लं नमः पराय प्रद्युम्नाय विश्वात्मने नम इति हृदये, वं नमः पराय अनिरुद्धाय निवृत्यात्मने नमः इति लिङ्गे, लं नमः पराय नारायणाय सर्वात्मने नमः इति हृदये, विन्यस्येदित्यर्थः, के चित्तु परमेष्ठ्यादेरनन्तरं वासुदेवादेः प्रयोगं कुर्वन्ति ॥ ३२ ॥

ततः कोपतत्त्वं च्रौंबिन्दुयुक्तं-
नृसिंहं न्यसेत्सर्वगात्रेषु तज्ज्ञः ।
क्रमेणेति तत्त्वात्मको न्यास उक्तः
स्वसांनिध्यकृद्बिम्बमूर्त्यादिषु द्राक् ॥ ३३ ॥

ततस्तदनन्तरं क्रमेण गुरूपदेशक्रमेण तज्ज्ञः नृसिंहबीजज्ञः क्षरौ क्षकाररेफऔकारइतिमिलितस्वरूपं बिन्दुयुक्तं तथा कोपतत्त्वं नृसिंहं च मन्त्रे आयोज्य सर्वगात्रेषु न्यस्येत् तथा च क्ष्रौं नमः पराय नृसिंहाय कोपात्मने नमः इति सर्वगात्रेषु न्यस्येदित्यर्थः तत्त्वन्यासमुपसंहरति इत्युक्तप्रकारेण तत्त्वात्मको न्यासः कथितो भवति कीदृशः विश्वमूर्त्यादिषु स्वसांनिध्यकृत्कृष्णसांनिध्यकृत् बिम्बादिष्विति के चित् बिम्बं प्रतिमा मूर्तिः शरीरम् आदिपदेन मणिमन्त्रादिसकलस्य परिग्रहः एतेषु हरेः सान्निध्यं करोतीत्यर्थः, के चिन्मर्त्यादिष्विति पाठः ॥३३॥

एतन्न्यासप्रयोजनमाह—

इति कृत इति ।

इति कृतेऽधिकृतो भवति ध्रुवं
सकलवैष्णवमन्त्रजपादिषु ।
पवनसंयमनं त्वमुना चरे-
द्यमिह जप्तुमसौ मनुमिच्छति ॥ ३४ ॥

तत्त्वन्यासे कृते ध्रुवं निश्चितमधिकृतो भवति न केवलं गोपालविषयमन्त्रकथनादत्रैव अपि तु सकलवैष्णवमन्त्रजपादिष्वपीत्यर्थः,

अधुना प्राणायामप्रकारमाह—पवनसंयमनमिति, असौ साधकः यं मनुम् इह व्यवहारभूमौ जप्तुमिच्छति अमुना मन्त्रेण पवनसंयमनं प्राणायामं चरतु कुर्यादित्यर्थः ॥ ३४ ॥

अत्रैव प्रकारान्तरमाह—

अथ वेति ।

अथ वाऽखिलेषु हरिमन्त्र-
जपविधिषु मूलमन्त्रतः ।
संयमनममलधीर्मरुतो-
विधिनाऽभ्यसंश्चरतु तत्त्वसंख्यया ॥ ३५ ॥

मूलमन्त्रतो मूलमन्त्रेण, वक्ष्यमाणदशाक्षरेणेति केचिद्, वस्तुतस्तु सप्ताक्षरगोपालवल्लभमन्त्रेण तस्यैव मूलमन्त्रत्वेनाभिधानात्तद्वचनस्य प्रयोजनान्तराभावात् तत्त्वसङ्ख्ययाऽष्टाविंशतिवारं चतुर्विंशतिवारामिति केचित् ॥ ३५ ॥

पुरतो जपस्य परतोऽपि
विहितमथ तत्त्रयं बुधैः ।
षोडश य इह समाचरेद्दिनशः
परिपूयते स खलु मासतोऽहसः ॥ ३६ ॥

पुरतो जपादौ पश्चाच्च तत्त्रयं बुधैर्विहितं प्राणायामत्रयं,-रेचकादित्रयमिति केचिद्, एतेन जपाङ्गत्वाच्च तत्राद्यन्तेऽयं दर्शितः ॥ ३६ ॥

अत्रैव प्रकारान्तरमाह—

अथ वेति ।

अथ वाऽङ्गजन्ममनुना सुसंयमं-
सकलेषु कृष्णमनुजापकर्मसु ।

सहितैकसप्तकृतिवारमभ्यसं-
स्तनुयात्समस्तदुरितापहारिणा ॥ १७ ॥

कृतीति कृतिच्छन्दसो विंशत्यक्षरत्वात् सहितमेकं यत्र तादृश-सप्तकृतिवारं अथ वा सहितानि मिलितानि एकसप्तकृतयः उभय-श्चाष्टाविंशतिवारमित्यर्थः सर्वेषु कृष्णमनुजापकर्मसु अङ्गजन्म-मनुना कामबीजेन प्राणायाममभ्यसंस्तनुयात् प्रथममेकं ततः सप्त ततो विंशतिं ततोऽभ्यासपाटवेऽष्टाविंशतिवारमित्यर्थः, कश्चित्तु प्रथमं सप्त ततो विंशतिस्ततएकं ततोऽष्टाविंशतिवारमभ्यासक्रमेणेति तात्पर्यमाह तत्र प्रमाणं स एव प्रष्टव्यः ॥ १७ ॥

मन्त्रविशेषप्राणायामप्रकारमाह—

अष्टाविंशतीति ।

अष्टाविंशतिसंख्यमिष्टफलदं मन्त्रं दशार्णं जप-
न्नायच्छेत्पवनं सुसंशितमतिस्त्वष्टादशार्णेन चेत् ।
अभ्यस्यन् रविवारमन्यमनुभिर्वर्णानुरूपं जपन्
कुर्याद्रेचकपूर्वकर्मनिपुणः प्राणप्रयोगं नरः ॥ १८ ॥

सुसंशितमतिः विमलबुद्धिः अष्टाविंशतिसंख्यं दशार्णं दशा-क्षरमन्त्रं जपन् प्रायच्छेत्प्राणायामं कुर्यात्कीदृशं दशार्णम् इष्ट-फलदं स्वाभिमतफलदं तत्र दशाक्षरमन्त्रस्य वारचतुष्टयं जपेन रेच-कम् अष्टवारजपेन पूरकं षोडशवारजपेन कुम्भकं कुर्य्यादिति गुरुस-म्प्रदायः अष्टादशार्णे चेत्प्राणायामः क्रियत इति शेषः तदा रवि-वारं द्वादशवारमभ्यस्यन् प्राणायामं कुर्यादिति गुरुसंप्रदायः, अन्य-मनुभिरन्यमन्त्रैश्चेत्प्राणायामः क्रियते तदा वर्णानुरूपं मन्त्रवर्णानां-तारतम्येन जपं कुर्वन् कुर्यात्, अत्र स्वल्पाक्षरैर्मन्त्रैर्बहुवारम् अनल्पा-क्षरैर्मन्त्रैः स्वल्पवारं जपेदित्यर्थः कीदृशः साधकः रेचकपूरककुम्भ-काख्यकर्मकुशलइत्यर्थः, रेचकस्य त्यागस्य पूर्वकर्मणी पूरककुम्भके तत्र निपुण इति रुद्रधरः, तच्चिन्त्यम् एवमपि रेचके नैपुण्यालाभात् प्रपञ्चसारानुसारिणोऽस्य ग्रन्थस्य शारदाग्रन्थानुयायित्वाच्च ॥१८॥

अधुना प्राणायामप्रकारं दर्शयति—

रेचयेन्मारुतमिति ।

रेचयेन्मारुतं दक्षया दक्षिणः
पूरयेद्वामया मध्यनाड्या पुनः ।
धारयेदीरितं रेचकादित्रयं-
स्यात्कलादन्तविद्याख्यमात्रात्मकम् ॥ १९ ॥

दक्षिणो विचक्षणः पुरुषः दक्षया दक्षिणनाड्या मारुतं-वायुं रेचयेत् त्यजेत् तथा वामया वामनाड्या त्यक्तवायुं पूरयेद् मध्यया सुषुम्णया नाड्या मारुतं वायुं धारयेद् इत्युक्तप्रकारेण रेचकादित्रयं रेचकपूरककुम्भकाख्यत्रितयम् ईरितं-कथितं रेचकादिष्ववधिकालमाह—कलादन्तेति, कला- षोडश, दन्ता द्वात्रिंशद्, विद्याः चतुःषष्टिरूपाः एतत्संख्याकमात्रात्मकमित्यर्थः, अत्र भैरवत्रिपाठिनः यत्र मन्त्रगणनया प्राणायामः तत्र कुम्भककाल एवोक्तः श्वासाभ्यासक्रमेण प्राणायामसंख्यया मन्त्रजपः कार्यो निर्गमप्राणायामे तु रेचकादिगणना कार्येत्याहुः, मात्रशब्देन च वामाङ्गुष्ठे कनिष्ठाद्यङ्गुलीनां प्रत्येकं पर्वत्रयस्पर्शकालः कथ्यते वामहस्तेन वामजानुमण्डलस्य प्रादक्षिण्येन स्पर्शकालश्च, यदत्र रुद्रोपाध्यायैरुक्तं यद्यप्यत्र रेचकं प्रथममुक्तं तदनन्तरं पूरकं तथाऽपि प्रथमं पूरकमनन्तरं कुम्भकं ज्ञेयं यतो गृहीतधृतस्य त्यागो भवति यत्पुनर्व्यत्यासेन कथनं तद्गोपनाय एवं कलादन्तेत्याद्यपि व्यत्यासेन बोद्धव्यम्, इडयोत्कर्षयेद्वायुमित्यादिशारदादर्शनाद् एवं च गृहीतचतुर्गुणेन धारणं तदर्द्धेन त्याग इत्यपि दर्शितं-भवतीति,तन्न,प्रपञ्चसारानुसारिणो ग्रन्थस्यास्य शारदानुयायित्वात् प्रपञ्चसारे रेचकादित्वस्यैवोक्तत्वात् पूरकादित्वस्याष्टाङ्गयोगान्तर्भूतप्राणायामविषयत्वाद् यदुक्तं गृहीतस्य त्यागो भवति तत्रोच्यते स्वाभाविकवायुधारणस्याऽपि सत्त्वादन्यथा शरीरपातापत्तेः यदुक्तं-व्यत्यासेन गोपनार्थं कथनमिति तदयुक्तं मन्त्रभिन्नस्यानुष्ठानभागस्य ऋजुमार्गेणैव वक्तु युक्तत्वाद् यदुक्तं गृहीतचतुर्गुणेनैव धारणं तदर्धेन त्याग इति तदप्ययुक्तं प्रमाणाभावाद् दक्षिणामूर्तिसंहितायाम् अङ्गुलीनियमोऽपि प्राणायामे कथितो यथा—

कनिष्ठाऽनामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विनेति ॥ ३९ ॥

प्रकृतमुपसंहरन्नात्मयागार्थं देहे पीठकल्पनां दर्शयति—प्राणायाममित्यादिना ।

प्राणायामं विधायेत्यथ निजवपुषा
कल्पयेद्यागपीठं-
न्यस्येदाधारशक्तिप्रकृतिकमठशे-
षक्ष्माक्षीरसिन्धून् ।
श्वेतद्वीपं च रत्नोज्ज्वलमहितमहा-
मण्डपं कल्पवृक्षं-
हृद्देशेंऽसद्वयोरुद्वयवदनकटी-
पार्श्वयुग्मेषु भूयः ॥ ४० ॥
धर्माद्यधर्मादि च पादगात्र—
चतुष्टयं हृद्यथ शेषमब्जम् ।
सूर्येन्दुवह्नीन्प्रणवांशयुक्तान्
स्वाद्यक्षरैः सत्त्वरजस्तमांसि ॥ ४१ ॥

इति पूर्वोक्तप्रकारेण प्राणायामं विधाय कृत्वा अथानन्तरं निजवपुषा निजशरीरेण यागपीठं पूजापीठङ्कल्पयेत् कल्पनाप्रकारमाह—न्यस्येदिति हृद्देशे हृदि आधारशक्त्यादिकल्पवृक्षान्तं न्यसेत् कमठः कूर्मः शेषोऽनन्तः क्षीरसिन्धुः क्षीरसमुद्रः रत्नेन उज्ज्वलः महितो यः महामण्डपः रत्नमण्डपः इति यावत् तथा चाधारशक्तये नमः प्रकृत्यै नम इति नवकं न्यसेद् हृदीत्यर्थः, भूयोऽनन्तरम् अंसद्वयोरुद्वयवदनकटीपार्श्वयुग्मेषु धर्माद्यधर्मादिपादगात्रचतुष्टयं विन्यस्येत् पादगात्रयोश्चतुष्टयं पादगात्रचतुष्टयमित्युभयत्र सम्बध्यते पादचतुष्टयं गात्रचतुष्टयं धर्मादि धर्मज्ञानवैराग्यैश्वर्यरूपपादचतुष्टयम् अंसद्वयोरुद्वये च धर्माय नमः दक्षिणांसे, ज्ञानाय नमः वामांसे, वैराग्या-

य नमः वामोरौ, ऐश्वर्याय नमः दक्षिणोरौ, इत्येवं प्रादक्षिण्यक्रमेण विन्यसेत् शारदायां प्रादक्षिण्येनेत्यभिधानात् तत्रानुष्ठानक्रमकथनाच्च अन्यथा शारदायाम् अंसोरुयुग्मयोरित्यत्रांसोरुयुगेत्यनेनैव क्रमप्राप्तेः प्रादक्षिण्येत्यस्य वैयर्थ्यं स्यात्, तथाऽधर्मादि अधर्माज्ञानावैराग्यानैश्वर्यरूपं गात्रचतुष्टयं वदनकटीपार्श्वयुग्मेषु अधर्माय नमः मुखे, अज्ञानाय नमः वामपार्श्वे, अवैराग्यायनमः कट्यां स्वाधिष्ठानप्रदेशे, अनैश्वर्याय नमः दक्षिणपार्श्वे इत्येवं क्रमेण न्यसेत् शारदायां मुखपार्श्वनाभिपार्श्वेष्विति क्रमदर्शनात्, एतच्च भैरवत्रिपाठिनोऽपि संमतम्, एतेषु यथाश्रुतक्रमेणैवेति विद्याधराचार्याः, अथानन्तरं शेषमनन्तम् अब्जं पद्मं सूर्येन्दुवह्नीन् सूर्यसोमाग्निमण्डलानि कीदृशान् तान् प्रणवांशयुक्तान् प्रणवस्योङ्कारस्यांशाः अवयवा अकारोकारमकारास्तैर्युक्तान्साहितान् तत्रादौ सबिन्दुप्रणवांशादिसाहित्यं सम्प्रदायतो बोद्धव्यं, स्वाद्यक्षरैः सबिन्दुस्वीयस्वीयप्रथमाक्षरैः सहितानि सत्त्वरजस्तमांसि तथा च हृत्पद्मे अनन्ताय नमः पद्माय नमः अं द्वादशकलाव्याप्तसूर्यमण्डलात्मने नमः उं षोडशकलाव्याप्तचन्द्रमण्डलात्मने नमः मं दशकलाव्याप्तवह्निमण्डलात्मने नमः सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः ॥४०॥४१॥

आत्मादित्रयमादिबीजसहितं व्योमाग्निमायालवै-
र्ज्ञानात्मानमथाष्टदिक्षु परितो मध्ये च शक्तीर्नव ।
न्यस्येत् पीठमनुं च तत्र विधिवत्तत्कर्णिकामध्यगं-
नित्यानन्दचितिप्रकाशममृतं संचिन्तयेद्धाम तत् ॥४२॥

आत्मादित्रयम् आत्माऽन्तरात्मा परमात्मेति लक्ष्यं कीदृशम् आदिबीजसहितं सबिन्दुं स्वीयस्वीयप्रथमाक्षररूपबीजसहितमिति विद्याधराचार्याः,आदिः प्रणवस्तत्सहितमिति त्रिपाठिनः,व्योम हकारः, अग्निःरेफः,माया दीर्घईः,लवो बिन्दुः,एतैः सह ज्ञानात्मानं भुवनेश्वरीबीजसहितं हृत्पद्मे न्यसेदिति पूर्वेणान्वयः तथा च आं आत्मने नमः, अं अन्तरात्मने नमः, पं परमात्मने नमः, ह्रीं ज्ञानात्मने नमः, इति हृदि विन्यसेद्, अथानन्तरम् अष्टदिक्षु परितः प्रादक्षिण्येन मध्ये च कर्णिकायां नवशक्तीर्विमलोत्कर्षिण्याद्या न्यस्येत्पद्मस्य पूर्वादिके-

सरेषु प्रादक्षिण्येन विमलायै नमः, उत्कर्षिण्यै नमः, ज्ञानायै नमः क्रियायै नमः, योगायै नमः, प्रह्व्यै नमः, सत्यायै नमः, ईशानायै नमः, कर्णिकायां अनुग्रहायै नमः, इति न्यसेत्, पीठमन्त्रं च तत्र न्यस्य; एतस्योपरि वक्ष्यमाणं पीठमन्त्रं ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति मन्त्रंन्यसेत् तत उक्तरूपे पीठे विधिवद् गुरूपदिष्टमार्गेण तत् सर्वोपनिषत्प्रसिद्धम् धाम ब्रह्मचैतन्यं चिन्तयेत् कीदृशं तत्कर्णिकामध्यगं हृत्पद्मकर्णिकामध्यस्थमित्यर्थः, एतद् ध्यानोपयोगि रूपमुक्तं स्वाभाविकरूपमाह कीदृशं नित्येति अविनाशिचैतन्यं स्वतःप्रकाशस्वरूपं पुनः कीदृशम् अमृतं शुद्धस्वरूपमित्यर्थः, तत्राधारशक्त्यादयः सर्वे मन्त्राः प्रणवादिचतुर्थीनमोऽन्ताः सम्प्रदायतो बोद्धव्याः ॥ ४२ ॥

पीठशक्तीर्दर्शयति—

विमलोत्कर्षिणी ज्ञाना क्रिया योगेति शक्तयः ।
प्रह्वी सत्या तथेशानाऽनुग्रहा नवमी स्मृता ॥४३॥

विमलेति ॥ ४३ ॥

पीठमन्त्रमुद्धरति—

तारमित्यादिना ।

तारं हृदयं भगवान् विष्णुः सर्वान्वितश्च भूतात्मा ।
ङेऽन्ताः सवासुदेवाः सर्वात्मयुतश्च संयोगः ॥४४॥
योगावधौ च पद्मं पीठात्मा ङेयुतो नतिश्चान्ते ।
पीठमहामनुरुक्तः पर्याप्तोऽयं सपर्यासु ॥ ४५ ॥

तारः प्रणवः, हृदयं नमः, भगवानिति च विष्णुरिति च सर्वान्वितः सर्वपदसहितः भूतात्मा सर्वभूतात्मेति, एते त्रयः सवासुदेवाः वासुदेवेन सह चत्वारः प्रत्येकं ङेऽन्ताश्चतुर्थ्यन्ताः कार्याः सर्वात्मयुतश्च संयोगः सर्वात्मसंयोगइति स्वरूपं योगावधौ योगशब्दान्ते पद्मपद्मेति स्वरूपं ङेयुतः पीठात्मा चतुर्थ्यन्तः पीठात्मा एतस्यान्ते नतिर्नमःशब्दः, उपसंहरति पीठेति अयं पीठमहामनुरुक्तः कथितः कीदृशः सपर्यासु पूजासु पर्याप्तः समर्थः ॥ ४४ ॥ ४५ ॥

करशोधनं दर्शयति—

करयोरित्यादिना ।

करयोर्युगलं विधाय मन्त्रा-
त्मकमाभ्यामभिधास्यमानमार्गात् ।
सकलं विदधीत मन्त्रवर्णैः
परमं ज्योतिरनुत्तमं हरेस्तत् ॥ ४६ ॥

इति श्रीकेशवाचार्यविरचितायां-
क्रमदीपिकायां प्रथमः पटलः ॥

करयोर्युगलम् अभिधास्यमानमार्गाद्, व्यापय्येत्यारभ्य, *विधिः समीरितः करे इत्यन्तं वक्ष्यमाणप्रकारेण मन्त्रवर्णैर्मन्त्रात्मकं*-मन्त्रस्वरूपं विधाय कृत्वा आभ्यां कराभ्यां सकलं पूर्वोक्तं वक्ष्यमाणं च न्यासपूजादिकं विदधीत कुर्याद् मन्त्रवर्णकरणककरशोधने हेतुमाह परममित्यादिना यस्मात्तन्मन्त्रवर्णं हरेः कृष्णस्य परमं-तेजःस्वरूपमित्यर्थः, कीदृशं पुनः अनुत्तमं नास्त्युत्तमं यस्मात्तथेत्यर्थः, सकलं विदधीतेति परत्रापि काकाक्षिगोलकन्यायेन योजनीयं-तथा च तद् हृदयपङ्कजस्थं हरेरनुत्तमं ज्योतिस्तेजः सकलं विदधीत षडङ्गन्यासेन सावयवं कुर्यादिति लघुदीपिकाकारः ॥ ४६ ॥

इति श्रीविद्याविनोदगोविन्दभट्टाचार्यविरचिते क्रमदीपिका-
या विवरणे प्रथमः पटलः ॥ १ ॥

करयोर्युगलं विधायेत्यादिना सूचितं मन्त्रमुद्धर्तुमादौ गोपालमन्त्रेष्वपि मौलीभूतौ दशाक्षराष्टादशाक्षरौ प्रथमं संस्तौति–

वक्ष्ये मनुमिति ।

वक्ष्ये मनुं त्रिभुवनप्रथितानुभाव-
मक्षीणपुण्यनिचयैर्मुनिभिर्विमृग्यम् ।
पक्षीन्द्रकेतुविषयं वसुधर्मकाम-
मोक्षप्रदं सकलकार्मणकर्मदक्षम् ॥ १ ॥

मन्त्रं वक्ष्ये उद्धारिष्यामि कीदृशं त्रिभुवनेति त्रिभुवने त्रैलोक्ये प्रथितः ख्यातोऽनुभावः प्रभावो यस्य तथा तं पुनः कीदृशं मुनिभिर्मुमुक्षुभिर्विमृग्यम् अन्वेषणीयं किंभूतैर्मुनिभिः अक्षीणेति अक्षीणः संपूर्णः पुण्यनिचय. सुकृतसमूहो येषां तथा तैः पुनः कीदृशं पक्षीति पक्षीन्द्रो गरुडः स एव केतुः चिन्हं यस्य सः पक्षीद्रकेतुः श्रीकृष्णः तद्विषयं तत्प्रतिपादकं पुनः कीदृशं वास्विति वसु धनन्तथा च पुरुषार्थचतुष्टयप्रदमित्यर्थः पुनः कीदृशं सकलेति अशेषवश्यकर्मकुशलम् ॥ १ ॥

अतिगुह्यमबोधतूलराशि-
ज्वलनं वागधिपत्यदं नराणाम् ।
दुरितापहरं विषापमृत्यु-
ग्रहरोगादिनिवारणैकहेतुम् ॥ २ ॥

पुनः कीदृशम अतिगुह्यं पुनः कीदृशम् अबोधेति अबोधो मिथ्याज्ञानरूपः स एव तूलप्रचयः तत्र ज्वलनो वह्निरिव तं समस्ताज्ञाननाशकमित्यर्थः पुन कीदृशं नराणां साधकानां वागधिपत्यदं वागैश्वर्यप्रदं पुनः कीदृशं दुरितापहरं दुःखप्रापकानिष्टनिवारकं पुनः कीदृशं विषं स्थावरं जङ्गमं च अपमृत्युरकालमरणं ग्रहो नवग्रहजनितानिष्टं रोगो वातपित्तादिजनितशरीरदौस्थ्यम् एवमादीनामशुभादीनां निवारणे एकोऽद्वितीयो हेतुः कारणम् ॥ २ ॥

पुनः कीदृशम्—

जयदं प्रधनेऽभयदं विपिने
सलिलप्लवने सुखतारणदम् ।
नरसाश्वरथद्विपवृद्धिकरं-
सुतगोधरणीधनधान्यकरम् ॥ ३ ॥

प्रधने संग्रामे जयदं, विपिनेऽभयदं भयहरं, सलिलप्लवने तोयसन्तरणे सुखसन्तरणदातारं, सप्तिर्हयः तथा च मनुष्याणां-हयरथद्विपादीनामुपचयकरं, तथा सुतादिप्रदम् ॥ ३ ॥

पुनः कीदृशम्—

बलवीर्यशौर्यनिचयप्रतिभा-
स्वरवर्णकान्तिसुभगत्वकरम् ।
क्षुभिताण्डकोटिमणिमादिगुणा-
ष्टकदं किमत्र बहुनाऽखिलदम् ॥ ४ ॥

बलं शरीरसामर्थ्यं, वीर्यं शुक्रं प्रभावो वा, शौर्यं पराभिभावकं-तेजः, एतेषां निचयः समूहः, प्रतिभा बुद्धिः स्फूर्तिरूपा स्वरो-ध्वनिः, वर्णो गौरत्वादिः, कान्तिर्दीप्तिः प्रतिभास्वरवर्णकान्तिरि-त्येकपदं तथा च प्रतिभास्वरवर्णकान्तिर्देदीप्यमानवर्णशोभेति क-श्चित् सुभगत्वं समस्तलोकादरकत्वम् एतेषां कर्तारन्दातारमित्यर्थः पुनः क्षुभिता संमोहिताऽण्डकोटिर्ब्रह्माण्डकोटिर्येन तथा तं संसार-मोहकमित्यर्थः, पुनः अणिमादिगुणाष्टकदम् अणिमलघिमगरिम-महिमेशित्ववशित्वप्राकाम्यप्राप्त्याख्यगुणाष्टकप्रदमित्यर्थः, पुनः किं-बहुना, अत्र जगति, अखिलदं समस्ताभीष्टप्रदमित्यर्थः ॥ ४ ॥

अथ दशाक्षरमन्त्रराजमुद्धरति—
शार्ङ्गीत्यादिना ।

शार्ङ्गी सोत्तरदन्तः
शूरो वामाक्षियुग्द्वितीयोऽर्णः ।

शूली शौरिर्बालो-
बलानुजद्वयमथाक्षरचतुष्कम् ॥ ५ ॥
शूरतुरीयः सानन-
वृत्तः स्यात्सप्तमोऽष्टमोऽग्निसखः ।
तद्दयिताऽक्षरयुग्मं-
तदुपरिगं त्वेवमुद्धरेन्मन्त्रम् ॥ ६ ॥

शार्ङ्गी गकारः कीदृशोऽयं सोत्तरदन्त उत्तरदन्तपङ्क्तौ न्यस्यमानः उत्तरदन्त ओकारस्तेन सहित एतेन प्रथमाक्षरमुद्धृतं, शूरः पकारः कीदृशोऽयं वामाक्षियुक् वामाक्षि चतुर्थस्वरः तेन सहित- एतेन द्वितीयाक्षरमुद्धृतम् अक्षरचतुष्कं क्रमेण पुनः कथ्यते शूली जकारः शौरिर्नकारः बालो वकारः बलानुजद्वयं संयुक्तलकार- द्वयं ल्लइतिस्वरूपमित्यक्षरचतुष्कमुद्धृतं शूरतुरीयः शूरस्य पकारस्य चतुर्थः कीदृशोऽयं सानननृत्तः आननवृत्तेनाकारेण सह वर्त्तत इति सानननृत्तः अयं च सप्तमः स्याद् मन्त्रस्य सप्तमो भवतीत्यर्थः अष्टमोऽग्निसखो वायुः यकारइति यावत् तथा च मन्त्रस्याष्टमो वर्णो य इति बोद्धव्यः तदुपरिगं पूर्वोक्तवर्णानन्तर्यविशिष्टन्तद्दयिताऽक्षरयुगलं स्वाहेति स्वरूपमित्यक्षरद्वयमुद्धृतम् ॥५॥६॥

प्रकाशितइति—

प्रकाशितो दशाक्षरो-
मनुस्त्वयं मधुद्विषः ।
विशेषतः पदारवि-
न्दयुग्मभक्तिवर्धनः ॥ ७ ॥

मधुद्विषः श्रीगोपालकृष्णस्यायं दशाक्षरो मन्त्र उद्धृतः कीदृशो- विशेषतो विशेषेण पदारविन्दयुग्मभक्तिवर्धनः श्रीगोपालकृष्णचरणाब्जयुगले या भक्तिराराध्यत्वेन ज्ञानं तत्समृद्धिकारक इत्यर्थः ॥ ७ ॥

मन्त्रस्य ऋष्यादिकं दर्शयति—

नारदइति ।

नारदो मुनिरमुष्य कीर्त्तितः
छन्द उक्तमृषिभिर्विराडिति ।
देवता सकललोकमङ्गलो-
नन्दगोपतनयःसमीरितः ॥ ८ ॥

अमुष्य पूर्वोक्तमन्त्रस्य मुनिः ऋषिर्नारदः कीर्तितः कथितः ऋषिभिर्गौतमादिभिर्विराट्छन्द उक्तं देवता नन्दगोपतनयः श्रीगोपालकृष्ण उक्तः कीदृशः सकललोकमङ्गलः सर्वजनकल्याणहेतुः एतेन ऋष्यादीनां शिरसि रसनायां हृदि क्रमेण न्यासः कार्यइति सूचितं-प्रपञ्चसारे तथा विधानात्, प्रयोगश्च दशाक्षरगोपालमन्त्रस्य नारदऋषये नमः शिरसि, विराट्छन्दसे नमो मुखे श्रीगोपालकृष्णाय देवतायै नमः हृदि इत्येवम्भूतः । अस्य मन्त्रस्य नारदऋषिः, एवं छन्दोदेवतयोरपि योज्यमिति केचित् ॥ ८ ॥

अधुनाऽस्य मन्त्रस्य पञ्चाङ्गानि दर्शयति—
अङ्गानीत्यादिना—

अङ्गानि पञ्च हुतभुग्दयितासमेतै-
श्चक्रैरमुष्य मुखवृत्तविसूपपन्नैः ।
त्रैलोक्यरक्षणयुजाऽप्यसुरान्तकाख्य-
पूर्वेण चेह कथितानि विभक्तियुक्तैः ॥ ९ ॥
हृदये नतिः शिरसि पावकप्रिया
सवषट् शिखा हुमपि वर्मणि स्थितम् ।
सफडस्त्रमित्युदितमङ्गपञ्चकं-
सचतुर्थि वौषडुदितं दृशोर्यदि ॥ १० ॥

अमुष्य इह शास्त्रे अङ्गानि पञ्च कथितानि कानि तानि तत्राह हृदये नतिरिति हृदये नतिर्नमःपदं शिरसि पावकप्रिया स्वाहेति सवषट् वषट्पदसहिता शिखेत्यर्थः हुमपि वर्मणि स्थितं वर्मणि कवचे हुमपि पदं स्थितमित्यर्थः सफडस्त्रं फट्पदसहितमस्त्रमित्यर्थः, इत्यनेन प्रकारेण सचतुर्थि यथा स्यात्तथैवमङ्गपञ्चक-

मुदितं कथितं चतुर्थ्यां च हृदयादीनां योगः कार्य्यः कैः सह च-क्रैश्चक्रशब्दैः कीदृशैः सुखवृत्तविसुपपन्नैर्मुखवृत्तमाकारः ।वि इति सु इति स्वरूपमेतैः प्रत्येकमुपपन्नैः सम्बद्धैः त्रैलोक्यरक्षणयु-जाऽपि त्रैलोक्यरक्षणं युनक्तीति तद्युग् एतादृशेन चक्रेण अपि-शब्दाच्चक्रैरिति विभिद्यान्वयः कार्यः तथा च चक्रेणेति असुरान्त-काख्यपूर्वेण चक्रेणेत्यर्थः चः समुच्चये पुनः कीदृशैः विभक्तियुक्तैः चतुर्थीयुक्तैः तस्या एव प्रकृतत्वात् एतस्यापि पदस्य विभिद्या-न्वयः कार्यः दृशोर्यदि इति यदि क चिन्मन्त्रे दृशोर्न्यासोऽस्ति तदा तत्र वौषडिति उदितं कथितम् अत्र ज्वालाचक्रायेत्यपि योज्यमिति लघुदीपिकाकारः।प्रयोगश्च आचक्राय स्वाहा हृदयाय नमः विचक्राय स्वाहा शिरसे स्वाहा सुचक्राय स्वाहा शिखायै वषट् त्रैलोक्यरक्षण-चक्राय स्वाहा कवचाय हुं ज्वालाचक्राय स्वाहा नेत्रद्वयाय वौषट् अ सुरान्तकचक्राय स्वाहा अस्त्राय फडिति अङ्गुलीष्वङ्गमन्त्रन्यासे तु त-त्तदङ्गमन्त्रान्ते अङ्गुष्ठाभ्यां नमः तर्जनीभ्यां स्वाहा इत्यादि यो-ज्यम् आगमान्तरे ह्रीं अङ्गुष्ठाभ्यान्नमः ह्रीं तर्जनीभ्यां स्वाहा तत-इत्यादिदर्शनात् तेनाङ्गुष्ठादिषु हृदयाय नमः इत्यादिप्रयोगाश्चिन्त्याः असमवेतार्थकत्वाद् मानाभावाच्चेति के चित्। अन्ये तु यथाश्रुताङ्ग-मन्त्रस्यैव न्यासैरङ्गुलीष्वतिदेशानाहुराचार्याः ॥ ९ ॥ १० ॥

दशाङ्गानि दर्शयति—

मन्त्रार्णैर्दशभिरुपेतमिन्द्रखण्डै-
रङ्गानान्दशकमुदीरितन्नमोऽन्तम् ।
हृत्शीर्षं तदनु शिखा तनुत्रमस्त्रं-
पार्श्वद्वन्द्वं सकटिपृष्ठमूर्द्धयुक्तम् ॥ ११ ॥

मन्त्रार्णैर्मन्त्राक्षरैर्नमोऽन्तं यथा स्यादेवम् अङ्गानां दशकमुदीरितं-कथितं कीदृशैः उपेतचन्द्रखण्डैः सानुस्वारैः स्थानान्याहुः हृदयं-शीर्षं मस्तकं तत्पश्चात् शिखा प्रसिद्धा तनुत्रं कवचम् अस्त्रं दश-दिक्षु पार्श्वयुगलकटिपृष्ठमूर्द्धसहितं पूर्वोक्तमित्यर्थः कटिर्नाभेरधः इति त्रिपाठिनः। प्रयोगस्तु गों हृदयाय नम इति पीं शिरसे स्वा-हा इत्यादि ॥ ११ ॥

अधुनाऽस्य मन्त्रस्य बीजशक्त्यधिष्ठातृदेवताप्रकृतिविनियोगान् दर्शयति—

वक्ष्यइत्यादिना ।

वक्ष्ये मन्त्रस्यास्य बीजं सशक्ति
चक्री शक्री वामनेत्रप्रदीप्तः ।
सप्रद्युम्नो बीजमेतत्प्रदिष्टं-
मन्त्रप्राद्युम्नो जगन्मोहनोऽयम् ॥ १२ ॥

अस्य मन्त्रस्य पूर्वोक्तस्य सशक्ति शक्त्यादिसहितं बीजं वक्ष्ये बीजमाह चक्रीति ककारः कीदृशोऽयं शक्री शक्रो लकारः तद्युक्तः पुनः कीदृशः वामनेत्रप्रदीप्तः वामनेत्रं चतुर्थस्वरस्तत्सहितः पुनः कीदृशः सप्रद्युम्नः प्रद्युम्नो विन्दुः तत्सहितः तथा चक्रीमिति सिद्धम्भवति एतदस्य बीजं प्रदिष्टं कथितम् अयमेव प्राद्युम्नो मन्त्र इत्यर्थः किम्भूतः जगन्मोहनो विश्ववश्यकरः ॥ १२ ॥

शक्तिमाह—

हंसइति ।

हंसो मेदोवक्त्रवृत्ताभ्युपेतः
पोत्री नेत्राद्यन्वितोऽसौ युगार्णो ।
प्रोक्ता शक्तिः सर्वगीर्वाणवृन्दै-
र्वन्द्यस्याग्नेर्वल्लभा कामदेयम् ॥ १३ ॥

हंसः सकारः किम्भूतः मेदो वकारः वक्त्रवृत्तमाकारः आभ्यामुपेतः सम्बद्धः तथाः पोत्री हकारः किम्भूतः नेत्रादिराकारस्तेनान्वितः तथा च स्वाहेति सिद्धमसौ युगार्णो वर्णद्वयात्मिका शक्तिः प्रोक्ता तथेयं वह्नेर्वल्लभा किम्भूता कामदा आकाङ्क्षितप्रदा कथंभूतस्य वह्नेर्गीर्वाणवृन्दैर्वन्द्यस्य सर्वदेवसमूहैः पूज्यस्य ॥ १३ ॥

विनियोगमाह—

विनियोग इति ।

विनियोगोऽस्य मन्त्रस्य-
पुरुषार्थचतुष्टये ।
कृष्णः प्रकृतिरित्युक्तो-
दुर्गाऽधिष्ठातृदेवता ॥ १४ ॥

अस्य मन्त्रस्य पुरुषार्थचतुष्टयसाधनाय विनियोग इत्यर्थः, प्रकृतिर्मूलकारणं मन्त्रोत्पादकः मन्त्रस्वरूपइत्यर्थः, अधिष्ठातृदेवतामाह दुर्गाऽधिष्ठातृदेवतेति ॥ १४ ॥

मन्त्रार्थमाह—

गोपायतीत्यादिना ।

गोपायति सकलमिदं-
गोपयति परं पुमांसमिति गोपी प्रकृतिः ।
तस्या जातं जन इति
महदादिकं पृथिव्यन्तम् ॥ १५ ॥

इदं सकलं नामरूपाभ्यां व्याकृतं जगद् गोपायति रक्षति तत्कारणत्वात् स्वार्थे आयः, तथा परं पुमासं नित्यशुद्धबुद्धमुक्ताऽऽनन्दाऽद्वयात्मकं ब्रह्मस्वरूपं गोपायति गुप गोपनकुत्सनयोः अज्ञातत्वेन विषयीकरोतीतिव्युत्पत्त्या गोपी प्रकृतिरविद्येति यावत् तस्याः प्रकृतेर्जातमिति व्युत्पत्त्या महदादि पृथिव्यन्तं महत्तत्वादि पृथिवीपर्यन्तं सकलङ्कार्यजातं जनउच्यते ॥ १५ ॥

अनयोर्गोपीजनयोः समीरणादाश्रयत्वतो व्याप्त्या ।
वल्लभ इत्युपदिष्टं सान्द्रानन्दं निरञ्जनं ज्योतिः ॥१६॥
स्वाहेति स्वात्मानं गमयामीति स्वतेजसे तस्मै ।
यः कार्यकारणेशः परमात्मेत्यच्युतैकताऽस्य भवेत् ॥१७॥

अनयोः गोपीजनयोरविद्यातत्कार्ययोः समीरणादन्तर्यामि-

त्वेन स्वस्य कार्ये प्रेरणात् नियमनादिति यावत् आश्रयत्वतो अधिष्ठातृत्वेन व्याप्त्या व्यापकत्वेन वल्लभः स्वामीत्युपदिष्टं कथितं-परं ज्योतिर्ब्रह्मचैतन्यरूपं कीदृशं ज्योतिः सान्द्रानन्दं निरतिशयानन्दैकस्वरूपं पुनः कीदृशं निरञ्जनं मायाकालुष्यरहितं स्वाहेति तस्मै स्वतेजसे स्वप्रकाशचिद्रूपाय परमात्मने स्वात्मानं जीवैकस्वरूपं गमयामि समर्पयामि तदात्मकतां प्रापयामीति स्वाहाशब्दार्थः, प्रथम इतिशब्दः स्वाहाशब्दोपस्थापकः द्वितीयस्तु प्रकारप्रदर्शकः तस्मै कस्मै तत्राह य इति यः कार्यकारणयोर्जनप्रकृत्योरीशः स्वामी अधिष्ठाता तथा परमात्मा निरुपाधिचैतन्य स्वाहेत्यनेन प्रकारेणास्योपासकस्याच्युतैकताऽच्युतेन सहाभिन्नता भवति ॥ १७ ॥

प्रकारान्तरेणार्थमाह—

अथ वेति ।

अथ वा गोपीजन इति
समस्तजगदवनशक्तिसमुदायः ।
तस्य स्वानन्यस्य
स्वामी वल्लभ इति ह निर्दिष्टः ॥ १८ ॥

अथ वा गोपीजन इतिशब्देन सकलविश्वरक्षणशक्तिसमुदायः कथ्यते तत्र गोपीपदेन शक्तिरुच्यते जनपदेन तस्याः समूहः तस्य शक्तिसमूहस्य स्वानन्यस्य स्वाभिन्नस्य शक्तिशक्तिमतोरभेदविवक्षया स्वामी नियन्ता आश्रयो वल्लभ इति हस्य स्फुटं निर्दिष्टउदितइत्यर्थः, स्वाहाशब्दार्थस्तु पूर्वोक्त एव बोद्धव्यः । लघुदीपिकाकारस्तु अवनशक्तिसमुदायः अवनं स्थितिः तत्र कारणभूतानां शक्तीनां समुदायः समूहः जगत्पालिन्यादिगणः उक्तं च महद्भिः जगत्पालिनीत्याद्याः प्रोक्तास्ताः स्थितये कला इति तस्य स्वामी नायकइत्यर्थः ॥ १८ ॥

प्रकारान्तरेणार्थमाह—

अथ वेति ।

अथ वा व्रजयुवतीनां-
दयिताय जुहोमि मां मदीयमपि ।

इत्यर्पयेत्समस्तं-

ब्रह्मणि सगुणे समस्तसंपत्त्यै ॥ १९ ॥

गोपीजनो गोपाङ्गनाजनस्तस्य वल्लभो निरतिशयप्रेमविषयः तस्मै व्रजयुवतीनां गोपरमणीनां दयिताय हृदयानन्ददायिने स्वाहा जुहोमि किं मां स्वात्मानं मदीयमपि आत्मीयसुहृदादिकमपि इत्यनेन प्रकारेण सगुणे ब्रह्मणि संसारप्रवर्तके परमेश्वरेश्वरे सर्वं समर्पयेत् किमर्थं समस्तसंपत्त्यै सर्वैश्वर्याय ॥ १९ ॥

अष्टादशाक्षरमन्त्रोद्धाराय तदन्तर्भूतौ कृष्णगोविन्दशब्दौ प्रथमतो विविच्य दर्शयति—

कृष्शब्दइति ।

कृष्शब्दः सत्ताऽर्थो णश्चानन्दात्मकस्ततः कृष्णः ।
भक्ताघकर्षणादपि तद्वर्णत्वाच्च मन्त्रमयवपुषः ॥ २० ॥

गोशब्दवाचकत्वाज्
ज्ञानं तेनोपलभ्यते गोविन्दः ।
वेत्तीति शब्दराशिं-
गोविन्दो गोविचारणादपि च ॥ २१ ॥

कृष्शब्दः सत्ताऽर्थः तत्र शाकः, कृष् सत्तायामित्यत्र क्विबन्तः सत्तावाचक इति कश्चित्, कृद् णश्च णकारश्च आनन्दात्मक आनन्दवाची, नन्द आनन्द इति धातोरेकदेशग्रहणादिति कश्चित्, ततो द्वन्द्वे कृतेऽर्शआद्यचि कृते च कृष्णः सदानन्द इत्यर्थः। प्रकारान्तरेण कृष्णशब्दं व्युत्पादयति भक्तेति भक्तानामघकर्षणात् पापपरिमार्जनात् कृष्णइत्यर्थः, भक्तादिकर्षणादिति पाठे आदिशब्देनाभक्तग्रहणं भक्तस्य कर्षणं स्वस्थाननयनम् अभक्तस्य कर्षणं नरकनयनमित्यर्थः। प्रकारान्तरेण व्युत्पत्तिमाह तद्वर्णेति कृष्णवर्णशरीरत्वात् कृष्णः मन्त्रमयशरीरस्य वाच्यवाचकयोरभेदेन विवक्षया। गोइत्यादि—गौर्ज्ञानं गोशब्दस्य वाचकत्वात् ज्ञानवाचकत्वात् तेन ज्ञानेनोपलभ्यते प्राप्यते ज्ञायते इति गोविन्दः, विद्लृ लाभे इत्यस्य धातोः, प्रकारान्तरमाह

वेत्तीति गोशब्दः शब्दवाची विद् ज्ञाने धातुः, गां शब्दराशिं शब्दसमुदायं मातृकां वेत्तीति गोविन्दः। प्रकारान्तरमाह—गोविचारणाद्वपि चेति, गोशब्दो गोशब्दवाचक एव विद् विचारणे धातुः गोविचारणाद् गोशब्दविचारणाद् गोविन्दः, अथ वा गाव इन्द्रियाणि तेषां विचारणाद् विशेषेषु प्रतिनियतविषयेषु प्रवर्तनाद्गोविन्दः, अथ वा गावः पशुविशेषा इति तथा च श्रुतिः"पशवो द्विपादश्चतुष्पादश्चे" ति तेषां विशेषेषु पुण्यपापेषु चारणात् प्रवर्त्तनाद् गोविन्दः अथ वा गावः पशुविशेषाः तेषां रक्षणाद् गोविन्दः,अपि शब्दः चार्थे॥२०॥२१॥

इदानीं मन्त्रमुद्धरति—

एते अभिख्ये अनुक्रमत-
स्तुर्यविभक्त्या मन्त्रात् पूर्वं मन्मथबीजादथ पश्चात्।
स्यातां चेदष्टादशार्णो-
मनुर्यो गुह्याद्गुह्यो वाञ्छितचिन्तामणिरेषः॥२२॥

एते अभिख्ये नामनी कृष्णगोविन्दाख्ये अनुक्रमेण तुर्यविभक्त्या प्रत्येकं चतुर्थीविभक्त्या सह मन्त्रात् पूर्वोक्तदशाक्षरगोपालमन्त्राद् आदौ मन्मथबीजात् पश्चात् कामबीजानन्तरम् अथ चेद् यदि स्यातां भवतः तदा एषोऽष्टादशार्णो मन्त्रश्रेष्ठो भवति एतस्य बलादेव दशाक्षरेऽपि कामबीजसाहित्यं केचिदिच्छन्ति, कीदृशः गुह्याद् गुह्यः गुह्यादपि गुह्यः पुनः कीदृशः वाञ्छितस्य चिन्तामात्रेणाभीष्टप्रदइत्यर्थः॥ २२ ॥

ऋष्यादिकमप्याह—

पूर्वेति।

पूर्वप्रदिष्टे मुनिदेवतेऽस्य
छन्दस्तु गायत्रमुशन्ति सन्तः।
अङ्गानि मन्त्रार्णचतुश्चतुष्कै-
र्मर्मावसानानि युगार्णमस्त्रम्॥ २३ ॥

अस्य मन्त्रस्य पूर्वप्रदिष्टे प्रथममन्त्रसंबन्धितया कथिते मुनिदेवते

बीजद्वये पुनः सन्तो गायत्रं छन्द उशान्ति, भवन्ति अङ्गानीति मन्त्रार्ण-चतुश्चतुष्कैः मन्त्रसंबन्धिवर्णानां चतुर्भिश्चतुर्भिरक्षरैः कृत्वा षोडशाक्षरैर्नमोवसानानि कवचान्तानि चत्वार्य्यङ्गानि भवन्ति अवशिष्टं-युगार्णं वर्णद्वयस्य अस्त्राख्यमङ्गं भवति प्रयोगश्च क्लीं कृष्णाय हृदयाय नमः, गोविन्दाय शिरसे स्वाहा, गोपीजन शिखायै वषट्, वल्लभाय कवचाय हुं, स्वाहा अस्त्राय फट् ॥ २३ ॥

बीजादिकमाह—

बीजमिति ।

बीजं शक्तिः प्रकृति-
र्विनियोगश्चापि पूर्ववदमुष्य ।
पूर्वतरस्य मनोरथ
कथयामि न्यासमखिलसिद्धिकरम् ॥ २४ ॥

अमुष्यास्य मन्त्रस्य बीजं शक्तिः प्रकृतिर्विनियोगः पूर्वमन्त्रे यानि बीजादीनि कथितानि तान्यत्रापि ज्ञातव्यानीत्यर्थः, पूर्वतरस्येति अथानन्तरं पूर्वतरस्य मनोर्दशाक्षरगोपालमन्त्रस्याखिलसिद्धिकरं-समस्तसिद्धिदायकं न्यासं कथयामीति प्रतिज्ञा ॥ २४ ॥

अधुना न्यासक्रमं दशार्णस्य कथयति—

व्यापय्येति ।

व्यापय्याथो हस्तयोर्मन्त्रमन्त-
र्बाह्ये पार्श्वे ताररुद्धं बुधेन ।
न्यासो वर्णैस्तारयुग्मान्तरस्थै-
र्बिन्दूत्तंसैर्हार्दहृद्यैर्विधेयः ॥ २५ ॥

अथोऽनन्तरं बुधेन पण्डितेन वर्णैर्मूलमन्त्राक्षरैर्न्यासो विधेयः कार्य्यः किं कृत्वा मूलमन्त्रं हस्तयोरन्तर्मध्ये तथा हस्तयोरेव बाह्ये पृष्ठे तथा हस्तयोरेव पार्श्वे व्यापय्य व्यापकतया विन्यस्येत्यर्थः कीदृशं मन्त्रं ताररुद्धं प्रणवपुटितं कीदृशैर्वर्णैः तारयुग्मान्तरस्थैः प्रणवद्वयमध्यगतैः पुनः कीदृशैः बिन्दूत्तंसैः बिन्दुः शिरोऽलंकारो येषां-

ते तथा सानुस्वारैरित्यर्थः पुनःकीदृशैर्हार्देहृद्यैः हार्देन नमःपदेन हृद्यैर्मनोज्ञैः सहितैरित्यर्थः प्रयोगश्च ॐगौॐ नमः दक्षाङ्गुष्ठपर्वत्रये ॐपीं ॐनमः तर्जन्याम् इत्यादि ॐ लुं ॐ नमो वामकनिष्ठिकायामित्यादि ॥ २५ ॥

उक्तवर्णन्यासस्थानमाह—

शाखास्वित्यादिना ।

शाखासु त्रीणि पर्वाण्यधि दशसु पृथग्दक्षिणाङ्गुष्ठपूर्वं-
वामाङ्गुष्ठावसानं न्यसतु विमलधीः सृष्टिरुक्ता करस्था।
अङ्गुष्ठद्वन्द्वपूर्वा स्थितिरुभयकरे संहृतिर्वामपूर्वा
दक्षाङ्गुष्ठान्तिकैतत्त्रयमपि सृजतिस्थित्युपेतंचकार्यम् २६॥

दशसु शाखासु अङ्गुलीषु पृथक्कृत्वैकं त्रीणि पर्वाणि अधि पर्वत्रयं व्याप्य, 'त्रिपाठिनस्तु त्रीणि पर्वाणि इति पर्वत्रये अधीति उपरि अङ्गुल्यग्रे च पृथग् एकैकशः तथा च प्रथमपर्वणि ॐद्वितीये ॐतृतीये ॐअङ्गुल्यग्रे नमः इति एवमन्यत्रापीत्याहुः । दक्षिणाङ्गुष्ठपूर्वं प्रथमन्यासादौ यथा स्यात्तथा वामाङ्गुष्ठावसानं वामाङ्गुष्ठोऽवसाने न्यासान्ते यथा स्यादेवं विशदधीर्विमलबुद्धिर्न्यसतु एवं च करस्था सृष्टिरुक्ता करे सृष्टिन्यासप्रकार उक्त इत्यर्थः, अङ्गुष्ठद्वन्द्वपूर्वा स्थितिरुभयकरे हस्तद्वये, दक्षिणकरेऽङ्गुष्ठादिकानिष्ठासु विन्यस्य वामकरेऽप्यङ्गुष्ठादिकानिष्ठास्वङ्गुलिषु न्यसेदयंस्थितिन्यास उक्तः संहृतिर्वामपूर्वा दक्षेति संहृतिः संहारः वामाङ्गुष्ठपूर्वा दक्षिणाङ्गुष्ठावसाना अयं च संहारन्यासउक्तः एतत्त्रयमपि सृष्टिस्थितिसंहारात्मकं त्रयमपि सृजतिस्थित्युपेतं कार्यंएतन्न्यासकरणानन्तरमपि पुनरपरं सृष्टिस्थितिन्यासद्वयं कार्यं च सृष्ट्यादिन्यासपञ्चकं कार्यमित्यर्थः ॥ २६ ॥

ततः स्थितिक्रमाद् बुधो दशाङ्गकानि विन्यसेत् ।
तदङ्गपञ्चकं तथा विधिः समीरितः करे ॥ २७ ॥

तत इति । ततस्तदनन्तरं स्थितिक्रमात् स्थितिन्यासक्रमेण दश-

स्वङ्गुलीषु बुधः पण्डितः दशाङ्कानि पूर्वोक्तमन्त्रदशाङ्गानि विन्यसेत् तदङ्गपञ्चकं तथेति तथा तेन प्रकारेण स्थितिक्रमेण तदङ्गपञ्चकं पूर्वोक्तपञ्चकं पूर्वोक्ताङ्गपञ्चकं दशसु अङ्गुलीषु विन्यसेत् करन्यासजातमुपसंहरति विधिरिति एवं चायं विधिः प्रकारः करे हस्तद्वये समीरितः कथित इत्यर्थः ॥ २७ ॥

मातृकान्यासविशेषं दर्शयन् तत्त्वन्यासं च क्रमेणाह—

पुटितैरिति ।

पुटितैर्मनुनाऽथ मातृकार्णै-
रभिविन्यस्य सबिन्दुभिः पुरोवत् ।
अनुसंहृतिसृष्टिमार्गभेदा-
द्दशतत्त्वानि च मन्त्रवर्णभाञ्जि ॥ २८ ॥

अथानन्तरमनुना दशार्णेन पुटितैर्मातृकाक्षरैः सबिन्दुभिः सानुस्वारैः पुरोवत् पूर्ववद्यथा पूर्वे ललाटादिषु न्यास एवमभिविन्यस्य अनु पश्चान्मातृकान्यासविशेषकरणानन्तरं वक्ष्यमाणानि दशतत्त्वानि विन्यसेत् कीदृशानि मन्त्रवर्णभाञ्जि मन्त्राक्षरयुक्तानि कथं दशतत्त्वानि विन्यसेत्तत्राह संहृतिसृष्टिमार्गभेदात् प्रथमं संहारक्रमेण तदनन्तरं सृष्टिक्रमेणेत्यर्थः ॥ २८ ॥

संहारसृष्टिप्रकारं दर्शयति—

संहृताविति ।

संहृतावनुगतो मनुवर्यः
सृष्टिवर्त्मनि भवेत्प्रतियातः ।
उद्धृतिः खलु पुरोक्तवदेषां
न्यासकर्म कथयाम्यधुनाऽहम् ॥ २९ ॥

असौ मनुवर्यः मनुश्रेष्ठः संहृतौ संहारन्यासे अनुगतो यथैवास्ति तथैव सृष्टिमार्गे सृष्टिकरन्यासे प्रतियातो भवेत् तद्विपरीतो भवेत्, उद्धारप्रकारमाह उद्धृतिरिति एषां तत्त्वानां खलु·

मिश्रयेन ॐवृघृणिरङ्कारः पूर्वोक्तवद् यथा पूर्वमुक्ततत्त्वन्यासे "नत्युपे-तं भूयः पराय च तदाह्वयमात्मने च नत्यन्तमुद्धरतु तत्त्वमनून् क्रमे-ण"इत्येवंप्रकारेणेत्यर्थः, अधुना न्यासं कथयामीति सांप्रतं न्याससंब-न्धितत्त्वनामकथनं तत्स्थानकथनं च करोमीत्यर्थः ॥ २९ ॥

तत्त्वनामान्याह—

महीति ।

महीसलिलपावकानिलवियन्ति गर्वो महान्
पुनः प्रकृतिपूरुषौ पर इमानि तत्त्वान्यथ ।
पदान्धुहृदयास्यकान्यधि तु पञ्च मध्ये द्वयं-
त्रयं सकलगं ततो न्यसतु तद्विपर्यासतः ॥ ३० ॥

मही पृथिवी, सलिलं जलं, पावकः तेजः, अनिलो वायु,वि-यत्त्वाकाशः, गर्वोऽहङ्कारः, महान् महत्तत्त्वं, प्रकृतिः, पुरुषः, परश्च इमा-नि पृथिव्यादीनि तत्त्वानि तत्त्वपदवाच्यानि, न्यासस्थानमाह-अ-थेति, अथानन्तरं पञ्च तत्त्वानि पृथिव्यादीनि न्यसतु कुत्र पदान्धु-हृदयास्यकान्यधि, पादयोः, अन्धौ लिङ्गे, हृदये, आस्ये मुखे, के शि-रसि, अधि सप्तम्यर्थे मध्ये हृदये तत्त्वद्वयं, त्रयं सकलगं, सकलाङ्ग-व्यापकं ततस्तदनन्तरं तद्विपर्यासतः उक्तसंहारविपरीतरीत्या न्य-सतु प्रयोगश्च ओङ्कां नमः पराय पृथिव्यात्मने नमः इति पादद्वये इत्यारभ्य ओं हां नमः पराय परमात्मने नमः इत्यन्तः संहारः, ॐ हां नमः पराय परमात्मने नमः इत्यारभ्य ॐ गों नमः पराय पृथिव्यात्मने नमः पादद्वये इति सृष्टिन्यासः । सृष्टिन्यासे त्रयं सर्व-शरीरे, महदहङ्कारौ हृदि, आकाशः शिरसि, वाय्वग्निसलिलमह्यः मुखहृदयलिङ्गपादद्वयेषु, ज्ञेयाः । के चित्तु तत्त्वपदान्तर्भावेण न्यास-मिच्छन्ति तच्चिन्त्यम् ॥ ३० ॥

गुप्ततमोऽयं न्यासः
संप्रोक्तस्तत्त्वदशकपरिक्लृप्तः ।
कार्योऽन्येष्वपि सद्भि-
र्गोपालमनुषु झटिति फलसिद्ध्यै ॥ ३१ ॥

गुप्ततमोऽयमिति । अयं प्रोक्तः कथितो न्यासः सद्भिः पण्डितैः

अन्येष्वपि गोपालमन्त्रेषु उद्धृतदशाक्षरव्यतिरिक्तेष्वपि कार्य्यः कीदृशः गुह्यतमः अतिशयेन गुप्तः पुनः कीदृशः तत्त्वदशकपरिक्लृप्तः तत्त्वानां दशकं तत्त्वदशकं तेन परिक्लृप्तः उद्घाटित इत्यर्थः किमर्थं झटिति फलसिद्ध्यै शीघ्रफलप्राप्त्यै ॥ ३१ ॥

न्यासान्तरमाह—

आकेशादिति।

आकेशादापादन्दोर्भ्यां
ध्रुवपुटितमथ मनुवरं न्यसेद्वपुषि।
त्रिशो मूर्द्धन्यक्ष्णोः श्रुत्योर्घ्राणे
मुखहृदयजठरशिवजानुपत्सु तथाऽक्षराणि ॥३२॥

अथानन्तरं दोर्भ्यां हस्ताभ्यां ध्रुवपुटितं प्रणवपुटितं मनुवरं मन्त्रश्रेष्ठं दशाक्षरं गोपालमन्त्रम् आकेशादापादं केशादिपादपर्यन्तं त्रिशः त्रिवारं वपुषि देहे न्यसेत्, पादादारभ्य केशपर्यन्तं त्रिशः स्वदेहे विन्यसेदिति विद्याधराचार्यत्रिपाठिप्रभृतयः एतेषां मत आकेशादापादादिति पाठः। अधुना सृष्टिस्थितिसंहारक्रमेण मन्त्राक्षरन्यासमाह-मूर्द्धनीत्यादि—तथा दशाक्षराणि प्रणवपुटितानि मूर्द्धादिवक्ष्यमाणस्थानेषु विन्यसेत् न्यासस्थानान्याह-मूर्द्धनीति मूर्ध्नि चक्षुषोः उभयनेत्रे एकमेवाक्षरं श्रुतयोः कर्णयोः अत्राप्येकमेव घ्राणे नासायुग्मे तत्राप्येकमेव मुखं, हृदयं, जठरं, शिवं लिङ्गं, जानुद्वये एकम्, पादद्वये एकम्, एतेषु दशसु स्थानेषु दशाक्षराणि विन्यसेदित्यर्थः ॥ ३२ ॥

उक्ता सृष्टिः शिष्टैरेषा स्थितिरपि
मुनिभिरभिहिता हृदादिमुखान्तिका।
संहारोऽङ्घ्र्यादिमूर्द्धान्तस्त्रितयमिति-
विरचयेच्च सृष्टिमनु स्थितिम् ॥ ३३ ॥

शिष्टैः आगमज्ञैः एषा सृष्टिरुक्तेत्यर्थः, स्थितिरपि स्थितिन्या-

सोऽपि मुनिभिर्नारदादिभिर्हृदयादिमुखान्तिका अभिहिता हृदयमारभ्य मुखपर्यन्तं कथिता, तत्र क्रमः हृदयजठरलिङ्गजानुपादमूर्द्धाक्षिश्रवणघ्राणमुखानीति संहारोऽङ्गुल्यादिमूर्द्धान्तः कार्यः तत्र मन्त्राक्षराणि प्रतिलोमेन देयानीतीदन्त्रितयं विरचयतु अनु पश्चादेतत्त्रितयकरणानन्तरं पुनः सृष्टिं स्थितिं च विरचयतु तथा च पञ्च न्यासाः कार्य्या इत्यर्थः, प्रयोगस्तु गों नमः पीं नमः इत्यादि ॥ ३३ ॥

येषामाश्रमिणां यदन्तो न्यासस्तद्दर्शयति—

न्यास इति।

न्यासः संहारान्तो मस्करिवैखानसेषु विहितोऽयम्।
स्थित्यन्तो गृहमेधिषु सृष्ट्यन्तो वर्णिनामिति प्राहुः॥३४॥

अयं न्यासः मस्करिवैखानसेषु संहारान्तो विहितः मस्करी संन्यासी, वैखानसो वानप्रस्थः, तथा ताभ्यां न्यासत्रयंकार्यमित्यर्थः। गृहमेधिषु गृहस्थेषु अयं न्यासः स्थित्यन्तो विहितः तथा गृहस्थैः पञ्च न्यासाः कार्य्या इत्यर्थः। वर्णिनां ब्रह्मचारिणामयंन्यासः सृष्ट्यन्तो विहितः तथा च ब्रह्मचारिभिर्न्यासचतुष्टयंकार्यमित्यर्थः इति पूर्वोक्तमर्थजातं प्राहुः प्राचीना आगमज्ञा इति शेषः ॥ ३४ ॥

वैराग्येति।

वैराग्ययुजि गृहस्थे संहारं केचिदाहुराचार्य्याः।
सहजानौ वनवासिनि स्थितिं च विद्यार्थिनां सृष्टिम्॥३५॥

केचिदाचार्याः वैराग्ययुक्तगृहस्थे संहारान्तं न्यासमाहुः, किंच सहजानौ वनवासिनि सपत्नीके वानप्रस्थे स्थितिं स्थित्यन्तंन्यासमाहुः, तथा ब्रह्मचारिभिन्नानां विद्यार्थिनामपि सृष्टिं सृष्ट्यन्तंन्यासमाहुरित्यर्थः ॥ ३५ ॥

उक्ताक्षरन्यासाङ्गुलिनियमं दर्शयति—

शिरसीत्यादिना।

शिरसि विहिता मध्या सैवाक्ष्णि तर्जनिकाऽन्विता
श्रवसि रहिताङ्गुष्ठा ज्येष्ठाऽन्वितोपकनिष्ठिका।

नसि च वदने सर्वाः सज्यायसी हृदि तर्जनी
प्रथमजयुता मध्या नाभौ श्रवोविहिता शिवे॥३६॥
ताएवाङ्गुलयो जान्वोः साङ्गुष्ठास्तु पदद्वये
स्थानार्णयोर्विनिमयो भवेन्नास्त्यङ्गुलिस्थानयोः॥३७॥

मध्या मध्यमाङ्गुलिः शिरसि मूर्ध्नि विहिता न्यासकरणत्वेन तथा च मध्यमाङ्गुल्या न्यासः शिरसि कार्य इत्यर्थः, सैव मध्या तर्जनिकाऽन्विताऽक्षिणि नयनयुगले विहिता तथा च मध्यमातर्जनीभ्यामक्ष्णोर्न्यासः कार्यः, श्रवसि श्रोत्रयुगले रहिताङ्गुष्ठा अङ्गुष्ठरहिता सर्वाङ्गुलयो विहिताः, नसि नासायुगले ज्येष्ठाऽन्विता अङ्गुष्ठयुक्ता उपकनिष्ठिका अनामिका विहिता, वदने सर्वाङ्गुलयो विहिताः, हृदि सज्यायसी ज्येष्ठासहिता साङ्गुष्ठतर्जनी विहिता, नाभौ जठरे नाभिपदेन जठरमुपलक्षितमिति विद्याधरः। नाभिपदस्य मुख्य एवार्थ इति लघुदीपिकाप्रभृतयः। प्रथमजयुता अङ्गुष्ठयुक्ता मध्यमा विहिता, शिवे लिङ्गे तथा विहिता यथा जठरे साङ्गुष्ठा मध्या तथेत्यर्थ इति केचित्। श्रवोविहिता शिव इति पाठे श्रोत्रयुगले या अङ्गुष्ठरहितास्ताः शिवे विहिता इत्यर्थः, जान्वोस्ता एवाङ्गुलयःअङ्गुष्ठेन रहिताः सर्वाङ्गुलय इत्यर्थः, पदद्वये साङ्गुष्ठाः सर्वाङ्गुलयो विहिताः। स्थानार्णयोरित्यादिना स्थानाक्षरयोर्विनिमयो विपर्ययो भवति यथा गौं सृष्टौ मूर्ध्नि, स्थितौ हृदये, संहृतौ पादयोर्न्यास इति एवमङ्गुलीस्थानयोर्विपर्ययो नास्ति, किं तु सृष्टौ स्थितौ संहृतौ वा यत्र स्थाने याऽङ्गुलिर्विहिता तयैवाङ्गुल्या तत्र स्थाने न्यासः कार्य इत्यर्थः॥३६॥३७॥

इदानीं विभूतिपञ्जरन्यासमाह—

वक्ष्मीति।

वक्ष्यपरं न्यासवरं-
भूत्यभिधं भूतिकरम्।
मन्त्रदशावृत्तिमयं-
गुप्ततमं मन्त्रिवरैः॥ ३८॥

अपरं भूत्यभिधं भूतिरिति नाम यस्य तं भूतिनामकं वक्ष्मि कथ-

यामि कीदृशं न्यासवरं न्यासश्रेष्ठमित्यर्थः पुनः भूतिकरम् ऐश्वर्य्यकरं पुनः मन्त्रदशावृत्तिमयं मन्त्रस्य दशावरणघटितं पुनः मन्त्रिवरैः साधकश्रेष्ठैर्गुप्ततममतिगुह्यम् ॥ ३८ ॥

न्यासस्थानमाह—

आधारेत्यादिना ।

आधारध्वजनाभिहृद्गलमुखांसोरुद्वये कन्धरा-
नाभ्योः कुक्षिहृदोरुरोजयुगले पार्श्वापरश्रोणिषु ।
कास्याक्षिश्रुतिनःकपोलकरपत्सन्ध्यग्रशाखासु के
तत्प्राच्यादिदिशासु मूर्ध्नि सकले दोष्णोश्च सक्थो-
स्तथा ॥ ३९ ॥

शिरोऽक्ष्यास्यकण्ठाख्यहृत्तुन्दकन्दा-
न्धुजानुप्रपत्स्वत्थमर्णान्मनूत्थान् ।
न्यसेच्छ्रोत्रगण्डांसवक्षोजपार्श्व-
स्फिगूरुस्थलीजानुजङ्घाङ्घ्रियुग्मे ॥ ४० ॥

आधारो वृषणस्याधस्त्रिकोणं मूलाधारस्थानं, ध्वजो लिङ्गं, नाभिः, हृदयं, गलः, मुखम्, अंसोरुद्वयम्, एतेष्वेकावृत्तिः कन्धरा घाटा, कंधरा कण्ठ इति लघुदीपिकाकारः, नाभिकुक्षिहृदयम् उरोजयुगलं स्तनद्वयं, पार्श्वेति पार्श्वयुगम्, अपरं पृष्ठदेशः, श्रोणिर्जघनदेशः, श्रोणिः कटिः, अपरं श्रोण्याः अपरभाग, इति त्रिपाठिनः, एतेषु द्वितीयावृत्तिः कं शिरः, आस्यं मुखम्, अक्षिणी नेत्रयुगलं, श्रुती श्रवणद्वयं, नः इति नासिकाद्वयम्, कपोलद्वयमेतेषु तृतीयावृत्तिः, करपदेति करपदयोः प्रत्येकं सन्धिचतुष्टयं सन्धिष्वङ्गुल्यग्रेषु अङ्गुलीषु च, अत्र दक्षिणकरे चतुर्थावृत्तिः, एवं वामकरे पञ्चमावृत्तिः, इति पक्षद्वयं च, विद्याधरस्तु करयोरेकावृत्तिः पादयोरेकावृत्तिरित्याह, तच्चिन्त्यं, मूलग्रन्थात्तथाऽप्रतीतेः, पादयोः सन्धिष्वङ्गुल्यग्रेष्वङ्गुलीषु च, अत्रापि दक्षिणपादे षष्ठावृत्तिः, वामपादे सप्तमावृत्तिः, अत एव हस्तपादयोर्न्यासचतुष्टयमिति त्रिपाठिनः, के मस्तकमध्ये तत्प्राच्यादिदिशासु मस्तकपूर्वादिचतुर्दिक्षु सकले मूर्ध्नि सकले मस्तके प्रादक्षिण्येन व्यापकतया दोष्णो-

श्च बाहुयुगे तथा सक्थ्नोरूरुमूलस्याधिष्ठानयोर्मध्यप्रदेशयोः एतेष्व-ष्टमावृत्तिः, मस्तकस्य पूर्वादिदिशास्वेकावृत्तिः,एकावृत्तिर्मूर्द्धादिष्वि-ति विद्याधराचार्य्याः, तच्चिन्त्यं, तथापदस्वरसात् शिरःप्रभृतिष्वे-कावृत्तिप्रतीतेः। शिरो मस्तकम्, अक्षीति नेत्रयुगलम्, आस्यं मुखं, क-ण्ठं, हृदयं, तुन्दमुदरं, कन्दो मूलाधारः, स्वाधिष्ठानमिति त्रिपाठिनः, अन्धु लिङ्गं, जानु, प्रपदिति पादयुगलं तेषु, एतेषु नवमावृत्तिः श्रोत्र-युगले गण्डयुगले, अंसयुगले, स्तनयुगले, पार्श्वयुगले, स्फिग्युगले नितम्बयुगले, एवमूरुजानुजङ्घाऽङ्घ्रियुगले, एतेषु दशमावृत्तिः इत्थ-मनेन प्रकारेण मनूत्थान् मन्त्रसम्बन्धिनो वर्णान् न्यसेत्, प्रयोगश्च गों नमः मूलाधारे, पीं नमः लिङ्गे, जं नमः नाभौ, इत्यादि ॥३९॥४०॥

न्यासफलमाह—

इतीति ।

इति कथितं विभूतिपञ्जरं सकलसुखार्थधर्ममोक्षदम् ।
नरतरुणीमनोऽनुरञ्जनं हरिचरणाब्जभक्तिवर्द्धनम्॥४१।

अनेन प्रकारेण विभूतिपञ्जरं कथितं कीदृशं सकलसुखार्थधर्म-मोक्षदं पुरुषार्थचतुष्टयप्रदं पुनः नरतरुणीमनोरञ्जनं पुरुषनारीचित्ता-ह्लादकं न केवलं सर्वानुरञ्जनम्, अपि तु हरिचरणाब्जे भक्तिवर्द्ध-नम् ॥ ४१ ॥

मूर्त्तिपञ्जरन्यासमाह—

स्फूर्त्तय इति ।

स्फूर्त्तयेऽथास्य मन्त्रस्य कीर्त्यते मूर्त्तिपञ्जरम् ।
आर्त्तिग्रहविषारिघ्नं कीर्त्तिश्रीकान्तिपुष्टिदम् ॥ ४२ ॥

अथानन्तरम् अस्य दशाक्षरमन्त्रस्य स्फूर्त्तये उद्दीपनाय मूर्त्तिपञ्ज-रं कीर्त्यते किम्भूतम् आर्त्तिः पीडा, ग्रहो ग्रहजनितमशुभं, विषं स्थावरं जङ्गमं च, अरिः शत्रुः, तान् हन्तीत्यर्थः पुनः कीदृशङ्कीर्त्त्या-दिदं कीर्तिः प्रख्यातिः, श्रीः सम्पत्तिः, सौन्दर्यं, पुष्टिं, बलं प्रददाती-ति तथा ॥ ४२ ॥

अधुना न्यासमुद्धरति—

केशवादीति ।

केशवादियुगषट्कमूर्त्तिभि-
र्धातृपूर्वमिहिरान्नमोऽन्तकान् ।
द्वादशाक्षरभवाक्षरैः स्वरैः
क्लीबवर्णरहितैः क्रमान्न्यसेत् ॥ ४३ ॥

केशवादिभिः पूर्वोक्तयुगषट्कमूर्त्तिभिः सह धातृपूर्वमिहिरान् धाता पूर्वे आदौ येषु मिहिरेषु आदित्येषु वक्ष्यमाणेषु ते धातृपूर्वमिहिरास्तान् क्रमेण न्यसतु कीदृशान् नमोऽन्तकान् नमःपदान्तान् पुनः कैः सह द्वादशाक्षरभवाक्षरैर्वक्ष्यमाणद्वादशाक्षरमन्त्रसम्बन्धिभिर्द्वादशाक्षरैः सह, तथा क्लीबवर्णरहितैः ऋॠऌॡतत्रयरहितैः स्वरैरकारादिभिः सह, एतदुक्तं भवति आदौ स्वराः ततो द्वादशाक्षरभवाक्षराणि ततः केशवादिमूर्त्तयः ततः धातृप्रभृतयः ततो नमःपदमिति, प्रयोगस्तु ॐ अं ॐ केशवधातृभ्यां नमः, ॐ अं ॐ केशवधात्रे नम इति त्रिपाठिनः ॥ ४३ ॥

अथ मूर्त्तिपञ्जरन्यासे न्यासस्थानमाह—

भालोदरेति ।

भालोदरहृद्गलकूपतले वामेतरपार्श्वभुजान्तगले ।
वामत्रयपृष्ठककुत्सु तथा मूर्द्धन्यनु षड्युगवर्णमनुम् ॥ ४४ ॥

भाले ललाटे, उदरे हृदये, गलकूपतले कण्ठे, वामेतरेति वामादितरद् दक्षिणं दक्षिणपार्श्वे भुजान्ते गले चेति, वामत्रये वामपार्श्वे वामभुजान्ते गले च, पृष्ठे ककुदि, अथानन्तरम्, अन्विति पाठेऽप्ययमेव बोद्धव्यः तथा तेन प्रकारेण मूर्ध्नि षड्युगवर्णमनुं द्वादशाक्षरमन्त्रं न्यसेदित्यर्थः ॥ ४४ ॥

मस्तके सम्पूर्णमन्त्रन्यासस्य प्रयोजनमाह—

चैतन्येति ।

चैतन्यामृतवपुरर्ककोटितेजा-
मूर्द्धस्थो वपुरखिलं सवासुदेवः ।

मन्त्रं व्यापय्य व्यापकतया विन्यस्य पुनः प्रणवं सकृदेकवारं विन्यस्य अनन्तरं मनुजलिपयो न्यास्या मन्त्राक्षराणि न्यसतु भूयोऽनन्तरं सादरं यथा स्यादेवं पदानि पञ्च पदानि न्यास्यानि ॥ ४९ ॥

मन्त्राक्षरन्यासस्थानमाह—

कचभुवीति ।

कचभुवि ललाटे भ्रूयुग्मान्तरे श्रवणाक्षिणो-
र्युगलवदनग्रीवाहृन्नाभिकट्युभयान्धुषु ।
न्यसतु शितधीर्जान्वङ्घ्र्योरक्षरान् शिरसि ध्रुवं-
नयनमुखहृद्गुह्याङ्घ्रिष्वर्पयेत् पदपञ्चकम् ॥ ५० ॥

कचस्य केशस्य भूरुत्पत्तिस्थानं शिरः तत्र, ललाटे, भ्रूयुग्मान्तरे भ्रूमध्ये, श्रवणाक्ष्णोर्युगले, नो नासिकायुगले च, वदने, ग्रीवायां, हृदि, नाभौ, कट्युभये, वामकटिर्दक्षिणकटिश्च, अन्धौ लिङ्गे, एतेषु तथा जान्वङ्घ्र्योश्च शितधिर्निर्मलमतिः अक्षराणि मन्त्रसम्बन्धीनि न्यसतु अत्र जान्वोरेकमक्षरं न्यसेत्, अङ्घ्र्योरेकमक्षरं न्यसेत्, तथा शिरसि मस्तके ध्रुवं न्यसेत्, पदपञ्चकन्यासस्थानान्याह- नयनेति, नयनयुगलं मुखं हृदयं गुह्यमङ्घ्रिश्च एतेषु मन्त्रसम्बन्धि पदपञ्चकं क्लीमित्येकम्, अन्यानि स्पष्टानि अर्पयेत् न्यसेत् ॥ ५० ॥

पञ्चाङ्गानीति ।

पञ्चाङ्गानि न्यस्येद् भूयो-
मुन्यादीनप्यन्यत्सर्वम् ।
तुल्यं पूर्वेणाथो वक्ष्ये
मुद्रा बन्ध्या मन्त्रोर्याः स्युः ॥ ५१ ॥

पञ्चाङ्गानि भूयः पुनरपि शरीरे न्यसेत्, तथा मुन्यादीन् ऋष्यादीन्, अन्यत्सर्वं केशवादिजातं पूर्वेण तुल्यं समानमेव, अत्र दशतत्त्वादिन्यासेषु मन्त्रस्य ध्रियाङ्गसिविशेष इति लघुदीपिकाकारः,

अथोऽनन्तरं मन्त्रोर्दशाक्षराष्टादशाक्षरयोर्या मुद्रा बन्ध्यां बन्धनीयाः स्युर्भवेयुस्ता मुद्रा वक्ष्ये कथयामि ॥ ५१ ॥

हृदयाद्यङ्गन्यासमुद्राः प्रदर्शयति—

अनङ्गुष्ठा इत्यादि ।

अनङ्गुष्ठा ऋजवो हस्तशाखा-
भवेन्मुद्रा हृदये शीर्षके च ।
अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां-
करद्वन्द्वाङ्गुलयो वर्माणि स्युः ॥ ५२ ॥
नाराचमुष्ट्युद्गतबाहुयुग्म-
काङ्गुष्ठतर्जन्युदितो ध्वनिस्तु ।
विष्वग्विषक्तः कथिताऽस्त्रमुद्रा
यत्राक्षिणी तर्जनीमध्यमे तु ॥ ५३ ॥

अनङ्गुष्ठा अङ्गुष्ठरहिता ऋजवोऽवक्रा हस्तशाखाः हस्ताङ्गुलयः हृदये मुद्रा भवेत्, शीर्षके च शिरसि ता एव मुद्रा ज्ञेयाः, खलु निश्चये अधोऽङ्गुष्ठा मुष्टिः अधोऽङ्गुष्ठो यस्यां मुष्टौ एवं कृता मुष्टिः शिखायां मुद्रा भवेद्, वर्मणि कवचे करद्वन्द्वाङ्गुलयः स्युः मुद्रापदवाच्या भवन्ति । ध्वनिः शब्दोऽस्त्रमुद्रा कथिता किंभूतो ध्वनिः नाराचवद्बाणवद् मुष्ट्योद्गतो यो बाहुस्तस्य युग्मकं द्वयं तस्याङ्गुष्ठतर्जनीभ्यां करणाभ्यामुदितः पुनः कीदृशः विष्वग् दशदिक्षु विषक्तः विस्तीर्णः यत्र मन्त्रेऽक्षिणी भवतः नेत्राङ्गमस्ति तत्र तर्जनीमध्यमे मिलिते मुद्रा ॥५२॥५३॥

वेणुमुद्रामाह—

ओष्ठ इति ।

ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ।
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ॥५४॥
तर्जनीमध्यमाऽनामाः किञ्चित्संकुच्य चालिताः ।
वेणुमुद्रेह कथिता सुगुप्ता प्रेयसी हरेः ॥ ५५ ॥

वामहस्ताङ्गुष्ठोऽधरे लग्न इति संबन्धः कार्य,स्तस्य वामह-

स्तस्य यां कनिष्ठिका पञ्चमी अङ्गुली सा दक्षिणाङ्गुष्ठसंयुक्ता दक्षिणहस्ताङ्गुष्ठे संबद्धा कार्या, तत्कनिष्ठिका दक्षिणहस्तकनिष्ठिका प्रसारिता अकुटिला कार्या उभयहस्ततर्जनीमध्यमाऽनामिकाः किंचित्संकुच्य चालिताश्चालनीया, इत्थमिह शास्त्रे वेणुमुद्रा कथिता सुगुप्ता ग्रन्थान्तरेऽत्यन्तगुप्ता यतो हरेः परमेश्वरस्य श्रीकृष्णस्य प्रेयसी वल्लभा ॥ ५४ ॥ ५५ ॥

नोच्यन्त इति ।

नोच्यन्तेऽत्र प्रसिद्धत्वा-
न्मालाश्रीवत्सकौस्तुभाः ।
उच्यतेऽच्युतमुद्राणां-
मुद्रा बिल्वफलाकृतिः ॥ ५६ ॥

मालाश्रीवत्सकौस्तुभमुद्राः प्रसिद्धत्वान्नोच्यन्ते मया ग्रन्थकर्त्राऽप्रसिद्धमिह प्रकाश्यत इति शेषः, अत एव गले वनमालाऽभिनयनं वनमालामुद्रा, उत्तानितवामतर्जनीकनिष्ठोपरि अधोमुखदक्षिणकरकनिष्ठिकातर्जनीके संयोज्य दक्षिणकरानामिकामध्यमाङ्गुलीद्वयं वामकराङ्गुष्ठोपरि कृत्वा वामकरमध्यमोपकनिष्ठिके दक्षिणहस्ताङ्गुष्ठस्याधः कुर्यादेषा श्रीवत्समुद्रा, वामकनिष्ठिकया दक्षिणकनिष्ठिकां निष्पीड्य वामानामिकया दक्षिणतर्जनीं निष्पीड्य शिष्टवामाङ्गुलीत्रयम् उपरि कृत्वा वामतर्जनीसहितदक्षिणहस्ताङ्गुलित्रयमुखमेकत्र योजयेदेषा कौस्तुभमुद्रा ॥ ५६ ॥

बिल्वमुद्रामाह—

अङ्गुष्ठमिति ।

अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्ठकेनाथ बध्वा
तस्याग्रं पीडयित्वाऽङ्गुलिभिरपि तथा वामहस्ताङ्गुलीभिः।
बध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मारबीजं-
बिल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया
विधिज्ञैः ॥ ५७ ॥

वामाङ्गुष्ठम् उद्दण्डितं दण्डाकारम् ऊर्ध्वं कृत्वाऽधः कर्तव्यं तथाऽ

ऽनन्तरम् इतरकराङ्गुष्ठेन बद्धा तस्य च पीठे दक्षिणकराङ्गुष्ठस्तिर्यक् कार्य इत्यर्थः तस्याग्रं दक्षिणकराङ्गुष्ठाग्रमङ्गुलिभिः पीडयित्वा धृत्वा ता अपि दक्षिणकराङ्गुलयोऽपि वामहस्ताङ्गुलीभिर्गाढं यथा स्यादेवं बद्धा विमलधीः शुद्धबुद्धिः हृदि हृदये स्थापयेत् मारबीजं कामबीजं व्याहरन् उच्चारयन् इत्थं विल्वाख्या एषा स्फुटं व्यक्तं यथास्यादेव मिह शास्त्रे कथिता विधिज्ञैः प्रकारज्ञैर्गोपनीया ॥ ५७ ॥

एतस्याः फलमाह—

मन इति ।

मनोवाणीदेहैर्यदिह च पुरा वाऽपि विहितं-
स्वमत्या मत्या वा तदखिलमसौ दुष्कृतिचयम् ।
इमां मुद्रां जानन् क्षपयति नरस्तं सुरगणा-
नमन्त्यस्याधीना भवति सततं सर्वजनता ॥ ५८ ॥

असौ नरः मनुष्यः इमां मुद्रां जानन् तदखिलं संपूर्णं दुष्कृति-चयं पापराशिं क्षपयति दूरीकरोति यन्मनसा वाचा देहेनाऽमत्या-ऽज्ञानेन मत्या ज्ञानेन वा दिवारात्रिविहितं दिवसे रात्रौ वा कृतं "यदिह च पुरा वापि विहित"मिति पाठे इह जन्मनि जन्मान्तरे वा विहितमित्यर्थः न केवलं पापं दूरीकरोति अपि तु सुरगणा देवा-नमन्ति तथा अस्य मुद्राकर्तुः सततं सर्वदा सर्वजनसमूहो वश्यो भवतीत्यर्थः ॥ ५८ ॥

अस्त्रमन्त्रमाह—

प्रणवेति ।

प्रणवहृदोरवसाने सचतुर्थिं सुदर्शनं तथाऽस्त्रपदं च ।
उक्त्वा फडन्तममुना कलयेन्मनुनाऽस्त्रमुद्रया दशह-
रितः ॥ ५९ ॥

प्रणव ओंकारः हृत् नमः एतयोरवसानेऽन्ते सचतुर्थिसुदर्शनं चतुर्थीविभक्तिसहितं सुदर्शनमिति पदम् एतस्यान्ते तथाऽस्त्रपदं चतुर्थ्यन्तमस्त्रपदं पुनः कीदृक् फडन्तम् फट्शब्दान्तमुक्त्वाऽमुना

मनुना अनेन मन्त्रेण अञ्जमुद्रया दश हरितः कल्पयेत् दशदिग्बन्धनं कुर्यादित्यर्थः ॥ ५९ ॥

प्राक्कृतं न्यासजातमुपसंहरन् अग्रिमपटले वक्ष्यमाणं ध्यानं सूचयति—

इतीति ।

इति विधाय समस्तविधिं जग-
ज्जनिविनाशविधानविशारदम् ।
श्रुतिविमृग्यमजं मनुविग्रहं-
स्मरतु गोपवधूजनवल्लभम् ॥ ६० ॥

इति श्रीकेशवाचार्यविरचितायां क्रमदीपिकायां
द्वितीयः पटलः ॥ २ ॥

इत्यनेन प्रकारेण समस्तविधिं पूर्वोक्तमखिलन्यासादिकं विधाय निर्वर्त्य गोपवधूजनवल्लभं कृष्णं स्मरतु चिन्तयतु कीदृशं कृष्णं जगदुत्पत्तिस्थितिविनाशकरणदक्षं पुनः कीदृशं श्रुतिविमृग्यमुपनिषद्गम्यं पुनः कीदृशं अजम् उत्पत्तिरहितम् पुनः कीदृशं मनुविग्रहं मनुशरीरमित्यर्थः ॥ ६० ॥

इति क्रमदीपिकायां द्वितीयः पटलः ॥ २ ॥

इदानीं मन्त्रद्वयसाधारणं देवताध्यानमाह—

अथेति ।

अथ प्रकटसौरभोद्गलितसन्मधूत्फुल्लस-
त्प्रसूननवपल्लवप्रकरनम्रशाखैर्द्रुमैः ।
प्रफुल्लनवमञ्जरीललितवल्लरीवेष्टितैः
स्मरेच्छिशिरितं शिवं शितमतिस्तु वृन्दावनम् ॥ १ ॥

अथानन्तरं शितमतिर्निर्मलमतिः वृन्दावनं स्मरेच्चिन्तयेत् किम्भूतं द्रुमैर्वृक्षैः शिशिरितं शीतलीकृतं द्रुमैः कीदृशैः प्रकटेति प्रकटसौरभम् । अथ च उद्गलितो माध्वीको मधु यस्मिन् तत् अथ

च उत्फुल्लं प्रफुल्लं अथ च सद्देदीप्यमानमेतादृशं प्रसूनं पुष्पं तथा नवपल्लवः अनयोर्यः प्रकरः समूहस्तेन नम्राः शाखा येषां ते तथा तैः, प्रकटसौरभाकुलितमत्तभृङ्गोल्लसत्प्रसूनेति पाठे प्रकटसौरभेणाकुलितं सर्वतो व्याप्तम् अथ च मत्तभृङ्गोल्लसन्मत्तभ्रमरेण शोभमानमेतादृशं यत्प्रसूनमित्यर्थः पुनः कीदृशैः प्रफुल्ला विकासिता या नवमञ्जरी तया ललिता मनोहरा या वल्लरी लताप्रशाखातस्यां प्रेषितं चलनं येषु तैः पुनः कीदृशं शिवं कल्याणप्रदम् ॥ १ ॥

विकाशीति—

विकासिसुमनोरसास्वदनमञ्जुलैः सञ्चर-
च्छिलीमुखमुखोद्गतैर्मुखरितान्तरं झङ्कृतैः ।
कपोतशुकसारिकापरभृतादिभिः पत्रिभि—
र्विराणितमितस्ततो भुजगशत्रुनृत्याकुलम् ॥ २ ॥

पुनःकीदृशं वृन्दावनं झङ्कृतैः शब्दविशेषैर्मुखरितान्तरं शब्दायमानाभ्यन्तरं कीदृशैः झङ्कृतैः विकाशिन्याः प्रफुल्लायाः सुमनसः पुष्पस्य यो रसः मधु तस्य यदास्वादनम् अवलेहनं तेन मञ्जुलैर्मनोहरैः पुनःकीदृशैः सञ्चरेति सञ्चरन्तो भ्रमन्तो ये शिलीमुखा भ्रमरास्तेषां मुखेभ्य उद्गतैः समुत्थितैः पुनः कीदृशं वृन्दावनं कपोतेति पारावतशुकशारिकाकोकिलप्रभृतिभिः पक्षिभिरितस्ततो विराणितं शब्दायितं पुनःकीदृशं भुजगशत्रुर्मयूरस्तस्य नृत्येनाकुलं व्याप्तम् ॥ २ ॥

कलिन्देति—

कलिन्ददुहितुश्चलल्लहरिविप्रुषां वाहिभि-
र्विनिद्रसरसीरुहोदररजश्चयोद्धूसरैः ।
प्रदीपितमनोभवव्रजविलासिनीवाससां ।
विलोलनपरैर्निषेवितमनारतं मारुतैः ॥ ३ ॥

पुनः कीदृशं मारुतैर्वायुभिः अनारतं सर्वदा निषेवितं कीदृशैर्मारुतैः कलिन्देति कलिन्ददुहितुर्यमुनायाः चलन्त्यो या लहर्य्यःतासां

या विप्रुषो जलबिन्दवः तासां वाहिभिः एतेन वायोः शैत्यमुक्तं पुनः कीदृशैः विनिद्रेति विनिद्रं प्रफुल्लं यत्सरसीरुहं पद्मं तस्य यदुदरम् अभ्यन्तरं तत्र यो रजश्चयो धूलिसमूहः तेन उद्धूसरैः एतेन सौरभ्यमुक्तं पुनःकीदृशैः प्रदीपितेति प्रदीपितोऽतिशयितो मनोभवः कामो यासां व्रजविलासिनीनाङ्गोपसुन्दरीणां तासां यानि वासांसि वस्त्राणि तेषां विलोलनपरैः चालनाशक्तैः एतेन मान्द्य-मुक्तम् ॥ ३ ॥

प्रवालेति--

प्रवालनवपल्लवं मरकतच्छदं वज्रमौ—
क्तिकप्रकरकोरकं कमलरागनानाफलम् ।
स्थविष्ठमखिलर्तुभिः सततसेवितं कामदं—
तदन्तरपि कल्पकाङ्घ्रिपमुदञ्चितं चिन्तयेत् ॥४॥

तदन्तरपि वृन्दावनमध्ये कल्पकाङ्घ्रिपमपि चिन्तयेत् कीदृशं उदञ्चितम् उच्छ्रितं पुनः कीदृशं स्थविष्ठं स्थूलतरं पुनःकीदृशं प्रवालोविद्रुमः स एव नवपल्लवः किसलयं यस्य तं पुनः कीदृशं मरकतो यो मणिविशेषः स एव छदं पत्रं यस्य तं पुनः कीदृशं वज्रं हीरकं मौक्तिकं मुक्ता-

अनयोर्यः प्रकरः समूहः स एव कोरकः पुष्पकलिका यत्र तं पुनः कीदृशं कमलरागः पद्मरागमणिः स एव नाना बहुविधं फलं यत्र तं पुनः कीदृशम् अखिलैर्ऋतुभिः षड्भिरपि ऋतुभिः सततं सेवितं सदापरिगृहीतम् एतेन सर्वपुष्पान्वितत्वं दर्शित पुनःकीदृशं कामदम् आकाङ्क्षितप्रदम् ॥ ४ ॥

सुहेमेति ।

सुहेमशिखराचलेऽप्युदितभानुवद्भास्वरा-
मधोऽस्य कनकस्थलीममृतशीकरासारिणः ।
प्रदीप्तमणिकुट्टिमां कुसुमरेणुपुञ्जोज्ज्वलां—
स्मरेत्पुनरतन्द्रितो विगतषट्तरङ्गां बुधः ॥ ५ ॥

बुधः पण्डितः अतन्द्रितः निरालस्यः आलस्यरहितः सन् अ-

स्य कल्पवृक्षस्याधस्तात् कनकस्थलीं सुवर्णमयीं भूमिं पुनः स्मरेत् चिन्तयेत् किम्भूतां सुहेमेति शोभमाना सुवर्णशृङ्गपंक्तिर्यस्य । तथा तस्मादुदयाचलादुदितभानुवत् प्रकटितसूर्यवत् भास्वरां दे- दीप्यमानां सुहेमशिखराचलेऽभ्युदितेति पाठे शोभनं हेमशृङ्गं यत्र अ- चले पर्वते तस्मिन् अपिशब्दो भिन्नक्रमः कनकस्थलीमित्यस्यानन्तरं द्रष्टव्यम् अस्य कीदृशस्य अमृतेति अमृतस्य यः शीकरः कणस्तस्या- सारो यः समूहः पतनं तच्छालि यथा स्यात्तथा तस्यामृतकणसमूह- संवर्षिणः कीदृशीं प्रदीप्तैः दीप्यमानमणिभिः पद्मरागादिभिः बद्ध- भूमिं पुनः कीदृशीं कुसुमेति कुसुमरेणुपुञ्जैरुज्ज्वलां पुनः कीदृशीं विगतेति विगता दूरीभूता षट्तरङ्गाः कामक्रोधादयः अशनायापि- पासाशोकमोहजरामृत्यवो वा यस्यास्तां ॥ ५ ॥

तद्रत्नेति ।

तद्रत्नकुट्टिमनिविष्टमहिष्ठयोग—
पीठेऽष्टपत्रमरुणं कमलं विचिन्त्य ।
उद्यद्विरोचनसरोचिरमुष्य मध्ये
सञ्चिन्तयेत्सुखनिविष्टमथो मुकुन्दम् ॥ ६ ॥

तस्याः कनकस्थल्याः यद्रत्नकुट्टिमं रत्नबद्धभूभागः तत्र निविष्टं- स्थितं महिष्ठं महद्योगपीठं तत्राष्टपत्रम् अष्टौ पत्राणि यत्र तत्तथाऽरुणं लोहितम् अत एवोद्यतादित्यसन्निभम् एवंभूतं पद्मं विचिन्त्य अथा- नन्तरम् अमुष्यारुणवर्णाष्टदलकमलस्य मध्ये मुकुन्दं कृष्णं चिन्तयेत् कीदृशं सुखनिविष्टं सुखासीनम् आविकुलकमत आरभ्य ॥ ६ ॥

सुत्रामेति—

सुत्रामरत्नदलिताञ्जनमेघपुञ्ज-
प्रत्यग्रनीलजलजन्मसमानभासम् ।
सुस्निग्धनीलघनकुञ्चितकेशजालं-
राजन्मनोज्ञशितिकण्ठशिखण्डचूडम् ॥ ७ ॥

पुनः कीदृशं सुत्रामरत्नम् इन्द्रनीलमणिः दलिताञ्जनं भिन्नाञ्जनं

भृङ्गकज्जलमिति मेघपुञ्जो मेघसमूहः प्रत्यग्रनीलजलजन्म नवीननील-पद्मम् एषां समाना भा दीप्तिर्यस्य तं पुनः कीदृशं सुस्निग्धेति सु-स्निग्धाः सुचिक्कणाः नीलाः श्यामा घना निबिडाः कुञ्चिताः कुटिलाः ये केशास्तेषां जालं समूहो यत्र तं पुनः कीदृशं लसदिति राजत् शोभमानं मनोज्ञं मनोहरं यच्छितिकण्ठशिखण्डं मयूरपिच्छं तदेव चूडायां यस्यतम् ॥ ७ ॥

रोलम्बलालितसुरद्रुमसूनकल्पि—
तोत्तंसमुत्कचनवोत्पलकर्णपूरम् ।
लोलालकस्फुरितभालतलप्रदीप्त-
गोरोचनातिलकमुज्वलचिल्लिमालम् ॥ ८ ॥

पुनः कीदृशं रोलम्बेति रोलम्बो भ्रमरस्तेन लालितं प्रीत्या से-वितं यत् सुरद्रुमप्रसूनं पारिजातपुष्पं तेन कल्पितः रचित उत्तंसः शिरोभूषणं येन स तथा तं पुनःकीदृशमुत्कचं विकसितं यन्न-वोत्पलं तदेव कर्णाभरणं यस्य स तथा तं पुनःकीदृशं लोलाश्चञ्च-लाः अलकाः केशविशेषास्तैः स्फुरितं शोभमानं यद्भालतलं ललाट-तलं तत्र प्रदीप्तं गोरोचनातिलकं यस्य स तथा तं पुनः कीदृशं उज्वलचिल्लिमालश्चञ्चलभ्रूलताकम् ॥ ८ ॥

आपूर्णेति—

आपूर्णशारदगताङ्कशशाङ्कबिम्ब-
कान्ताननं कमलपत्त्रविशालनेत्रम् ।
रत्नस्फुरन्मकरकुण्डलरश्मिदीप्त-
गण्डस्थलीमुकुरमुन्नतचारुनासम् ॥ ९ ॥

पुनः कीदृशम् आपूर्णः सम्पूर्णःशारदः शरत्सम्बन्धीगताङ्कः कल-ङ्करहितः एवम्भूतो यः शशाङ्कबिम्बश्चन्द्रमण्डलस्तद्वत् कान्तं मनोहरम् आननं मुखं यस्य तथा तं पुनःकीदृशं कमलपत्त्रवद्विशाले विस्तीर्णे नेत्रे यस्य स तथा तं पुनःकीदृशं रत्नेति रत्नैः स्फुरच्छो-भमानं यन्मकरकुण्डलं मकराकारकुण्डलं तस्य ये रश्मयः तै प्रदीप्ता शोभमाना गण्डस्थली स एव मुकुरो दर्पणो यस्य तथा तं

पुनः कीदृशं उन्नतेति उन्नता मनोहरा नासा यस्य स तथा तम् ॥९॥

सिन्दूरेति—

सिन्दूरसुन्दरतराधरमिन्दुकुन्द-
मन्दारमन्दहसितद्युतिदीपिताशम् ।
वन्यप्रबालकुसुमप्रचयावक्लृप्त-
ग्रैवेयकोज्ज्वलमनोहरकम्बुकण्ठम् ॥ १० ॥

पुनः कीदृशं सिन्दूरवन्मनोहरो अधरो यस्य स तथा तं पुनः कीदृशम् इन्दुकुन्देति इन्दुश्च कुन्दं कुन्दपुष्पं मन्दारः शुक्लमन्दारःअर्कपुष्पं वा तद्वन्मन्दहसितम् ईषद्धास्यं तस्य द्युति दीप्तिः तया दीपिता शोभिता आशा दिशो येन स तथा तं पुनः कीदृशं वन्येति वन्यं वनोद्भवं यत्प्रबालकुसुमं नवपल्लवपुष्पं तस्य यः समूहस्तेनावक्लृप्तं सम्पादितं यद् ग्रैवेयकं कण्ठाभरणं तेन उज्ज्वलो देदीप्यमानो मनोहरः कम्बुकण्ठः त्रिरेखाङ्कितः कण्ठो यस्य स तथा तम् ॥ १० ॥

मत्तेति—

मत्तभ्रमद्भ्रमरजुष्टविलम्बमानं-
सन्तानकप्रसवदामपरिष्कृतांसम् ।
हारावलीभगणराजितपीवरोरो—
व्योमस्थलीलसितकौस्तुभभानुमन्तम् ॥ ११ ॥

पुनः कीदृशं मत्ताः कृतमधुपाना भ्रमन्तश्चरन्तो ये भ्रमरास्तैः जुष्टं सेवितम् अथ च विलम्बमानम् एवंभूतं यत्सन्तानकप्रसवदाम कल्पवृक्षपुष्पदाम तेन दाम्ना परिष्कृतःस्वलंकृतो अंसो यस्य स तथातम् पुनः कीदृशं हारावल्येव भगणो नक्षत्रसमूहः तेन राजितं शोभितं पीवरं मांसलं यदुरो हृदयं तदेव व्योमस्थली आकाशभूमिः तया लसितः शोभितः कौस्तुभ एव भानुः सूर्यस्तेन युक्तम् अत्र रूपकालङ्कार एव नोपमालङ्कारः नक्षत्रगणसूर्ययोरसम्बन्धत्वात् एवं च सत्येककाले द्वयोः शोभा लभ्यत इति भावः ॥ ११ ॥

श्रीवत्सेति—

श्रीवत्सलक्षणसुलक्षितमुन्नतांस-
मा जानुपीनपरिवृत्तसुजातबाहुम् ।
आबन्धुरोदरमुदारगभीरनाभिं—
भृङ्गाङ्गनानिकरमञ्जुलरोमराजिम् ॥ १२ ॥

पुनः कीदृशं श्रीवत्ससंज्ञं यल्लक्षणं चिह्नं तेन सुलक्षितः प्रव्यक्तः तम् पुनः कीदृशम् उन्नतौ ऊर्द्ध्वौ अंसौ स्कन्धौ यस्य स तथा तं पुनः कीदृशम् आजान्विति जानुव्यापिनौ पीनौ मांसलौ परिवृत्तौ क्रमवलितौ सुजातौ दोषरहितौ बाहू यस्य स तथा तम् पु० कीदृशम् आबन्धुरोदरं निम्नोन्नतोदरम् आ ईषन्मुष्टिग्राह्यं बन्धुरं रम्यमुदरं यस्य तमितिवा पुनःकीदृशं उदारा विख्याता गम्भीरा नाभिर्यस्य स तथा तं पुनः कीदृशं भृङ्गाङ्गना भ्रमरस्त्री तस्याः यः समूहः तद्वन्मञ्जुला मनोहरारोमराजी रोमपङ्क्तिर्यस्य स तथा तं मङ्गलेति क्वचित् पाठः मङ्गला शुभदात्रीति तथा तम् ॥ १२ ॥

नानेति—

नानामणिप्रघटिताङ्गदकङ्कणोर्मि-
ग्रैवेयसारसननूपुरतुन्दबन्धम् ।
दिव्याङ्गरागपरिपिञ्जरिताङ्गयष्टि-
मापीतवस्त्रपरिवीतनितम्बबिम्बम् ॥ १३ ॥

पुनःकीदृशं नानामणिभिरिन्द्रनीलादिभिर्घटिताः सम्बद्धाः अङ्गदाः बाहुवलयाः स्तथा कङ्कणाः उर्मिर्मुद्रिका ग्रैवेयं ग्रीवालङ्कारःरसनया क्षुद्रघण्टिकया सह आसमन्तात् वर्त्तेते यौ नूपुरौ तुन्दबन्धःउदरबन्धनार्थम् सुवर्णडोरकम् एते अलङ्कारा यस्य स तथातम् पुनः कीदृशं दिव्यः परमोत्कृष्टो योऽङ्गरागः सुगन्धिचूर्णं तेन पिञ्जरिता नानावर्णा अङ्गयष्टिरङ्गलता यस्य स तथा तं पुनः कीदृशम् आपीतम् अतिशयेन पीतं यद्वस्त्रं तेन परितो वीतो वेष्टितो नितम्बबिम्बो येन स तथा तम् यद्यपि स्त्रीकट्यां नितम्बपदप्रयोगः कोशे दृश्यते तथापि तद्वन्मनोहरतया पुंस्कट्यामपि प्रयोगो न विरुद्धः ॥ १३ ॥

चारूरुजान्विति—

चारूरुजानुमनुवृत्तमनोज्ञजङ्घ-
कान्तोन्नतप्रपदनिन्दितकूर्मकान्तिम्।
माणिक्यदर्पणलसन्नखराजिराज—
द्रक्ताङ्गुलिच्छदनसुन्दरपादपद्मम्॥ १४॥

पुनः कीदृशं कान्तौ कमनीयौ उन्नतौ उच्चौ यौ प्रपदौ पादाग्रौ ताभ्यां निन्दिता तिरस्कृता कूर्मस्य कच्छपस्य कान्तिः दीप्तिर्येन स तथा तं पुनः कीदृशं माणिक्यघटितो यो दर्पणस्तद्वल्लसन्ती शोभमाना नखपाङ्क्तिः तया राजन्त्यः शोभमाना या रक्ताङ्गुलयस्ता एव च्छदनानि पत्राणि तैः सुन्दरं पादपद्मं यस्य स तथा तम्॥ १४॥

मत्स्येति—

मत्स्याङ्कुशारिदरकेतुयवाब्जवज्र-
संलक्षितारुणतराङ्घ्रितलाभिरामम्।
लावण्यसारसमुदायविनिर्मिताङ्ग-
सौन्दर्य्यनिर्जितमनोभवदेहकान्तिम्॥ १५॥

पुनः कीदृशं मत्स्यो मीनः अङ्कुशो अस्त्रविशेषः अरिश्चक्रं दरः शङ्खः केतुर्ध्वजः यवः प्रसिद्धः अब्जं पद्मं वज्रः कुलिशाकारस्त्रिकोणः एतैः सुलक्षितं सम्यक् विहितं यदरुणतराङ्घ्रितलं लोहिततरचरणतलं तेनाभिरामः सर्वजनप्रियस्तं पुनःकीदृशं लावण्यस्य सौन्दर्यस्य यः सारसमुदायः उत्कृष्टभागसमुदायः तेन विनिर्मितं घटितं यदङ्गसौन्दर्य्यं तेन निन्दिता तिरस्कृता मनोभवस्य कामदेवस्यकान्तिः शरीरशोभा येन स तथोक्तम्॥ १५॥

आस्येति।

आस्यारविन्दपरिपूरितवेणुरन्ध्र-
लोलत्कराङ्गुलिसमीरितदिव्यरागैः।

शश्वद् द्रवीकृतविकृष्टसमस्तजन्तु-
सन्तानसन्ततिमनन्तसुखाम्बुराशिम् ॥ १६ ॥

पुनः कीदृशं शश्वन्नित्यं द्रवीकृता ऽनायतीकृता विकृष्टा आकृष्टा-समस्तजन्तोः प्राणिनः सन्तानसन्ततिः सन्तानपरम्परा येन स तथा तं कैः आस्यमेवारविन्दं पद्मं तेन परिपूरितं यद्वेणुरन्ध्रं वंशीरन्ध्रम् अत्र लोलन्ती चञ्चला या कराङ्गुलिस्तया समीरिताः समुत्पादिता ये दिव्या उत्कृष्टा रागा ध्वनयः स्वरास्तैरित्यर्थः पुनः कीदृशम् । अनन्तेति अपरिमितानन्दसमुद्रम् ॥ १६ ॥

गोभिरिति ।

गोभि मुखाम्बुजविलीनविलोचनाभि-
रूधोभरस्खलितमन्थरमन्दगाभिः ।
दन्ताग्रदष्टपरिशिष्टतृणाङ्कुराभि-
रालम्बिवालधिलताभिरथाऽभिवीतम् ॥ १७ ॥

पुनः कीदृशम् । अथानन्तरं गोभिरभिवीतं सर्वतोवेष्टितं किम्भूताभिः मुखाम्बुजे परमेश्वरमुखपद्मे विलीने सम्बद्धे लोचने यासान्तास्तथाताभिः पुनः किम्भूताभिः ऊधोभरेति स्तनगौरवस्खलनसालसा लगमनशीलाभिः पुनः किंभूताभिः दन्ताग्रेण दष्टः परिशिष्टतृणाङ्कुरो भक्षणावशिष्टतृणाङ्कुरोयाभिस्ताः तथा ताभिः पुनः किम्भूताभिः आलम्बीति आलम्बिनी लम्बमाना वालधिलता पुच्छलता यासां तास्तथा ताभिः ॥ १७ ॥

सप्रस्रवस्तनविचूषणपूर्णनिश्च-
लास्यावटक्षरितफेनिलदुग्धमुग्धैः-
वेणुप्रवर्तितमनोहरमन्दगीति-
दत्तोच्चकर्णयुगलैरपि तर्णकैश्च ॥ १८ ॥

पुनः कीदृशम् । तर्णकैश्चैकवार्षिकैश्चाभिवीतामिति पूर्वेणान्वयः कीदृशैः प्रस्रवेन क्षरद्दुग्धेन सह वर्तते यत् स्तनाविचूषणं दन्तोष्ठेन स्तना

कर्षणं तेन परिपूर्णो निश्चलः स्थिरश्च य आस्यावटः मुखविवरं ततः क्षरितङ्गलितं यत् फेनिलं सफेनं दुग्धं तेन मुग्धैर्मनोहरैः पुनःकीदृशैः वेण्विति वेणुर्वंशी तेन प्रवर्त्तिता चालिता मनोहरा आह्लादकारिणी मन्द्राऽनल्पा या गीतिर्गानं तत्र दत्तम् उभं कर्ण युगलं यैः तथा तैः ॥ १८ ॥

प्रत्यग्रेति ।

प्रत्यग्रशृङ्गमृदुमस्तकसम्प्रहार-
संरम्भवल्गनविलोलखुराग्रपातैः ।
आमेदुरैर्बहुलसास्नगलैरुदग्र-
पुच्छैश्च वत्सतरवत्सतरीनिकायैः ॥ १९ ॥

पुनः कीदृशं वत्सतरः त्रैवार्षिको बलीवर्दः वत्सतरी त्रैवार्षिकी गौः एतयोः निकायैः समूहैः प्रत्यग्रं नवीनं शृङ्गं यस्मिन्नेवम्भूतं यत् मृदु मस्तकं तत्र यः संप्रहारः अभिघातः अन्यवत्सतरस्य युध्यतः तेन यः संरम्भः क्रोधातिशयस्तेन यद्वल्गनमितस्ततोविचलनं तेन विलोलः अनवस्थितः खुराग्रपातो येषां ते तथा तैः पुनःकीदृशैः आमेदुरैः सुस्निग्धैः पुष्टैरिति वा पुनः कीदृशैः बहुलातिशयिता सास्नायत्र स एवम्भूतो गलो येषां ते तथा तैः सास्ना च गलकम्बलः पुनःकीदृशैः उदग्रपुच्छैः ॥ १९ ॥

हम्बारवेति ।

हम्बारवक्षुभितदिग्वलयैर्महद्भि-
रप्युक्षभिःपृथुककुद्भरभारखिन्नैः ।
उत्तम्भितश्रुतिपुटीपरिपीतवंश-
ध्वानामृतोद्धृतविकाशिविशालघोणैः ॥ २० ॥

पुनःकीदृशं महद्भिरुक्षभिर्बलीवर्दैरप्यभिवीतं कीदृशैः हम्बारवेण स्वरविशेषेण क्षुभितः क्षोभं प्रापितोदिग्वलयो दिक्समूहो यैस्ते तथा तैः पुनः कीदृशैः पृथुरतिशयितो यः ककुद्भरः अपरगलभरः स एव भारस्तेन खिन्नैः अलसैः पुनःकीदृशैः उत्तम्भितेति ऊर्द्ध्वे स्तम्भिता उत्थापिता या श्रुतिपुटी तया परिपीतमतिशयेन श्रुतं यद्वंशस्य ध्वानामृतं शब्दरूपामृतं तेनोद्वृत्ता ऊर्द्ध्वे प्रापिता-

विकाशिनी प्रस्फुटा विशाला दीर्घा घोणा नासा येषां ते तथा तैः ॥ २० ॥

गोपैरिति ।

गोपैः समानगुणशीलवयोविलास-
वेशैश्च मूर्छितकलस्वरवेणुवीणैः ॥
मन्द्रोच्चतानपटुगानपरैर्विलोल-
दोर्वल्लरीललितलास्यविधानदक्षैः ॥ २१ ॥

पुनः कीदृशं गोपैश्चाभिवीतं कीदृशैः समानेति गुणउदयादिः शीलं धैर्यादि वयो बाल्यादि विलासः क्रीडनं वेशः संस्थानविशेषः समानाः तुल्या गुणशीलादयो येषां ते तथा तैः पुनः कीदृशैः मूर्छा प्रापितः कलो ऽव्यक्तमधुरः स्वरोरागोयत्र वेणुश्च वेणा च वेणुवीणे मूर्छितकलस्वरे वेणुवीणे येषां तैः तथा, तदुक्तं—

स्वरः संमूर्छितो यत्र रागतां प्रतिपद्यते ।
मूर्छनामितितां प्राहुः कवयो ग्रामसम्भवाम् ।
सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ।

पुनः कीदृशैः मन्द्रोच्चेति मन्द्रं नीचैः उच्चमतिशयितं तारोयतिविशेषस्तेन पटु स्पष्टं यद्गानं तत्परैस्तदासक्तैः पुनः कीदृशैः विलोलेति विलोला या दोर्वल्लरी वाहुलता तया यल्ललितं मनोहरं लास्यं नृत्यन्तस्य विधानं करणं तत्र दक्षैः कुशलैः ॥ २१ ॥

अङ्कान्तेति ।

अङ्कान्तपीवरकटीरतटीनिबद्ध-
व्यालोलकिङ्किणिघटारटितैरटद्भिः ।
मुग्धैस्तरक्षुनखकल्पितकण्ठभूषै-
रव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥ २२ ॥

पुनःकीदृशं पृथुकैर्वालकैः परीतंवेष्टितं कीदृशैः अङ्कासमीपे पीवरा मांसला या कटीरतटी कटीस्थली तस्यां निबद्धा व्यालो-

ला चञ्चला या किङ्किणिघटा काञ्चीसमूहः तस्य रटितैः झ-ञ्झैरटद्भिः सञ्चरद्भिः पुनः कीदृशैः मुग्धैर्मनोहरैः पुनःकिम्भूतैः तरक्षुनखेन व्याघ्रनखेन कल्पिता सम्पादिता कण्ठभूषा कण्ठा-लंकारो यैः ते तथा तैर्बालकानां रक्षार्थं कण्ठेव्याघ्रनखबन्धनं क्रि-यते यतः । पुन कीदृशैः अव्यक्तमस्पष्टम् अथ च मञ्जुलं मनोहरम् एवंभूतं वचनं येषान्ते तथा तैः ॥ २२ ॥

अथेति ।

अथ सुललितगोपसुन्दरीणां ।
पृथुनिबिरीसनितम्बमन्थराणाम् ॥
गुरुकुचभरभङ्गुरावलग्न-
त्रिवलिविजृम्भितरोमराजिभाजाम् ॥ २३ ॥

पुनः कीदृशम् अथाऽनन्तरं मनोहरगोपस्त्रीणामालिभिः पङ्क्ति-भिः समन्तात्सर्वतः सततं नित्यं सेवितमित्यष्टमश्लोकेनान्वयः ।

किम्भूतानाम् पृथुर्बृहन्निबिरीसोनिबिडो यो नितम्बः कटिप-श्चाद्भागः तेन मन्थराणां गमनाशक्तानां पुनः किम्भूतानां गुरुरति-शायितो यः कुचभरः स्तनगौरवं तेन भङ्गुरमीषन्नम्रं यत् अवलग्नं मध्यप्रदेशः तत्र यद्वालित्रयं तत्र विजृम्भिता वितता रोमपङ्क्तिर्या-सान्तासाम् ॥ २३ ॥

तदिति ।

तदतिमधुरचारुवेणुवाद्या-
मृतरसपल्लविताङ्गजाङ्घ्रिपाणाम् ।
मुकुलविसररम्यरूढरोमो-
द्गमसमलंकृतगात्रवल्लरीणाम् ॥ २४ ॥

पुनःकीदृशीनां तस्य श्रीकृष्णस्यातिमधुरम् अतिप्रीतिदायकं चारु मनोहरं यद्वेणुवाद्यं वंशीरवः स एवामृतरसः अमृतरूपजलं तेन पल्लवितो वृद्ध्युन्मुखः अङ्गजाङ्घ्रिपः कामवृक्षो यासां तास्तथा तासाम् अङ्गजाङ्घ्रिपस्येति पाठः पुनः किंभूतानां मुकुलविसरः क-

लिकासमूहः तद्वद्रम्यो मनोहरो यो रूढ उपचितो रोमोद्गमो रोमोत्थानं तेन समलङ्कृता गात्रवल्लरी देहलता यासां तास्तथा तासाम् ॥ २४ ॥

तदिति ।

तदतिरुचिरमन्दहासचन्द्रा-
तपपरिजृम्भितरागवारिराशेः ।
तरलतरतरङ्गवारिविप्रुट्
प्रकरसमश्रमबिन्दुसंततानाम् ॥ २५ ॥

पुनः किंभूतानां तस्य कृष्णस्यातिमनोहरो यः ईषद्धासः स एव चन्द्ररश्मिस्तेन परिजृम्भित उच्छलितो यो रागसमुद्रस्तस्यातिचञ्चलो यस्तरङ्गः कल्लोलः तदीया ये जलकणाः तेषां यः समूहस्तेन समस्तुल्यो यः श्रमबिन्दुर्घर्मजलबिन्दुः तेन सन्ततानां व्याप्तानाम् ॥ २५ ॥

तदतीति ।

तदतिलसितमन्दचिल्लिचाप-
च्युतनिशितेक्षणमारबाणवृष्ट्या ॥
दलितसकलमर्मविह्वलाङ्ग-
प्रविसृतदुःसहवेपथुव्यथानाम् ॥ २६ ॥

पुनः किंभूतानां तस्य कृष्णस्यातिमनोहरः मन्दः अनतिदीर्घो यश्चिल्लिचापो भ्रूलता सैव धनुस्तस्माद्दुद्गतन्तीक्ष्णं यदीक्षणं कटाक्षः सएव कामबाणस्तस्य वृष्ट्याऽत्यन्तपातेन दलितं चूर्णितं यत्सकलं मर्म तेनाऽनायत्तं यदङ्गं तत्र प्रसृता व्याप्ता दुःसहा कम्पवेदना यासां तास्तथा तासाम् ॥ २६ ॥

तदतीति ।

तदतिरुचिरकर्मरूपशोभा-
मृतरसपानविधानलालसाभ्याम् ।

प्रणयसलिलपूरवाहिनीना-
मलसविलोलविलोचनाम्बुजाभ्याम् ॥ २७ ॥

पुनः किम्भूतानां प्रणयेनैव प्रेम्णैव यो जलप्रवाहस्तं वहन्ति या-स्तथा तासां काभ्यां लज्जादिनाऽर्धनिमीलितपद्मलोचनाभ्यां सविलासचञ्चलितनेत्रपद्माभ्या मित्यपिपाठः किंभूताभ्यां तस्य परमेश्वरस्यातिरुचिरं यत्कर्म शृङ्गारचेष्टाविशेषः रूपशोभा कामिनीमनोनुरञ्जिका कान्तिः ते एवामृतरसौ तयोर्यत्पानम् अत्यन्तचक्षुर्व्यापारस्तत्करणे साकाङ्क्षाभ्यां सुभगकम्रेति पाठान्तरं सुभगः सुन्दरः कम्रः कमनीयः सुभगकमनीययोरेकपर्याययोर्ग्रहणम् अद्भुतत्वाद्रूपस्येति त्रिपाठिनः ॥ २७ ॥

विश्रंसदिति ।

विश्रंसत्कबरीकलापविगलत्फुल्लप्रसूनश्रवत्-
माध्वीलम्पटचञ्चरीकघटया संसेवितानां मुहुः ॥
मारोन्मादमदस्खलन्मृदुगिरामालोलकाञ्च्युच्छ्वस
न्नीवीविश्लथमानचीनसिचयान्ताविर्नितम्बत्विषाम् २८

पुनः किम्भूतानां विश्रंसन् स्खलन् यः केशपाशस्तस्मात्प्रभ्रंश्यद्यद्विकसितं पुष्पं तस्माद्गलन्ती या माध्वी पुष्परसः तत्रात्यन्तासक्तो यश्चञ्चरीको भ्रमरस्तस्य समूहेन मुहुर्वारं वारं संसेवितानाम् ।
पुनः किम्भूतानां मारेति ।

कामकृतोन्मादेन या मत्तता तया स्खलन्ती अस्पष्टा मृद्वी कोमला मनोहरा गीर्वाणी यासां तास्तथा तासाम् उन्मादमदौ शृङ्गारविशेषौ, तदुक्तं शृङ्गारतिलके—

श्वासप्ररोदनोत्कम्पैर्वसुधालोकनैरपि ।
व्यापारो जायते यत्र स उन्मादः स्मृतो यथा ।

एवं मदस्यापिलक्षणं बोद्धव्यमिति केचित् पुनःकीदृशीनाम् आलोला चञ्चला या काञ्चीरसना तया उच्छ्वसन्ती दृढा भवन्ती या नीवी वस्त्रग्रन्थिः "नीवी स्त्रीवसनग्रन्था"विति कोषात् तया विश्लथमानं चीनसिचयं चीनदेशोत्पन्नं सूक्ष्मवस्त्रं तस्यान्ते मध्ये आविः

प्रकटा नितम्बत्विट् नितम्बकान्तिर्यासां तास्तथा तासाम् ॥ २८ ॥

स्खलितेति ।

स्खलितललितपादाम्भोजमन्दाभिघात
क्वणितमणितुलाकोट्याऽकुलाशामुखानाम् ॥
चलदधरसुधानां कुड्मलत्पक्ष्मलाक्षि-
द्वयसरसिरुहाणामुल्लसत्कुण्डलानाम् ॥ २९ ॥

पुनःकिंभूतानां स्खलितमनायस्तं ललितं मनोहरं यत्पादपद्मं तस्य यो मन्द ईषदभिघातः पतनं तत्कृतशब्दयुक्तेन मणिमयनूपुरेणाकुलं शब्दायमानं दिगन्तरं याभिस्तास्तथातासां पुनः किम्भूतानां चलत् स्फुरत् अधरदलमोष्ठपत्रं यासां तास्तथा तासां पुनः किम्भूतानां कुड्मलत् मुकुलीभवत् पक्ष्मलम् उत्कृष्टपक्ष्मयुक्तं यदक्षिद्वयं तदेव पद्मं यासां पुनः किम्भूतानाम् देदीप्यमाने कुण्डले यासां तास्तथा तासाम् ॥ २९ ॥

द्राघिष्ठेति—

द्राघिष्ठश्वसनसमीरणाभिताप-
प्रम्लानीभवदरुणोष्ठपल्लवानाम् ॥
नानोपायनविलसत्कराम्बुजाना
मालीभिः सततनिषेवितं समन्तात् ॥ ३० ॥

पुनः किम्भूतानां दीर्घो यः श्वासवायुस्तेनयोऽभितापः तेन प्रम्लानीभवन् रक्तौष्ठपल्लवो यासां तास्तथा तासां पुनः किंभूतानां विविधोपायनेन शोभमानानि हस्तकमलानि यासान्तास्तथातासाम् ॥ ३० ॥

तासामिति—

तासामायतलोलनीलनयनव्याकोश नीलाम्बुज-
स्रग्भिः संपरिपूजिताखिलतनुं नानाविलासास्पदम्॥
तन्मुग्धाननपङ्कजप्रविगलन्माध्वीरसास्वादिनीं ।
बिभ्राणं प्रणयोन्मदाक्षिमधुकृन्मालां मनोहारिणीम् ३१

पुनः कीदृशं मुकुन्दं तासां गोपसुन्दरीणाम् आयतं दीर्घं लोलञ्च अलं नीलं श्यामं यन्नयनं तदेव व्याकोशं नीलोत्पलं प्रफुल्लं नीलाम्बुजं तेषां स्रग्भिर्मालाभिः सम्परिपूजिता अधिकतरमर्चिता सकला तनुर्यस्य स तथा तं पुनः कीदृशं विविधविलासस्थानं पुनः कीदृशं तन्मुग्धाननेति तासां यन्मनोहरं मुखं तदेव पद्मसमूहस्तस्मात् विगलन् स्रवन् यो माध्वीरसो मकरन्दः, तमास्वादयितुं शीलं यस्याःतां प्रणयेन प्रीत्या उद्धतमदं यदाक्षियुगलं सैव भ्रमरमाला पङ्क्तिः तां मनोहारिणीं विभ्राणम्॥ ३१॥

अधुना परमेश्वरध्यानानन्तरमुपासकामरप्रभृतीनां ध्यानमाह॥ गोपीगोपेति—

गोपीगोपपशूनां वहिः स्मरेदग्रतोऽस्य गीर्वाणघटाम्॥ वित्तार्थिनीं विरञ्चित्रिनयनशतमन्युपूर्विकां स्तोत्रपराम्॥ ३२॥

अस्य परमेश्वरस्याऽग्रतो गोपीगोपपशूनां वहिर्गीर्वाणघटदेवसमूहं स्मरेत् यद्यपि वहिः शब्दयोगे पञ्चमी ज्ञापिता तथापि ज्ञापकसिद्धं न सर्वत्रेति षष्ठीप्रयोगे ऽपि न दोषः किं भूतां वित्तार्थिनीं ज्ञानार्थिनीं वा धनार्थिनीं यद्वा परमेश्वरचित्तापहरणपरां यद्वा धर्मकाममोक्षार्थिनीम्—पुनःकिम्भूताम्—विरञ्चिर्ब्रह्मा ईशः शक्रःतत्प्रमुखां पुनःकिम्भूतां स्तवनपराम्॥ ३२॥

तद्दक्षिणत इति।

तद्दक्षिणतो मुनिनिकरं दृढधर्मवाञ्छमाम्नायपरम्। योगीन्द्रानथ पृष्ठे मुमुक्षमाणान्समाधिना सनकाद्यान् ३३

तस्य परमेश्वरस्य दक्षिणतो दक्षिणभागे तद्वदिति पाठे तेनैव प्रकारेण मुनिनिकरं मुनिसमूहं स्मरेत्। कीदृशमाम्नायपरं वेदाध्ययनपरं पुनःकीदृशं निश्चला धर्मवाञ्छा यस्य तं यत्तु मननात् मुनिरित्यभिधानात् एषां धर्मवाञ्छान युक्ता तेन मुनिशब्दोऽत्रऋष्युपलक्षक इति तन्न धर्मशब्देनाऽऽत्मज्ञानाभिधानात्।

तदुक्तं याज्ञवल्क्येन ।
अयं तु परमो धर्मोयद्योगेनात्मदर्शनमिति ।
अथानन्तरं परमेश्वरस्य पश्चाद्भागे सनकाद्यान् योगेश्वरान् स्मरेत् किम्भूतन् मोक्षैकपरान् पुनः किंभूतान् समाधिनोपविष्टान् ॥३३॥
सव्यइति—

सव्ये सकान्तानथ यक्षसिद्ध-
गन्धर्वविद्याधरचारणांश्च ।
सकिन्नरानप्सरसश्च मुख्याः
कामार्थिनो नर्तनगीतवाद्यैः ॥ ३४ ॥

अथानन्तरं देववामभागे सस्त्रीकान् यक्षादीन् स्मरेत् किंभूतान् किंनरसहितान् पुनः किम्भूतान् सर्वनर्तनगीतवाद्यैः करणभूतैर्वाञ्छितार्थिनः । तथा प्रधानभूता अप्सरसः उर्वशीमुख्याः स्मरेत् ॥ ३४ ॥

शङ्खेन्द्विति—

शङ्खेन्दुकुन्दधवलं सकलागमज्ञं
सौदामनीततिपिशङ्गजटाकलापम् ।
तत्पादपङ्कजगतामचलाञ्च भक्तिं
वाञ्छन्तमुज्झिततरान्यसमस्तसङ्गम् ॥ ३५ ॥

नभसि आकाशे धातृसुतं ब्रह्मपुत्रं स्मरेत् कथंभूतं शङ्खादिवत् श्वेतं निर्मलं पुनः कीदृशं संपूर्णागमवक्तारं पुनः कीदृशं-सौदामनी विद्युत्तस्यास्ततिः दीप्तिस्तद्वत् पिशङ्गा कपिला या-जटा तस्याः कलापः समुदायो यत्र तं पुनः कीदृशं भक्तिमिच्छन्तं किम्भूतां स्थिरां पुनः कीदृशम् अत्यन्तपरित्यक्तपरमेश्वरभिन्न-सकलसंबन्धम् ॥ ३५ ॥

नानेति ।

नानाविधश्रुतिगणान्वितसप्तराग
ग्रामत्रयीगतमनोहरमूर्च्छनाभिः ।

संप्रीणयन्तमुदिताभिरमुं महत्या
सञ्चिन्तयेन्नभसि धातृसुतं मुनीन्द्रम् ॥ ३६ ॥

पुनः कीदृशम् अमुं नानाप्रकारः षट्त्रिंशद्भेदात्मको यः श्रुतिगणः नादसमूहस्तेनान्विता ये सप्त रागाः निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमाख्याः स्वराः तत्र त्रयाणां ग्रामाणां समाहारो ग्रामत्रयी तत्र ग्रामत्रय्यां गताः प्राप्ताः या मूर्छनाः मनोहरा एकविंशतिप्रकाराः ताभिः सम्प्रीणयन्तम् ।

सप्तस्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ।
संमूर्छितः स्वरो यत्र रागतां प्रतिपद्यते ।
मूर्छनामिति तां प्राहुः कवयो ग्रामसम्भवाम् ।

किम्भूताभिः महत्या सप्ततन्त्रीयुक्तया नारदवीणया उदिताभिरुद्गताभिः ॥ ३६ ॥

अधुना प्रकृतमुपसंहरन् आत्मपूजाक्रममाह—

इतीत्यादिना ।

इति ध्यात्वाऽऽत्मानं पटुविशदधीर्नन्दतनयं-
पुरो बुद्ध्यैवाऽर्घ्यप्रभृतिभिरनिन्द्योपहृतिभिः ।
यजेद्भूयो भक्त्या स्ववपुषि बहिष्ठैश्चविभवै-
र्विधानं तद्ब्रूमो वयमतुलसांनिध्यकृदथ ॥ ३७ ॥

इति पूर्वोक्तध्यानप्रकारेण पटुविशदधीः समर्था विचारक्षमा अथ च निर्मला एवंभूता बुद्धिर्यस्य स तथा आत्मानं नन्दतनयं गोपालकृष्णरूपं ध्यात्वा आत्मनन्दतनययोरभेदं चिन्तयित्वा पुरः प्रथमतो बुद्ध्यैव मनसैवा ऽर्घ्यप्रभृतिभिः अर्घ्यपाद्यादिभिरुपहृतिभिरानिन्दितोपचारैः यथोपदेशं पूजयेत् । त्रिपाठिनस्तु अभिनन्द्येतिपाठे धृत्वा पूजयेदित्यर्थमाहुः । भूयः पुनरपि स्वशरीरे साक्षाद्बाह्योपचारैरर्घ्यादिभिः पूजयेत् अथानन्तरं तद्विधानं बहिष्ठविभवार्चनप्रकारं वयं ब्रूमः । कीदृशं परमेश्वरात्यन्तसान्निध्यदातारम् ॥ ३७ ॥

शङ्खपूरणविधिं दर्शयति—

आरचय्येति–

आरचय्य भुवि गोमयाम्भसा ।
स्थण्डिलं निजममुत्र विष्टरम् ।
न्यस्य तत्र विहितास्पदोऽम्भसा-
शङ्कमस्त्रमनुना विशोधयेत् ॥ ३८ ॥

भुवि पृथिव्यां स्थण्डिलं पूजास्थलं गोमयसहितेन जलेनाऽऽरचय्य उपलिप्य अमुत्र स्थण्डिले निजं स्वीयं विष्टरमासनं वस्त्रकम्बलादिकं न्यस्य संस्थाप्य तत्र विष्टरे विहितास्पदः कृतासनो जलेन शङ्खमस्त्रमनुना मूलमन्त्रास्त्रमन्त्रेण अस्त्रायफडितिमन्त्रेण वा प्रलेपयेत् ॥ ३८ ॥

तत्रेति—

तत्र गन्धसुमनोऽक्षतानथो ।
निक्षिपेद्धृदयमन्त्रमुच्चरन् ।
पूरयेद्विमलपाथसा सुधी-
रक्षरैः प्रतिगतैः शिरोन्तकैः ॥ ३९ ॥

वामभागकृतवह्निमण्डलाधारके शङ्खे सुधीः सुबुद्धिसाधकः हृदयमन्त्रं मूलमन्त्रमेव हृदयमन्त्रं केवलं हृदयाय नमः इति वा उच्चार्य गन्धपुष्पयवतण्डुलान्निक्षिपेत् तथा विमलपाथसा निर्मलजलेन पूरयेत् मन्त्रमाह प्रतिगतैरिति प्रतिलोमगतैः प्रतिलोमपठितैर्मातृकाक्षरैः क्षकाराद्यैरकारान्तैः शिरोन्तकैः सविन्दुकैः विन्द्वन्तकैरिति लघुदीपिकाकारः स्वाहान्तैरिति विद्याधराचार्य्यैः विक्षायस्वाहेत्यन्तैरिति त्रिपाठिनः ॥ ३९ ॥

पीठेति ।

पीठशङ्खसलिलेषु मन्त्रविद् ।
वह्निवासरनिशाकृतां क्रमात् ।
मण्डलानि विषकश्रवोक्षरै-
रर्चयेद्वदनपूर्वदीपितैः ॥ ४० ॥

पीठे शङ्खे सलिले च यथाक्रमं वह्निसूर्यचन्द्राणां मण्डलानि विधं मकारः कंशिरस्तत्र न्यस्यमानोऽकारः श्रवःश्रोत्रं तत्र न्यस्यमान-उकार एभिरक्षरैर्मन्त्रविदुपासकः क्रमेण पूजयेत् कीदृशैः वदनपूर्वदीपितैः वदनपूर्वं शिरसि न्यस्यमानम् अंविन्दुरिति यावत् तेन दीपितैः सानुस्वारैरित्यर्थः । प्रयोगस्तु मं वह्निमण्डलाय दशकलात्मने नमः अं अर्कमण्डलाय द्वादशकलात्मने नमः उं सोममण्डलायषोडशकलात्मने नमः ॥ ४० ॥

तत्र तीर्थेति—

तत्र तीर्थमनुना ऽभिवाहयेत् ।
तीर्थमुष्णरुचिमण्डलात्ततः ।
स्वीयहृत्कमलतो हरिं तथा-
गालिनीं च शिखया प्रदर्शयेत् ॥ ४१ ॥

तत्र शङ्खजले वक्ष्यमाणतीर्थमन्त्रेण सूर्यमण्डलतीर्थमावाहयेत् तथा ततः स्वीयहृत्पद्मात् कृष्णमावाहयेत् अनन्तरं शिखामन्त्रेण वक्ष्यमाणां गालिनीं मुद्रां प्रदर्शयेत् चकारात् धेनुमुद्रां च (वामहस्ततले दक्षिणतर्जन्या ताडनं प्रबोधनम्) ॥ ४१ ॥

तज्जलमिति—

तज्जलं नयनमन्त्रवीक्षितं ।
वर्मणा समवगुण्ठ्य दोर्युजा ॥
मूलमन्त्रसकलीकृतं न्यसे-
दङ्गकैश्च कलयेद्दिशोऽस्त्रतः ॥ ४२ ॥

तज्जलं शङ्खजलं वौषडिति नयनमन्त्रेण वीक्षितं यत्र नयनमन्त्रः सम्भवति तत्रैव नयनमन्त्रेण वीक्षणमिति त्रिपाठिनः वर्मणा हुमिति कवचमन्त्रेणा ऽवगुण्ठ्य मूलमन्त्रसकलीकृतं मूलमन्त्राङ्गसम्बद्धम् । एतस्यैव विवरणं न्यसेदिति ।

देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिरिति रुद्रधरः ।

यद्वा मूलमन्त्रध्यानेन सदैवतमिति त्रिपाठिनः अङ्गकैश्चन्यसे-

दिति मूलमन्त्रस्य षडङ्गन्यासङ्कुर्यादित्यर्थः अनन्तरं शङ्खस्य दश दिशः अस्त्रमन्त्रेण छोटिकया बध्नीयात् ॥ ४२ ॥

अक्षतेत्यादि ।

अक्षतादियुतमच्युतीकृतम् ।
संस्पृशन् जपतु मन्त्रमष्टशः ।
किं च न क्षिपतु वर्द्धनीजले-
प्रोक्षयेन्निजतनुं ततोऽमुना ॥ ४३ ॥

तज्जलम् अभग्नतण्डुलचन्दनपुष्पसहितं विष्णुस्वरूपतां नीतं स्पृशन् मूलमन्त्रमष्टकृत्वो जपेत् अनन्तरम् अर्घजलस्य किञ्चित् स्वदक्षिणभागस्थापितवर्द्धनीजले प्रोक्षणीयपात्रजले निक्षिपेत्, तदुक्तम्—

दक्षिणे प्रोक्षणीपात्रमादायाऽद्भिः प्रपूजयेत् ।
किञ्चिदर्घ्याम्बु संगृह्य प्रोक्षण्यम्भसि योजयेदिति ॥

ततस्तदनन्तरम् अर्घपात्रजलेन वारत्रयं निजशरीरं प्रोक्षयेत् । वर्द्धनीघटजलेनेति विद्याधराचार्य्याः ॥ ४३ ॥

त्रिरिति ।

त्रिः करेण मनुनाऽखिलं तथा-
साधनं कुसुमचन्दनादिकम् ।
शङ्खपूरणविधिः समीरितो-
गुप्त एष यजनाग्रणीरिह ॥ ४४ ॥

तथा मूलमन्त्रेण दक्षहस्तेन पुष्पचन्दनादिकं पूजोपकरणद्रव्यं वारत्रयं प्रोक्षयेत् ।

उपसंहरति शङ्खेति ।

एष शङ्खपूरणप्रकारः समीरितः उक्तः । कीदृशः इह आगम-शास्त्रे यजनाग्रणीः प्रथमविधाने यः श्रेष्ठतरः ॥ ४४ ॥

अधुना तीर्थमन्त्रं दर्शयति ।

गङ्गेति—

गङ्गे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥४५॥
एष तीर्थमनुप्रोक्तो दुरितौघनिवारणः
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥ ४६ ॥
तर्जनीमध्यमानामाः संहता भुग्नसञ्जिताः ।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता॥४७॥

एषतीर्थावाहनमन्त्रः कथितः दुरितेति पापसमूहविनाशकः ॥
अधुना गालिनी मुद्राया लक्षणमाह—
कनिष्ठेत्यादिना ।
हस्तयोरन्योन्यकनिष्ठाङ्गुष्ठकौ सम्बन्धौ तथा तर्जनीमध्यमानामिकाः संहताः कृत्वा भुग्नाः किञ्चिदाकुञ्चिताः परस्परसंसक्ताः कार्या इत्यर्थः एवं च सति एषा गालिनी मुद्रा प्रोक्ताशङ्खयोपरि चालिता सती देवताप्रीतिं सम्पादयतीत्यर्थः ॥४५॥ ४६ ॥ ४७॥

अधुना स्वदेहे पीठपूजाक्रममाह—
अथेत्यादि—

अथ मूर्द्धनि मूलचक्रमध्ये ।
निजनाथान् गणनायकं समर्च्य ।
न्यसनक्रमतश्च पीठमन्त्रै-
र्जलगन्धाक्षतपुष्पधूपदीपैः ॥ ४८ ॥

अथानन्तरं मूर्द्धनि स्वकीयशिरसि मूलेचक्रमध्ये मूलाधारचक्रे यथाक्रमं स्वनाथान् स्वगुरून् गणपतिं च पूजयित्वा पूर्वोक्तन्यासक्रमेण पीठमन्त्रैराधारशक्तिमारभ्य पीठमन्त्रान्तं तत्तन्मन्त्रैर्जलगन्धाक्षतपुष्पधूपदीपैः स्वशरीरे पीठपूजनं कुर्यात् ॥ ४८ ॥

प्रयजेदथमूलमन्त्रतेजो
निजमूले हृदये भ्रुवोश्च मध्ये ।

त्रितयं स्मरतः स्मरेत्तदेकी—
कृतमानन्दघनं तडिल्लताभम् ॥ ४९ ॥

अथानन्तरं तन्मूलाधारहृदयभ्रूमध्यगततेजस्त्रितयं मूलमन्त्रात्मकं परं ज्योतिः स्मरतः कामबीजेन क्लीमित्यनेनैकीभूतं चिन्तयेत् कीदृशम् आनन्दघनं चिदानन्दम् पुनः कीदृशम् विद्युत्प्रभम्॥४९॥

तत्तेजोऽङ्गैरिति—

तत्तेजोऽङ्गैः सावयवीकृत्य विभूत्या-
द्यङ्गान्तं विन्यस्य यजेदासनपूर्वैः ।
भूषान्तैर्भूयो जलगन्धादिभिरर्चां
कुर्याद् भूत्याद्यङ्गविधानावधि मन्त्री ॥ ५० ॥

तदेकीकृतं तेजः पञ्चाङ्गैः सावयवीकृत्य शरीरयुक्तं सम्पाद्य तत्र विभूत्याद्यङ्गान्तं विभूतिपञ्जरमारभ्याङ्गन्यासपर्यन्तं स्वशरीरे विन्यस्य आसनादिभूषान्तैरुपचारैर्देवं पूजयेत् भूयः पुनरपि जलगन्धादिभिर्विभूतिपञ्जरमूर्तिपञ्जरकरस्थसृष्टिस्थितिदशपञ्चाङ्गन्यासस्थानेषु न्यासक्रमेणैव तन्मन्त्रैरेव पूजयेत् ॥ ५० ॥

भूय इति—

भूयो वेणुं वदनस्थं वक्षोदेशे वनमालाम् ।
वक्षोजोर्ध्वे प्रयजेच्च श्रीवत्सं कौस्तुभरत्नम्॥५१॥

भूयः पुनरपि मुखस्थं वेणुं पूजयेत् हृदये च वनमालां कण्ठमारभ्य पादद्वयमवलम्बिनीं पत्रपुष्पमयीं मालाम् ।

तदुक्तं—

कण्ठमारभ्य या तिष्ठेत् पादद्वयविलम्बिनी ।
पत्रपुष्पमयी माला वनमालाप्रकीर्त्तितेति ।
स्तनस्योपरि श्रीवत्सं कौस्तुभं च पूजयेत् ॥ ५१ ॥

श्रीखण्डनिःस्यन्दविचर्चिताङ्गो
मूलेन भालादिषु चित्रकाणि ।

लिख्यादथो पञ्जरमूर्तिमन्त्र-
रनामया दीपशिखाकृतीनि ॥ ५२ ॥

अथानन्तरं मूलमन्त्रेण चन्दनपङ्कलिप्ताङ्गः पूजक एव ललाटादिषु मूर्तिपञ्जरन्यासस्थानेषु चित्रकाणितिलकानि दीपशिखाकाराणि अनामिकया मूर्तिपञ्जरमन्त्रैः ॐ ॐ केशवधातृभ्यां नम इत्यादिना द्वादशमूर्तिभिर्लिख्यात्कुर्यादित्यर्थः ॥ ५२ ॥

अधुना पुष्पाञ्जलिविधिं दर्शयति–

पुष्पाञ्जलिमिति ।

पुष्पाञ्जलिं वितनुयादथ पञ्चकृत्वो-
मूलेन पादयुगले तुलसीद्वयेन ।
मध्ये हयारियुगलेन च मूर्ध्नि पद्म-
द्वन्द्वेन षड्भिरपि सर्वतनौ च सर्वैः ॥ ५३ ॥

अथानन्तरं पञ्चकृत्वः पञ्चवारान् मूलमन्त्रेण पुष्पाञ्जलिं वितनुयात् तुलसीद्वयेन श्वेतकृष्णतुलसीद्वयेन पादयुगले क्रमेण दक्षिणवामपादयोरित्यञ्जलिद्वयं मध्ये हृदि हयारियुगलेन श्वेतरक्तकरवीराभ्यामित्येकोञ्जलिः मूर्ध्नि पद्मद्वयेन श्वेतरक्तपद्माभ्याम् इत्यपरोऽञ्जलिः सर्वतनौ सर्वैश्च षड्भिरपि तुलसीद्वयकरवीरद्वयपद्मद्वयैश्चाञ्जलिं तनुयादिति पञ्चमोऽञ्जलिः ॥ ५३ ॥

अधुना श्वेतकृष्णतुलस्यादीनां प्रदानविभागं दर्शयति

श्वेतानीति ।

श्वेतानि दक्षभागे सितचन्दनपङ्किलानि कुसुमानि-
रक्तानि वामभागे ऽरुणचन्दनपङ्कसिक्तानि ॥ ५४ ॥

श्वेतानि तुलस्यादीनि पुष्पाणि श्वेतचन्दनपङ्कयुक्तानि दक्षिणविभागे देयानि रक्तानि तुलस्यादीनि रक्तचन्दनपङ्कयुक्तानि-वामविभागे देयानि ॥ ५४ ॥

उपचारं दर्शयति–

तद्वदिति ।

तद्वच्च धूपदीपौ समर्प्य धिनुयात्सुधारसैः कृष्णम् ।
मुखवासाद्यं दत्वा समर्चयेत्साधुगन्धाद्यैः ॥ ५५ ॥

धूपदीपौ समर्प्य सुधारसैर्ब्रह्मरन्ध्रस्थितशशाङ्कबिम्बगलितामृतद्रवैर्धिनुयात् प्रीणयेत् सुधारसैर्मन्त्रकृतजलैरिति रुद्रधरः । श्रीकृष्णं प्रीणयेत् अनन्तरं मुखवासाद्यं गन्धवटिकां दत्वा गन्धपुष्पैः पूजयेत् ॥ ५५ ॥

ताम्बूलेति ।

ताम्बूलगीतनर्तनवाद्यैः सन्तोष्य चुलुकसलिलेन॥
ब्रह्मार्पणाख्यमनुना कुर्यात्स्वात्मार्पणं मन्त्री ॥५६॥

ततस्तदनन्तरं मन्त्री साधकः उपासकः ताम्बूलगीतादिभिः श्रीकृष्णं परितोष्य चुलुकोदकेन ब्रह्मार्पणमन्त्रेण वक्ष्यमाणस्वात्मसर्पणंकुर्यादित्यर्थः ॥ ५६॥

अथाशक्तं प्रत्याह—

अथ वेति ।

अथ वा संकुचितधियामयं विधिर्मूर्त्तिपञ्जरारब्धः ॥
यद्यष्टादशलिपिना सार्णपदाङ्गैश्च वेणुपूर्वैः प्रोक्तः ॥५७॥

अथ वा मन्दमतीनां पूजकानां पूजाप्रकारो मूर्त्तिपञ्जरादिभिरुक्त इयं दशाक्षरेण पूजा, अष्टादशाक्षरपूजामाह यद्यष्टादशाक्षरमन्त्रेण पूजा तदा कचभुविललाटादिस्थानेषु मन्त्राक्षरन्यासपदपञ्चाङ्गन्यासैर्वेण्वादिभिश्च प्रोक्तः ॥ ५७ ॥

जपविधिं दर्शयति—

सुप्रसन्नेति ।

सुप्रसन्नमथ नन्दतनूजं
भावयन् जपतु मन्त्रमनन्यः ॥

सार्थसंस्मृतियथाविधिसंख्या-
पूरणेऽसुयमनं विदधीत ॥ ५८ ॥

अथानन्तरं मन्त्रार्थस्मरणपूर्वकं मूलमन्त्रं जपतु किङ्कुर्वन् सुप्रसन्नं पूर्वोक्तरूपम् आत्मभिन्नं कृष्णं हृदि भावयन् पुनः किम्भूतः अनन्यस्तत्परः यथोक्तजपसंख्यापूरणे सति असुयमनं प्राणायामं कुर्यात् जपारम्भे चात्रविद्याधराचार्यः बाह्यपूजाशक्तौ आत्मपूजानन्तरं जपं कुर्यात् शक्तौ तु पूजानन्तरमित्याह ॥ ५८ ॥

प्रयोगपूर्वकृत्यमाह—

प्रणवेति ।

प्रणवपुटितं बीजञ्जप्त्वाशतं सहिताष्टकं
निजगुरुमुखादात्तान् योगान्युनक्तु महामतिः ॥
सदमृतचिदानन्दात्माऽथोजपञ्च समापये-
दितिजपविधिः सम्यक् प्रोक्तो मनुद्वितयाश्रितः ॥५९॥

कामबीजं प्रणवपुटितं सहिताष्टकं शतमष्टोत्तरशतं जप्त्वा निजगुरुमुखात्प्राप्तान्योगान् आत्मपरदेवतासमावेशलक्षणान् अष्टमपटले वक्ष्यमाणान्महामतिर्युनक्तु करोतु

प्रकृतमुपसंहरति—

अनन्तरं सदमृतचिदानन्दात्मा ऽमुंजपं समापयेत् इत्यनेन प्रकारेण मनुद्वितयाश्रितः दशाक्षराष्टादशाक्षराश्रितः पूजाप्रकारः ससम्यक् प्रकारेणोक्तः ॥ ५९ ॥

य इति ।

य इमं भजते विधिं नरो
भविताऽसौ दयितःशरीरिणाम् ॥
अपिवाक्कमलैकमान्दिरं
परमं ते समुपैति तन्महः ॥ ६० ॥
इति श्रीकेशवभट्टाचार्यविरचितायां-
क्रमदीपिकायान्तृतीयः पटलः ॥ ३ ॥

यो नरो मनुष्य इमं पूजाप्रकारं सेवतेऽसौ शरीरिणां च शुभो भविष्यति तदा सरस्वतीलक्ष्म्योरावासो भविता अन्ते देहपातानन्तरं तेजः समुपैति तद्रूपो भवतीत्यर्थः ॥ ६० ॥

इति श्रीकेशवकाश्मीर्याचार्यप्रवरविरचितक्रमदीपिकाविवरणः तृतीयः पटलः ॥ ३ ॥

अथ मन्त्रजपादौ दीक्षितस्यैवाधिकारः तदुक्तमागमान्तरे—
द्विजानामनुपेतानां स्वकर्माध्ययनादिषु ।
यथाधिकारो नास्तीह स्याच्चोपनयनादनु ॥
तथात्रादीक्षितानां तु मन्त्रे देवार्चनादिषु ।
ना ऽधिकारोस्त्यतः कुर्यादात्मानं शिवसंस्कृतम् ॥
इत्यतो मन्त्रजपप्रधानाङ्गभूतां दीक्षांकथयामीत्याह ।

कथ्यत इति ।

कथ्यते सपदि मन्त्रवर्ययोः-
साधनं सकलसिद्धिसाधनम् ।
यद्विधाय मुनयो महीयसीं
सिद्धिमीयुरिह नारदादयः ॥ १ ॥

सपदि सांप्रतं मनुवर्ययोः दशाक्षराष्टादशाक्षरयोः साध्यते वाञ्छितमनेनेति साधनं दीक्षणंकथ्यते कीदृशं सकलफलसाधनं यत् कृत्वा नारदादयो मुनयः महतीं सिद्धिम् इह जगति प्राप्तवन्तः ॥ १ ॥

दीक्षाया गुरुसाध्यत्वादादौ गुरुलक्षणमाह—

विप्रमिति ।

विप्रं प्रध्वस्तकामप्रभृतिरिपुघटानिर्मलाङ्गं गरिष्ठां
भक्तिं कृष्णाङ्घ्रिपङ्केरुहयुगलरजोरागिणीमुद्वहन्तम् ॥
वेत्तारम्वेदशास्त्रागमाविमलपथां सम्मतं सत्सुदान्तं
विद्यां यः संविवित्सुः प्रणततनुमना देशिकं संश्रयेत ॥ २ ॥

योविद्यां संविविस्सुर्मन्त्रं सम्यक् ज्ञातुमिच्छति स एतादृशं देशिकं गुरुं संश्रयेत् सेवेत कीदृशं विप्रं ब्राह्मणजातं उपदेशे क्षत्रियादेरनाधिकारात् पुनः कीदृशं प्रकर्षेण दूरीभूता कामाद्यरिषड्वर्गघटा तया पूतं शरीरं यस्य तथा तं कामक्रोधौ लोभ मोहौ मदमत्सरौ एते रिपवः कामादयः लोभाद्युपहतचित्तस्य निरन्तरं प्रत्यवायोत्पत्त्या सेव्यत्वाभावात् पुनः कीदृशं श्रीकृष्णचरण कमलयुगले य द्रजस्तत्ररागयुक्ताम् अतिशयितां भक्तिं धारयन्तम् अभक्तस्य पुरुषार्थानवाप्तेः पुनः कीदृशं वेदशास्त्रागमसम्बन्धिविमलमार्गाणां ज्ञातारम् अन्यथा आगमशास्त्रविचारानुपपत्तेःपुनः कीदृशं सत्सुजनेषु-मध्ये सम्मतं सज्जनत्वेन प्रसिद्धम् अन्यथा खलत्वात् शुश्रूषानर्हत्वात्सच्छब्दार्थ एवनस्यात् पुनः किम्भूतं दान्तं वशीकृतेन्द्रियम् अवशीकृतेन्द्रियस्य देवतापराङ्मुखत्वात् कीदृशः प्रणतानम्रा विनीतातनुः कायोमनो हृदयम् च यस्य स तथा अत्राऽधिकं मत्कृतशारदातिलकेऽवगन्तव्यम् ॥ २ ॥

गुरुसेवाप्रकारमाह—

सन्तोषयेदिति ।

सन्तोषयेदकुटिलार्द्रतरान्तरात्मा-
तं स्वैर्धनैश्च वपुषाप्यनुकूलवाण्या ॥
अब्दत्रयङ्कमलनाभधियाऽतिधीर
स्तुष्टे विवक्षतु गुरावथमन्त्रदीक्षाम् ॥ ३ ॥

अथानन्तरम् उक्तलक्षणं गुरुं वत्सरत्रयं पद्मनाभबुद्ध्या सन्तोषयेत् कैः स्वीयद्रव्यैः तथा शरीरेण तथा प्रियवचनेन कीदृशः सुधीरः पण्डितः पुनः कीदृशः अवक्रोऽतिस्निग्धो अन्तरात्मा अन्तःकरणं यस्य स तथा अथानन्तरं तुष्टे गुरौ मन्त्रदीक्षां विवक्षतु वक्तुमिच्छतु शिष्यएव यत्त्वन्यत्रोक्तम् ।

एकाब्देन भवेद्विप्रोभवेदब्दद्वयान्नृपः ।
भवेदब्दत्रयैर्वैश्यः शूद्रो वर्षचतुष्टयैः ॥
इति ।

तदत्यन्तपरिशीलितविषयम् ।

अन्यथातु ।

त्रिषु वर्षेषु विप्रस्य षड्वर्षेषु नृपस्य च ।
विशोनवसुवर्षेषु परीक्षेतेतिशास्यते ।
समास्वपिद्वादशसुतेषां येवृषलादयः ।
इति बोद्धव्यं ।

विहितनक्षत्रादिकं मत्कृतशारदातिलकोद्द्योते बोद्धव्यम् ॥३॥

कलावत्यादिभेदेन दीक्षाया बहुविधत्वात् मया पुनरत्रप्रपञ्च सारोक्ता क्रियावती दीक्षैव सङ्क्षेपेण प्रदर्श्यते इत्याह— -

प्रपञ्चसारेति ।

प्रपञ्चसारप्रथिता तु दीक्षा
संस्मार्यते संप्रतिसर्वसिद्ध्यै ॥
ऋते यया सन्ततजापिनोऽपि
सिद्धिं न वै दास्यति मन्त्रपूगः ॥ ४ ॥

सम्प्रति दीक्षा क्रियावती संस्मार्यते तस्याः स्मरणमात्रं क्रियते नतु सम्यगभिधीयते अत्र हेतुः यतः प्रपञ्चसारे विविच्योक्ता, किमर्थमभिधीयते सर्वेषां फलानां प्राप्त्यै यया दीक्षया विना सर्वदाजपकर्तुः पुरुषस्य मन्त्रसमूहः फलं यस्मान्नददाति ।

यदाहुः ।

मन्त्रवर्गानुसारेण साक्षात्कृत्येष्टदेवताम्
गुरुश्चेद्बोधयेच्छिष्यं मन्त्रदीक्षेति सोच्यते ।
इति ॥ ४ ॥

अथ शोधितशालादिस्थाने मण्डपपूर्वकत्वं वास्तुबलिमाह—

अथेति ।

अथ पुरोविदधीत भुवः स्थली
मधि यथाविधि वास्तुबलिंबुधः ॥

अचलदोर्मितमत्र तु मण्डपं
मसृणवेदिकमारचयेत्ततः ॥ ५ ॥

अथानन्तरं प्रथमं भुवः स्थलीमधि पृथिव्यामुपरि यथाविधि यथोक्तप्रकारेण वास्तुवलिं बुधो दद्यात् अत्र वलिदानादिविधिश्च मत्कृतशारदातिलकोद्द्योते बोद्धव्यः ततस्तदन्तरम् अत्र संस्कृतभूमौ मण्डपं कुर्यात् कीदृशम् अचलदोर्मितं सप्तहस्तपरिमितं तु शब्दो अनुक्तसमुच्चयार्थः । तेन पञ्चहस्तपरिमितं नवहस्तमितं चेति बोद्धव्यं पुनः कीदृशं मसृणवेदिकं चिक्कणवेदिकम् उत्कृष्टवेदिकमित्यर्थः ॥ ५ ॥

त्रिगुणेति ।

त्रिगुणतन्तुयुजा कुशमालया
परिवृतंप्रकृतिध्वजभूषितं ॥
मुखचतुष्कपयस्तरुतोरणं
सितवितानविराजितमुज्ज्वलम् ॥ ६ ॥

पुनः कीदृशं कुशमालयावेष्टितं किम्भूतया श्वेतरक्तश्यामवर्णतन्तुयुक्तया यद्वा त्रिगुणीकृतसूत्रयुक्तया पुनः कीदृशम् अष्टभिर्ध्वजैः शोभितं प्रकृतिरष्टसंख्या पुनःकीदृशं मुखचतुष्के द्वारचतुष्टये पयस्तरुभिः क्षीरवृक्षैः तोरणं वहिर्द्वारं यत्र तादृशं क्षीरवृक्षास्तु अश्वत्थोदुम्बरप्लक्षन्यग्रोधाख्याः (पुनः कीदृशं शुभ्रचन्द्रातपेनशोभितं) पुनः कीदृशमुज्ज्वलंनिर्मलम् ॥ ६ ॥

कुण्डविधिमाह—

वस्विति ।

वसुत्रिगुणिताङ्गुलप्रमितखाततारायतं
वसोर्वसुपतेरथो ककुभिधिष्ण्यमस्मिन् बुधः
करोतुवसुमेखलंवसुगणार्द्धकोणं प्रती
च्यवस्थितगजाधरप्रतिमयोनिसंलक्षितम् ॥ ७ ॥

अथानन्तरम् अस्मिन् मण्डपेबुधः वसोर्वह्नेर्धिष्ण्यं कुण्डं

करोतु कीदृशं वसुरष्टसंख्या अष्टौवसवः इति प्रसिद्धेः तेषां वसूनां त्रिगुणानि चतुर्विंशाङ्गुलानि तैः प्रमितं तत्प्रमाणंखातस्यगर्त्तस्य उच्चत्वंविस्तारश्च यत्र तादृशं कुत्र वसुपतेः कुवेरस्य ककुभिदिशि उत्तरस्यां पुनः कीदृशं वसुमेखलम् अत्र वसुशब्देन अग्निरुच्यते सचगार्हपत्याहवनीयेत्यादित्रिविधः पुनः कीदृशं वसुगणार्द्धकोणं चतुष्कोणं पुनः कीदृशं पश्चिमदिश्यवस्थितं गजोऽष्टसदृशाद्वादशाङ्गुलायामा या योनिस्तया भूषितं न्तदुक्तं—

द्वादशाङ्गुलिरूपत्वाद्योनिः स्याद्द्वादशाङ्गुलिरिति ।
अपरोऽत्राविशेषः शारदातिलकतोऽवगन्तव्यः ॥ ७ ॥

अधुनाराशिमण्डलविधिंदर्शयति ।

तत इति ।

ततोमण्डपेगव्यगन्धाम्बुसिक्ते
लिखेन्मण्डलं सम्यगष्टच्छदाब्जम् ॥
सवृत्तत्रयंराशिपीठाग्निङ्वीथि
चतुर्द्वारशोभोपशोभास्रयुक्तम् ॥ ८ ॥

ततोमण्डपानन्तरम् अस्मिन् मण्डपेसम्यक्यथोक्तप्रकारेणमण्डलंलिखेत् कीदृशे गव्यैः पञ्चगव्यैः शारदातिलकोक्तवैष्णवगन्धाष्टकजलेनप्रोक्षिते कीदृशम् अष्टदलपद्मसहितं पुनः कीदृशं वृत्तत्रयसहितं पुनः राशयोमेषादयः पीठंकलसस्थापनस्थानंतस्याङ्घ्रिप्रपीठपात्रचतुष्टयं चतस्रोवीथयः चत्वारिद्वाराणिशोभाउपशोभा अस्रंकोणम् एतैर्युक्तम् अयमर्थः सार्द्धहस्तद्वयप्रमाणेनसमंचतुरस्रम्भूभागंपरिष्कृत्यतत्र पूर्वापरायतानिसप्तदशसूत्राणिपातयेत् एवंसतिषट्पञ्चाशदुत्तरं द्विशतंकोष्ठानां भवति तत्र कोष्ठविभागोमध्येषोडशभिः कोष्ठैर्वृत्तत्रयान्वितं पद्मंलिखेत् (तत्रचपद्मोपरिशिष्टपीठंतदङ्कंचलिखेत्) तद्बहिरष्टाधिकचत्वारिंशताद्वादशराशीन् लिखेत् तद्बहिः षट्त्रिंशतापीठं पीठाङ्गञ्चलिखते (तद्बहिरशीतिभिः पदैर्लिखेत्) अत्रेदं बोद्धव्यं पद्मस्यदलाग्रस्थंवृत्तंपीठशक्तिश्चएतयोर्मध्ये पूर्वदक्षिणपश्चिमोत्तरंसूत्रचतुष्टयंदद्यात् अनन्तरंद्वादशाधिकैः शतपदैर्द्वारशोभोप-

शोभाकोणानिविलिखेत् तत्रसर्वस्यांदिशिद्वारंषट्पदं । (तत्रप्रकारः बाह्यपङ्क्तिगतमध्यकोष्ठद्वयन्तदन्तर्गतपङ्क्तिगतमध्यकोष्ठद्वयमिति-द्वारस्यैकस्मिन्भागेकोष्ठचतुष्टयेनैकाशोभाभवति तत्रबाह्यपङ्क्तिगतमेकंकोष्ठंतदन्तर्गतपङ्क्तिगतंकोष्ठत्रयमितिएवंकोष्ठचतुष्टयेनैकोपशोभाभवति अत्रबाह्यपङ्क्तिगतकोष्ठत्रयन्तदन्तर्गतपङ्क्तिगतमेकंकोष्ठमितितथाकोष्ठषट्केन कोणमिति एवमपरस्मिन्भागेऽपिशोभोपशोभाकोणानिबोद्धव्यानि एवंदिक्चतुष्टयेऽपिमिलित्वा द्वादशाधिकंशतंभवतीति अत्रानुक्तंशारदातिलकेबोध्यम ॥ ८ ॥

ततो देशिकः स्नानपूर्वं विधानं।
विधायाऽऽत्मपूजावसानं विधिज्ञः ॥
स्ववामाग्रतः शङ्खमर्घ्यर्घ्यपाद्या-
चमाद्यानि पात्राणि सम्पूरितानि ॥ ९ ॥

विधायाऽन्यतः पुष्पगन्धाक्षताद्यं।
करक्षालनं पृष्ठतश्चाऽपि पात्रम् ॥
प्रदीपावलीदीपिते सर्वमन्यत्।
स्वदृग्गोचरे साधनं चाऽऽददीत ॥ १० ॥

तदनन्तरं विधिज्ञः आगमोक्तप्रकारज्ञः देशिको गुरुः स्नानपूर्वकं विधानं स्वगृह्योक्तादिस्नानविधिम् आत्मपूजापर्यन्तं समाप्य स्ववामाग्रे शङ्खार्घ्यपाद्याचमनीयपात्राणि जलादिस्वच्छद्रव्यैः सम्पूरितानि कृत्वा यथोत्तरं स्थापयित्वा ऽन्यतो दक्षिणभागे पुष्पाणि पूजा द्रव्याणि निधाय करप्रक्षालनपात्रमेकं पृष्ठदेशे निधाय सर्वमन्यत् साधनम् उपकरणं स्वदृग्गोचरे चक्षुर्गोचरे प्रदीपश्रेणिविराजिते स्थापयेत् अत्राऽपरो विशेषः श्रीपरमानन्दभट्टाचार्यकृते प्रपञ्चसारविवरणे द्रष्टव्यः ॥ ९ ॥ १० ॥

वायव्येति—

वायव्याशादीशपर्यन्तमर्च्य-
पीठस्योदग्गौरवी पङ्क्तिरादौ ॥

पूज्योऽन्यत्राऽप्याम्बिकेयः कराब्जैः ।
पाशं दन्तं शृण्यभीती दधानः ॥ ११ ॥

पीठस्य राशिपीठस्य उदक् उत्तरभागे वायव्यकोणादीशानकोण पर्यन्तं गुरुसम्बन्धिनी पङ्क्तिरादौ प्रथमतः पूज्या प्रयोगस्तु ॐगुरुभ्योनमः इति अन्यत्र दक्षिणभागे आम्बिकेयो गणपतिः पूज्यः कीदृशः हस्तपद्मैः स्वदन्तं शृणिम् अङ्कुशम् अभयं दधानः ॥ ११ ॥

अधुनाकलशस्थापनप्रकारंदर्शयति

यतोदेशिक इत्यादिना

आराध्येति ।

आराध्याऽऽधारशक्त्याद्यमरचरणपावध्यथो मध्यभागे।
धर्मादीन् वह्निरक्षःपवनशिवगतान् दिक्ष्वधर्मादिकांश्च॥
मध्ये शेषाब्जबिम्बत्रितयगुणगणात्मादिकं केशराणां।
वह्नेर्मध्ये च शक्तीर्नव समभियजेत्पीठमन्त्रेण भूयः॥१२॥

अथानन्तरं मण्डलमध्यभागे आधारशक्तिमारभ्य कल्पवृक्षपर्यन्तमाराध्य पूजयित्वा पीठन्यासक्रमेण वन्हीति अग्न्यादिकोणगतान् धर्मादीन् पूर्वादिचतुर्दिक्षु अधर्मादीन् तथा मध्ये शेषं पद्मं तथा सूर्यसोमवह्नीनां बिम्बत्रयं द्वादशषोडशदशकलाढ्यात्तं मण्डलत्रयं तथा सत्वादिगुणत्रयं तथा ऽऽत्मादिचतुष्टयं पूजयेत् अथ केशराणां मध्ये कर्णिकायां च विमलाद्या नव शक्तीः पूर्वादिक्रमेण पूजयेत् भूयः पुनरपि पूर्वोक्तेन पीठमन्त्रेण पीठं पूजयेदित्यर्थः ॥ १२ ॥

तत इति ।

ततः शालीन् मध्येकमलममलांस्तण्डुलवरा-
नपि न्यस्येद्दर्भास्तदुपरि च कूर्चाक्षतयुतान् ॥
न्यसेत्प्रादक्षिण्यात्तदुपरि कृशानोर्दश कला-
यकाराद्यर्णाद्या यजतु च सुगन्धादिभिरिमाः॥१३॥

तदनन्तरं मध्येकमलं कमलमध्ये शालीन् आढकपरिमि-

तान् तथा शुभ्रान् शाल्यष्टभागपरिमितान् तण्डुलान् श्रेष्ठान् न्यस्येत् स्थापयेत् ।

तदुक्तं ।

शालीन्वै कर्णिकायां च निक्षिप्याढकसंमितान् ।
तण्डुलांश्च तदष्टांशान्दर्भैः कूर्चैः प्रविन्यसेदिति ।

तदुपरि तण्डुलोपरि कूर्चाक्षतयुक्तान् दर्भान् विन्यसेत्, कुशत्रयघटितो ब्रह्मग्रन्थिः कूर्चशब्देनोच्यते, कूर्चः कुशमुष्टिरिति त्रिपाठिनः, तदुपरि कूर्चोपरि कृशानोर्वह्नेर्दश कला यकारादयो दशवर्णा आद्याः प्रथमा यासान्ताः प्रादक्षिण्येन न्यसेत् तदनन्तरं इमा दश कला गन्धादिभिःपूजयेत् ।

ताश्च—

धूम्रार्चिरूष्माज्वलिनीज्वालिनीविस्फुलिङ्गिनी ।
सुश्रीः सुरूपा कपिलाहव्यवहाकव्यवहेति ।

प्रयोगस्तु धूम्रार्चिषेनम इति ॥ १३ ॥

न्यसेदिति ।

न्यसेत्कुम्भं तत्र त्रिगुणितलसत्तन्तुकलितं ।
जपंस्तारं धूपैः सुपरिमलितं जोङ्कटमयैः ।
कभाद्यैः कुम्भेऽस्मिन् ठडवसितिभिर्वर्णयुगलैः ।
तथा न्यस्याऽभ्यर्च्यास्तदनु खमणेर्द्वादश कलाः॥१४॥

तत्र दशकलामये कूर्चे तारमोंकारमुच्चरन् कुम्भं न्यसेत् कुम्भस्तु सुवर्णादिनिर्मितः ।

तदुक्तं ।

सौवर्णं राजतं वापि मृन्मयं वा यथोदितम् ।
स्थापयेदस्त्रमन्त्रेण कुम्भं सम्यक् सुरेश्वरीति ।

कीदृशं ग्रीवायां त्रिगुणिता लसन्तः शोभमाना ये तन्तवः कन्याकार्तितकार्पाससूत्राणि तैः कलितम् अस्त्रमन्त्रेणवेष्टितम् पुनः कीदृशं जोङ्कटमयैः कृष्णागुरुप्रधानैर्धूपैः सुधूपितं तदनन्तरं

समयेः सूर्यस्य द्वादशकला अस्मिन्कुम्भे न्यस्य अनन्तरं पूज्याः कैः वर्णयुगलैः कीदृशैः कभाद्यैः ककारभकाराद्यैः पुनः कीदृशैः ठडवसितिभिः ठकारडकारावसानैः अयमर्थः अनुलोमपठितककाराद्येकैकमक्षरं प्रतिलोमपठितभकाराद्येकैकमक्षरेणसहितं तपिन्यादिषु द्वादशकलासु संयोज्य न्यासादिकं कार्यं ।

ताश्च—

तपिनीतापिनीधूम्रामरीचि ज्वालिनीरुचिः ।
सुषुम्णाभोगदाविश्वाबोधिनीधारिणीक्षमेति ।

प्रयोगस्तु कंभंतपिन्यैनमः खं बं तापिन्यैनम इत्यादिकार्यम् ॥१४॥

एवमित्यादि—

एवं संकल्प्याऽग्निमाधाररूपं ।
भानुं तद्वत्कुम्भरूपं विधिज्ञः ॥
न्यस्येत्तस्मिन्नक्षताद्यैः समेतं ।
कूर्चं स्वर्णैरत्नवर्यैः प्रदीप्तम् ॥ १५ ॥

एवमनेन प्रकारेणाऽऽधाररूपमग्निं संकल्प्य तद्वत्कुम्भरूपंभानुं विचिन्त्य तस्मिन्कुम्भे विधिज्ञ आगमोक्तप्रकाराभिज्ञः मूलमन्त्रेणाऽक्षताद्यैः सहितं कूर्चं पूर्वोक्तलक्षणैः सुवर्णरत्नवर्यैर्नवरत्नैः शोभितं न्यसेत् ।

तदुक्तंभैरवेण ।

एतान् नमित्वा तन्मध्येशुक्लपुष्पंसिताक्षतम् ।
नवरत्नंचकूर्चंचमूलेनैवविनिक्षिपेदिति ॥ १५ ॥

अथेति—

अथ काथताद्यैः ककारादिवर्णै-
रकारावसानैः समापूरयेत्तम् ॥
स्वमन्त्रात्रिजापावसानं पयोभि-
र्गवां पञ्चगव्यैर्जलैः केवलैर्वा ॥ १६ ॥

अथाऽनन्तरं पीठकुम्भयोरैक्यं विचिन्त्य पञ्चाशद्वर्णैरोषधितोयैः पलाशत्वग्जलैः क्षीरद्रुमत्वक्क्वाथजलैर्वा सर्वौषधिजलैर्वा गवां पयोभिर्वा पञ्चगव्यैर्वा केवलजलैः कर्पूरादिजलैर्वा तीर्थजलैर्वा क्षकारादिवर्णैरकारावसानैर्विलोममातृकाभिः स्वमन्त्रत्रिजपावसानं मूलमन्त्रवारत्रयजपान्तं यथा स्यादेवं पूरयेत् ॥ १६ ॥

कलश जले इति—

कलशजलेऽस्मिन् वसुयुगसंख्याः ।
स्वरगणपूर्वा न्यसतु तथैव ॥
उडुपकलास्ताः सलिलसुगन्धा-
क्षतसुमनोभिस्तदनु यजेत ॥ १७ ॥

तस्मिन् कलशजले उडुपकलाश्चन्द्रकलाः वसुयुगसंख्याः षोडशसंख्याः स्वरगणपूर्वा अकारादिवर्णपूर्वा न्यसतु तदनु तदनन्तरं ताश्चन्द्रकलास्तथैव तेनैव क्रमेण पुष्पाञ्जलिभिः पूजयेत् ।

ताश्च—

अमृतामानदापूषातुष्टिः पुष्टी रतिर्धृतिः ।
शशिनीचन्द्रिका कान्तिज्योत्स्नाश्रीः प्रीतिरङ्गदाः ।

पूर्णापूर्णामृतेति ॥ १७ ॥

अधुना वैष्णवगन्धाष्टकमाह—

उदीच्यकुष्ठकुङ्कुमाम्बुलोहसजटामुरैः ॥
सशीतमित्युदीरितं हरेः प्रियाष्टगन्धकम् ॥ १८ ॥

उदीच्यम् उशीरं कुष्टं कुङ्कुमं कम्बुवाला नेत्रवाला लोहः कृष्णगुरुः जटया सह मुरा जटामांसी मुरा मांसी च एतैः सह शीतं चन्दनमिति हरेः प्रियकारिगन्धाष्टकमुक्तम् ॥ १८ ॥

शङ्खपूरणमाह—

क्काथेति ।

क्काथतोयपरिपूरितोदरे-
संविलोड्य विधिनाऽष्टगन्धकम् ॥
सोमसूर्यशिखिनां पृथक्कलाः ।
सेचकर्म विनियोजयेत्क्रमात् ॥ १९ ॥

दरे शङ्खे विधिनाऽऽगमोक्तप्रकारेण मूलमन्त्रेण पूर्वोक्तक्काथ-जलेन परिपूरिते गन्धाष्टकं नमोमन्त्रेण संविलोड्य दत्त्वा सोम-सूर्यवह्नीनां कलाः पृथक् समावाह्य सेचकर्म प्राणप्रतिष्ठाकर्म क्रमेण विनियोजयेत् कुर्यात् ॥ १९ ॥

तद्वदिति—

तद्वदाक्षरभवास्तु कादिभि-
ष्टादिभिः पुनरुकारजाः कलाः ॥
पादिभिर्मलिपिजास्तु विन्दुजाः ।
षादिभिः स्वरगणेन नादजाः ॥ २० ॥

पूर्वोक्तप्रकारेण आक्षरभवा अकाराक्षरभवा दश कलाः का-दिभिः ककारादिभिर्दशभिरक्षरैः सहिताः पुनरुकारजा उकाराक्षर भवा दश कलाः यादिभिर्दशभिरक्षरैः सहिताः तथा मलिपिजा मकाराक्षरभवा दश कलाः पादिभिर्दशभिरक्षरैः सहिताः तथा वि-न्दुजा विन्दुप्रभवाः चतस्रः कलाः षादिभिश्चतुरक्षरैः सहिताः तथा नादजा नादप्रभवाः षोडश कलाः स्वरसमूहेन षोडशभिः स्वरैः सहिताः शङ्खसलिले न्यस्याः ।

ताश्च—

सृष्टिर्ऋद्धिः स्मृतिर्मेधाकान्तिर्लक्ष्मीर्द्युतिः स्थिरा ।
स्थितिः सिद्धिरकारोत्थाः कला दश समीरिताः ।
यवा च पालिनी शान्तिरैश्वरी रतिकामिके ।
वरदा ह्लादिनी प्रीतिर्दीर्घा उकारजाः कलाः ॥

तीक्ष्णा रौद्री भया निद्रा तन्द्रा क्षुत् ह्लादिनी क्रिया ।
उत्कारी चैव मृत्युश्च मकाराक्षरजाः कलाः ।
बिन्दोरपि चतस्रः स्युः पीता श्वेताऽरुणाऽसिता ॥
निवृत्तिः सुप्रतिष्ठा च विद्या शान्तिस्तथैवच ।
इंधिका दीपिका चैव रेचिका मोचिका परा ॥
सूक्ष्मा सूक्ष्ममता ज्ञाना ऽमृता चाऽऽप्यायनी तथा ।
व्यापिनी व्योमरूपा च अनन्ता नादसम्भवा इति ॥
प्रयोगश्च कं सुप्येनम इत्यादि ॥ २० ॥

समावाहनान्ते इत्यादि ।

समावाहनान्तेऽसुसंस्थापनात्प्राक् ।
ऋचस्तत्र तत्राऽभिजप्या बुधेन ॥
समभ्यर्च्य तास्ताः पृथक् तच्च पाथोऽ-
र्पयेन्मूलमन्त्रेण कुम्भे यथावत् ॥ २१ ॥

समावाहनस्याऽन्ते ऽसुसंस्थापनात्प्राक् प्राणप्रतिष्ठायाः पूर्वं तत्र तत्र स्थाने पण्डितेन धार्य्याश्चाऽभिजप्याः पठनीयाः अयमर्थः शङ्खजले ऽकारप्रभवककारादिकलावाहनानन्तरं प्राणप्रतिष्ठायाः पूर्वं "हंसः शुचिष"दिति ऋचं पठेत् उकारप्रभवटादिकलावाहनानन्तरं "प्रतद्विष्णु"रिति ऋचम्पठेत् मकारादिप्रभवपकारादिकलावाहनानन्तरं "तत्सवितु"रित्यादि ऋचं पठेत् नादप्रभवतकारादिकलावाहनानन्तरं "विष्णोर्योनि"रित्यादिऋचं पठेत् अनन्तरं मूलमन्त्रं शङ्खजले विलोमेन जपेत् तारकलाः पृथगेकैकशः यथावत् यथाविधि सम्पूज्य तच्च पाथः तच्छङ्खोदकं मूलमन्त्रं पठित्वा कुम्भे विनिक्षिपेत् ॥ २१ ॥

सहेति—

सहकारबोधिपनसस्तबकैः ।
शतमन्युवल्लिकलितैः कलशम् ॥

पिदधातु पुष्पफलतण्डुलकै-
रभिपूर्णयाऽपि शुभचक्रिकया ॥ २२ ॥

सहकार आम्रः बोधिरश्वत्थः पनसः कण्टकिफलवृक्षः एतेषां स्तवकैः पल्लवैः शतमन्युवल्लिकालतैरिन्द्रवल्लीवर्कैः कलशं कलशमुखं सुरद्रुमधिया पिदधातु समाच्छादयतु तथा पुष्पादिभिः परिपूर्णया शुभचक्रिकया शोभमानशरावेण तदुपरि पिदधातु ॥२२॥

अभीति ।

अभिवेष्टयेत्तदनु कुम्भमुखं ।
नवनिर्मलांशुकयुगेन बुधः ॥
समलंकृतेऽत्र कुसुमादिभिर-
प्यभिवाहयेत्परतरञ्च महः ॥ २३ ॥

तदनु तदनन्तरं नूतनमलरहितवस्त्रद्वयेन परितः कुम्भमुखमभिवेष्टयेत् अनन्तरं कुम्भे पुष्पादिभिरलंकृते परमोत्कृष्टं महस्तेजः पूज्यदेवतास्वरूपमावाहयेत् आवाहनादिकं कुर्यात् यथा श्रीकृष्णेहा ऽऽगच्छेह तिष्ठ इह संनिधेहि ॥ २३ ॥

सकलीति—

सकलीविधाय कलशस्थममुं ।
हरिमर्णतत्त्वमनुविन्यसनैः ॥
परिपूजयेद् गुरुरथाऽवहितः ।
परिवारयुक्तमुपचारगणैः ॥ २४ ॥

अमुं कलशस्थं हरिं सकलीकृत्य
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिरिति ।
उत्तमाङ्गं विधाय वर्णतत्त्वमन्विति अक्षरमयतत्त्व

मन्त्रन्यासैः सहेति रुद्रधरः अर्ण इति सृष्टिसंहारभेदेन अङ्गुल्यारोपणभेदेन च मन्त्रवर्णविन्यासोऽर्णन्यासः तत्त्वेति सृष्टिसंहारभेदेन मन्त्राक्षरान्वितदशतत्त्वन्यासः तथा मूलमन्त्रन्यासो मनुन्यासः मनुपुटितमातृकान्यास इत्यर्थः इत्यादिन्यासैस्तत्तेजोरूपधरं सकलं सगुणं शरीरं कुर्यादिति भैरवत्रिपाठिनः विविद्याधरोऽप्येवमाह पीठन्यासकरन्यासौ विनाऽपि प्रथमद्वितीयपटलप्रोक्तन्यासादिजातैरिति केचित् अष्टादशाक्षरे पक्षे तत्त्वन्यासस्थाने मन्त्राक्षरन्यासो द्रष्टव्यः अथाऽनन्तरम् अवहितः सावधानो गुरुः सपरिवारम् आवरणसमेतम् उपचारगणैः षोडशदशपञ्चोपचारान्यतमोपचारेण पूजयेत् ॥ २४ ॥

पूजाक्रममाह—

दत्त्वेति ।

दत्त्वाऽऽसनं स्वागतमित्युदीर्य ।
तथाऽर्घ्यपाद्याचमनीयकानि ॥
देयानि पूर्वं मधुपर्कयुञ्जि ।
नन्दात्मजायाऽऽचमनान्तकानि ॥ २५ ॥
स्नानं च वासश्च विभूषणानि ।
साङ्गाय तस्मै विनियोज्य मन्त्री ॥
गात्रे पवित्रैरथ गन्धपुष्पैः ।
पूर्वं यजेन्न्यासविधानतोऽस्य ॥ २६ ॥

तस्मै साङ्गाय नन्दात्मजाय कृष्णाय आसनं पद्मादिकुसुमरूपं दत्त्वा स्वागतमित्युदीर्य स्वागतमिति शब्दमुच्चार्य अनन्तरं पूर्वं प्रथमतः अर्घ्यपाद्याचमनीयकानि मधुपर्कसहितानि देयानि आचमनान्तकानि मधुपर्कं दत्त्वा पुनराचमनीयं देयं स्नानं गन्धजलादिभिः कार्यं वासो वस्त्रयुगलं शरीरे देयं विभूषणानि कुण्डलादीनि यथास्थानं विनियोज्यानि अथाऽनन्तरम् अस्य परमेश्वरस्य गात्रे शरीरे पूर्वं प्रथमतः पवित्रैः शुद्धैः गन्धपुष्पैर्न्यासप्रकारेण यजेत् पूजयेत् ॥ २५ ॥ २६ ॥

पूजाप्रकारमेवाह—

सृष्टिस्थितीति ।

सृष्टिस्थिती स्वाङ्गयुगं च वेणुं ।
मालामभिज्ञानवराश्ममुख्यौ ॥
मूलेन चाऽऽत्मार्चनवत्प्रपूज्य ।
समर्चयेदावरणानि भूयः ॥ २७ ॥

वर्णन्यासमन्त्रैर्यथाक्रमं पूजयेत् ॐ गों ॐ नमः इत्यादि सृष्टिस्थिती पूर्वोक्तं स्वाङ्गयुगं पञ्चाङ्गदशाङ्गन्यासौ वेणुं मालां-वनमालाम् अभिज्ञानवरं श्रीवत्सलाञ्छनमिति अश्ममुख्यः कौस्तुभः एतानि सम्पूज्य मूलेन चाऽऽत्मार्चनवत् यथाऽऽत्मनि परमेश्वरपूजा मूलमन्त्रेण पञ्चकृत्वः तुलस्यादिपुष्पाञ्जलिभिः पद्मद्वयादिषु कृता तथा कुम्भस्थमपि सम्पूज्य भूयः पुनरपि आवरणानि वक्ष्यमाणानि पूजयेत् अष्टादशार्णपक्षे सृष्टयादिस्थानेषु वर्णन्यासपदन्यासानां पूजा कार्येति बोद्धव्यम् ॥ २७ ॥

आवरणपूजाक्रममाह—

दिक्ष्विति ।

दिक्ष्वथ दामसुदामौ वसुदामः किङ्किणी च संपूज्याः ॥
तेजोरूपास्तद्बहिरङ्गानि च केशरेषु समभियजेत्॥२८॥

अथाऽनन्तरं कर्णिकायां देवस्य पूर्वादिचतुर्दिक्षु दामादयश्चत्वारः पूज्याः कीदृशाः तेजोरूपाः देदीप्यमानाः प्रयोगस्तु ॐदामायनम .इत्यादि द्वितीयावरणमाह तद्बहिरिति कर्णिकाकोणेषु अङ्गानि समभियजेत् ॥ २८ ॥

पूजाविधानमाह—

हुतवहनिर्ऋतिसमीरणाशिवेति ।

हुतवहनिर्ऋतिसमीरशिवादिक्षु हृदादिवर्मपर्यन्तम् ॥
पूर्वादिदिक्ष्वथाऽस्त्रं क्रमेण गन्धादिभिः सुशुद्धमनाः॥२९॥

अग्न्यादिकोणचतुष्टयेषु हृदयादिकवचान्तानि चत्वार्य्यङ्गानि अ-

थाऽनन्तरं पूर्वादिचतुर्दिक्षु अस्त्रमङ्गं पूजयेत् ॥ २९ ॥

अङ्गदेवताध्यानमाह—

मुक्तेति ।

मुक्तेन्दुकान्तकुवलयहरिनीलहुताशसभाः प्रमदाः ।
अभयवरस्फुरितकराः प्रसन्नमुख्योऽङ्गदेवताःस्मर्याः॥३०॥

अङ्गदेवता ध्येयाः किम्भूता प्रमदाः स्त्रीस्वभावाः पुनः किम्भूताः मुक्ताः इन्दुकान्तश्चन्द्रकान्तमणिः कुवलयं नीलपद्मं हरिनीलः इन्द्रनीलमणिः हुताशो वह्निश्च एतेषां समानाऽऽभा प्रभा वर्णो यासान्तास्तथा पुनः किम्भूता अभयेन वरेण च शोभिताः करा यासान्ताः पुनः किम्भूताः प्रसन्नवदनाः ॥ ३० ॥

तृतीयमावरणमाह—

रुक्मिण्येति ।

रुक्मिण्याद्या महिषीरष्टौ
सम्पूजयेद्दलेषु ततः ॥
दक्षिणकरधृतकमला वसुभरि
तसुपात्रमुद्रितान्यकराः ॥ ३१ ॥

ततस्तदनन्तरं दलेषु पूर्वादिपत्रेषु रुक्मिण्याद्याः अष्टौ महिषीर्मुख्या महादेवीः सम्पूजयेत् किम्भूताः दक्षिणकरैर्धृतानि कमलानि याभिस्ताः तथा पुनः किम्भूताः वसुपूरितपात्रैर्मुद्रिताः पूरिता अन्ये वामकरा यासां तास्तथा ॥ ३१ ॥

अष्टौ वर्णयति—

रुक्मिण्येति ।

रुक्मिण्याख्यासत्या सनाग्निजित्याह्वया सुनन्दा च ॥
भूयश्च मित्रविन्दा सुलक्ष्मणा ऋक्षजा सुशीला च॥३२॥

ऋक्षजा जाम्बवती ॥ ३२ ॥

तासांरूपाणि दर्शयति—

तपनीयेति ।

तपनीयमरकताभाः सुसित-
विचित्राम्बरा द्विशस्त्वेताः ॥
पृथुकुचभरालसाङ्ग्यो विविध-
मणिप्रकरविलसिताभरणाः ॥ ३३ ॥

एता रुक्मिण्याद्या द्विशः युग्मशः क्रमेण काञ्चनमरकतयोरिवा ऽऽभा दीप्तिर्यासां तास्तथा पुनः किंभूताः शोभमानानि शुक्लानि नानाप्रकाराणि वस्त्राणि यासान्तास्तथा पुनः किंभूता अचला ये कुचास्तेषां गौरवेण अलसानि निष्क्रियाणि अङ्गानि यासान्तास्तथा पुनःकिंभूता नानाप्रकारो मणिप्रकर इन्द्रनीलादिसमूहस्तेषु विशेषेण शोभितानि आभरणानि यासाम् ॥ ३३ ॥

चतुर्थावरणमाह—

तत इति ।

ततो यजेद्दलाग्रेषु वसुदेवं च देवकीम् ॥
नन्दगोपं यशोदां च बलभद्रं सुभद्रिकाम् ॥
गोपान् गोपीश्च गोविन्दविलीनमतिलोचनान्॥३४॥

ततस्तदनन्तरं दलाग्रेषु पूर्वादिक्रमेण वसुदेवादीन् संपूजयेत् किंदृशा गोविन्दे विलीना संबद्धा मतिलोचनं येषान्ते तथा ॥ ३४ ॥

एतेषामायुधानिदर्शयति—

ज्ञानेति ।

ज्ञानमुद्राभयकरौ पितरौ पीतपाण्डरौ ।
दिव्यमाल्याम्बरालेपभूषणे मातरौ पुनः ॥ ३५ ॥

ज्ञानमुद्रा अभयं च करेषु ययोस्तौ पितरौ वसुदेवनन्दगोपौ कीदृशौ हरिद्राभश्वेतौ मातरौ देवकीयशोदे कीदृश्यौ दिव्यानि देवार्हाणि माल्याम्बरभूषणानि ययोस्तादृश्यौ ॥ ३५ ॥

धारयन्त्यौ च वरदं पायसापूर्णपात्रकम् ।
अरुणाश्यामले हारमणिकुण्डलमण्डिते ॥ ३६ ॥

वरदं वरदानं मुद्राविशेषं पायसापूर्णपात्रं च धारयन्त्यौ पुनः किम्भूते अरुणाश्यामले पुनः किदृश्यौ हारकुण्डलाभ्यां शोभिते॥३६॥

बलः शङ्खेन्दुधवलो मुसलं लाङ्गलन्दधत् ॥
हालालोलो नीलवासा हेलावानेककुण्डलः ॥३७॥

बलो बलभद्रः शङ्खेन्दुधवलः श्वेतः लाङ्गलं मुसलं बिभ्राणः पुनः कीदृशः हाला माध्वी तस्याः पाने चञ्चलः अमृष्यकारी पुनः कीदृशः नीलवासाः पुनः कीदृशः हेलावान् लीलावान् पुनः कीदृश एककुण्डलधारी ॥ ३७ ॥

कलायश्यामला भद्रा सुभद्रा भद्रभूषणा ॥
वराभययुता पीतवसना रूढयौवना ॥ ३८ ॥

सुभद्रा कलायश्यामला भद्रा समीचीना भद्रभूषणा शोभमानाभरणा पुनः किम्भूता वराभययुता पुनः किम्भूता पीतवसना पुनः किम्भूता प्रौढयौवना ॥ ३८ ॥

वेण्विति—

वेणुवीणावेत्रयष्टिशङ्खशृङ्गादिपाणयः ॥
गोपा गोप्यश्च विविधप्राभृतात्तकराम्बुजाः ॥
मन्दारादींश्च तद्बाह्ये पूजयेत्कल्पपादपान् ॥३९॥

वेणुर्वंशी वीणातन्त्री वेत्रं यष्टिः शङ्खः शृङ्गादि नानावस्तु पाणौ करे येषां एवंविशिष्टा गोपाः गोप्यः पुनर्नानाप्रकारं यत्प्राभृतमुपढौकनं तेनात्तमायत्तं वशीकृतं कराब्जं यासान्ताः पञ्चमावरणमाह—

मन्दारादीनिति । तद्बाह्ये तदनन्तरं मन्दारादीन् अग्रे वक्ष्यमाणान् कल्पवृक्षान् पूजयेत् ॥ ३९ ॥

मन्दारसन्तानकपारिजात ।
कल्पद्रुमाख्यान् हरिचन्दनं च ॥

मध्ये चतुर्दिक्ष्वपि वाञ्छितार्थ-
दानैकदक्षान् फलनम्रशाखान् ॥ ४० ॥

तानेवाह मन्दारेति कुत्र कः पूजनीयः तत्राह मध्ये इति मध्ये कर्णिकायां प्रथमपरित्यागे मानाभावात् प्रथमनिर्दिष्टवत् पूजा चतुर्दिक्षु पूर्वादिचतुर्दिक्षु एतादृशान् वाञ्छिता आकाङ्क्षिता ये अर्थास्तेषां दाने एके अद्वितीया दक्षाः तान् तथा फलैः नम्राःशाखायेषु तान् यद्वा आकाङ्क्षितदाने अद्वितीयसमर्थान् तथा फलै नम्राः शाखा येषु तान् ॥ ४० ॥

षष्ठावरणमाह—

हरीति—

हरिहव्यवाट्तरणिजक्षपाचरा-
ऽप्पतिवायुसोमशिवशेषपद्मजान् ॥
प्रयजेत् स्वदिक्ष्वमलधीः स्वजात्यधी-
श्वरहेतिपत्रपरिवारसंयुतान् ॥ ४१ ॥

हरिरिन्द्रः हव्यवाडग्निः तरणिजो यमः क्षपाचरो निशाचरो निर्ऋतिः अप्पतिर्वरुणः वायुः सोमः ईशः शेषोऽनन्तः पद्मजो ब्रह्मा एतान्स्वदिक्षु पूर्वादिदिक्षु निर्मलमतिः पूजयेत् अत्र निर्ऋतिवरुणयोर्मध्येऽनन्तं सोमेशानयोर्मध्ये ब्रह्माणं स्वदिक्ष्विति-कथनात् अन्यत्र कल्पितपूर्वादिदिक्षु पूजाऽवगम्यते ।

तदुक्तमागमान्तरे ।

देवाग्रेस्वस्यवाप्यग्रे प्राची प्रोक्ता च देशिकैः ।
प्राची प्राच्येव विज्ञेया मुक्तयेदेवतार्चनमिति ॥

कीदृशान् स्वजातिः इन्द्रत्वादिः अधीश्वरोऽधिपतिः हेतिः शस्त्रं पत्रं वाहनं परिवारो गणः एतैः संयुक्तान् एतेषां च बीजानि उच्चारयितव्यानि प्रयोगस्तु लं इन्द्राय सर्वसुराधिपतये सायुधाय सवाहनाय सपरिवाराय नम एवमन्यत्राप्यूहनीयः ॥४१॥

इदानीं वर्णमाह—

कपिशेति ।

कपिशकपिलनीलश्यामलश्वेतधूम्रा-
मलसितशुचिरक्ता वर्णतो वासवाद्याः ॥
करकमलविराजत्स्वायुधा दिव्यवेशा-
विविधमणिगणोस्रप्रस्फुरद्भूषणाढ्याः ॥ ४२ ॥

कपिशः कनकवर्णः कपिलस्ताम्रवर्णाभः श्यामलः कृष्णः श्वेतः शुक्लः धूम्रोऽसितभेदः अमलसितः श्वेतः शुचिरपि श्वेत एव रक्तो लोहित एते वासवाद्याः वर्णतो वर्णेन यथाक्रमं पूर्वोक्त क्रमतः पुनः कीदृशाः हस्तपद्मे शोभमानानि आयुधानि येषां ते पुनः उत्कृष्टवेशा नानाप्रकारमणिसमूहानां पद्मरागादीनाम् उस्रेण किरणेन प्रस्फुरद्देदीप्यमानं यद्भूषणं तेनाढ्या उपचिताः शोभमाना इत्यर्थः ॥ ४२ ॥

सप्तमावरणमाह —

दम्भोलीति ।

दम्भोलिशक्त्यभिधदण्डकृपाणपाश-
चण्डाङ्कुशाह्वयगदात्रिशिखारिपद्माः ॥
अर्च्या बहिर्निजसुलक्षितमौलियुक्ताः-
स्वीयायुधाभयसमुद्यतपाणिपद्माः ॥ ४३ ॥

दम्भोलिर्वज्रं शक्त्यभिधं शक्तिनामकमस्त्रं दण्डः कृपाणः खड्गः चण्डाङ्कुशाह्वयः उग्राङ्कुशाख्यः गदा त्रिशिखं त्रिशूलम् अरि चक्रं पद्मं च एतानि वाह्यवासवादितो बहिः सम्पूज्यानि दम्भोलिप्रभृतयः कीदृशाः निजसुलक्षितमौलियुक्ताः वज्रादिलाञ्छितमुकुटाः पुनः स्वस्वायुधैरस्त्रैरभयेन च समुद्यतं सुलक्षितं हस्तपद्मं येषां ते तथा ॥ ४३ ॥

वज्रादीनांवर्णमाह —

कनकेति ।

कनकरजततोयदाभ्रचम्पा-
रुणहिमनीलजवाप्रवालभासः ।

क्रमत इति रुचा तु वज्रपूर्वा-
रुचिरविलेपनवस्त्रमाल्यभूषाः ॥ ४४ ॥

वज्रपूर्वाः वज्राद्याः रुचा वर्णेन क्रमतोऽनुक्रमेणैवंरूपा ज्ञेयाः पुनः कीदृशाः काञ्चनं रौप्यं तोयदो मेघः अभ्रं मेघः चम्पकपुष्पम् अरुणो रक्तः हिमं श्वेतः नीलः श्यामलःजवा औण्ड्रपुष्पं प्रवालो नवपल्लवः एवंभूता दीप्तिर्येषान्ते तथा पुनः कीदृशाः रुचिरं मनो हरं विलेपनं चदनादि वस्त्रं माल्यं भूषणं च येषान्ते तथा ॥ ४४ ॥

पूर्वोक्तमुपसंहरति—
कथितमिति ।

कथितमावृतिसप्तकमच्युता-
र्चनविधाविति सर्वसुखावहम् ।
प्रयजतादथवाऽङ्गपुरन्दरा
शनिमुखैस्त्रितयावरणं त्विदम् ॥ ४५ ॥

इति पूर्वोक्तप्रकारेण विष्णुपूजाविधौ आवरणसप्तकं कथितं कीदृशं सकलसुखार्थदायकम् अशक्तं प्रत्याह प्रयजतादिति पूर्वोक्ताशक्तः त्रितयावरणम् आवरणत्रयसहितं प्रयजेत्कैः अङ्गम् इन्द्रवज्रं एतन्मुखैरेतत्प्रधानैरित्यर्थः ॥ ४५ ॥

प्रकृतमुपसंहरन्पूजान्तरमाह ।
इत्यर्चयित्वेति ।

इत्यर्चयित्वा जलगन्धपुष्पैः ।
कृष्णाष्टकेनाऽप्यथ कृष्णपूजाम् ॥
कुर्याद् बुधस्तानि समाह्वयानि ।
वक्ष्यामि तारादिनमोन्तकानि ॥ ४६ ॥

इति पूर्वोक्तप्रकारेण जलगन्धपुष्पैः पूजयित्वा अथानन्तरं कृष्णाष्टकेन वक्ष्यमाणेन बुधः पण्डितः कृष्णपूजां कुर्यात् तानि समाह्वयानि नामानि प्रणवादिनमोन्तकानि वक्ष्यमाणानि ॐ

कृष्णायनम इत्यादीनि ॥ ४६ ॥

तान्येव दर्शयति—

श्रीकृष्णइत्यादि ।

श्रीकृष्णो वासुदेवश्च नारायणसमाह्वयः ।
देवकीनन्दनो यदुश्रेष्ठो वार्ष्णेय इत्यपि ॥ ४७ ॥
असुरान्तकशब्दान्ते भारहारीति सप्तमः ।
धर्मसंस्थापकश्चाऽष्टौ चतुर्थ्यन्ताः क्रमादिमे ॥४८॥

असुरान्तकशब्दान्ते भारहारीत्यर्थः इमे कृष्णादयः शब्दाः क्रमादेकैकशः प्रणवाद्याश्चतुर्थ्यन्ता नमोन्तकाश्च विज्ञेयाः ॥४७॥४८॥

अत्यन्ताशक्तं प्रत्याह—

एभिरिति ।

एभिरेवाऽथवा पूजा कर्तव्या कंसवैरिणः ॥
संसारसागरोत्तीर्त्यै सर्वकामाप्तये बुधैः ॥ ४९ ॥

अथवा एभिरेव कृष्णादिभिः शब्दैः कंसवैरिणः श्रीकृष्णस्य पूजा बुधैः पण्डितैः कर्तव्या किमर्थं संसार एव सागरः तस्य उत्तीर्त्यै उत्तरणाय पुनः किमर्थं सकलमनोरथप्राप्त्यर्थम् ॥ ४९ ॥

धूपदानविधिं दर्शयति—

साराङ्गारे इति ।

साराङ्गारे घृतविलुलितैर्जर्जरैः संविकीर्णै ।
र्गुग्गुल्वाद्यैर्घनपरिमलैर्धूपमापाद्य मन्त्री ॥
दद्यान्नीचैर्दनुजमथनाया ऽपरेणा ऽथ दोष्णा ।
घण्टां गन्धाक्षतकुसुमकैरर्चितां वादयानः ॥५०॥

साराङ्गारे दृढकाष्ठाङ्गारे खादिराङ्गारे इति त्रिपाठिनः संविकीर्णैः क्षिप्तैः गुग्गुल्वाद्यैः गुग्गुलुशर्करामधुचन्दनागुरूशीरैः घृतविलुलितैर्घृतप्लुतैः जर्जरैः कुट्टनेन चूर्णितैर्घनपरिमलैर्निबिडसौरभशालिभिः धूपमापाद्य कृत्वा मन्त्री उपासकः नीचै-

नाभिप्रदेशे दनुजमथनाय गोपालकृष्णाय दद्यात् किङ्कुर्वन् अथा ऽनन्तरम् अपरेण वामेन दोष्णा हस्तेन गजध्वनिमन्त्रमातः स्वाहेति घण्टाम्वादयन् किम्भूतां गन्धाक्षतपुष्पैः पूजिताम् ॥ ५० ॥

दीपदाने विधिं दर्शयति—

तद्वदिति ।

तद्वद्दीपं सुरभिघृतसंसिक्तकर्पूरवर्त्या ।
दीप्तं दृष्ट्याद्यातिविशदधीः पद्मपर्यन्तमुच्चैः ॥
दत्वा पुष्पाञ्जलिमपि विधायाऽर्पयित्वा च पाद्यं-
साचामं कल्पयतु विपुलस्वर्णपात्रे निवेद्य ॥ ५१ ॥

तद्वदापाद्य दीपं कुर्यात् कया सुरभि सुगन्धि यद्घृतं तेन सिक्ता उक्षिता कर्पूरसहिता वर्त्तिः तया कीदृशं दृष्ट्या दीप्तं दृष्टिमनोहरमिति रुद्रधरः पद्मपर्यन्तं मस्तकपर्यन्तमुच्चैरुपरि दत्वा दृष्ट्यादीति दक्षिणावर्त्तेन पद्मपर्यन्तं चरणकमलपर्यन्तमिति त्रिपाठिनः पादपर्यन्तमिति क्वचित्पाठः अनन्तरं पुष्पाञ्जलिमपि शिरसि दत्वा-पाद्याचमनीये च दत्वा विपुलस्वर्णपात्रे बृहत्कनकभाजने नैवेद्यङ्कल्पयतु सम्पादयतु साचामम् आचमनसहितं प्रथमं वदनेत्यादिभिराचमनन्दत्वा अनन्तरं नैवेद्यन्दद्यादित्यर्थः ॥ ५१ ॥

नैवेद्यस्वरूपं दर्शयति—

सुरभीति ।

सुरभितरेण दुग्धहविषा सुशृतेन सिता-
ससमुपदंशकैरुचिरहृद्यविचित्ररसैः ॥
दधिनवनीतनूतनासितोपलपूपपुलि-
घृतगुडनारिकेलकदलीफलपुष्परसैः ॥ ५२ ॥

अतिसुरभिणा दुग्धान्नेन सुशृतेन सुपक्वेन सितासमुपदंशकैः शर्कराव्यञ्जनैः सह शर्करयासहउपदंशकैर्व्यञ्जनैरितित्रिपाठिनः अस्मिन्पक्षे शुचितेन सितासमुपदंशकैरितिपाठः रुचिर इच्छाकरः हृद्यः सुस्वादुः विचित्रो मधुरादिरसो येषु तैः नूतनं श्रेष्ठं

सितोपलं खण्डादिप्रसिद्धं पुष्परसो मधु एतैर्द्रव्यैर्नैवेद्यं कल्पयतु॥५२॥

किंविशिष्टं नैवेद्यं कल्पयतु तत्राह—

अस्त्रोक्षितमिति ।

अस्त्रोक्षितं तदरिमुद्रिकयाऽभिरक्ष्य ।
वायव्यतोयपरिशोषितमग्निदोष्णा ॥
संदह्य वामकरसौधरसाभिपूर्णं ।
मन्त्रामृतीकृतमथाऽभिमृषन्प्रजप्यात् ॥ ५३ ॥
मनुमष्टशः सुरभिमुद्रिकया ।
परिपूर्णमर्चयतु गन्धमुखैः ॥
हरिमर्चयेदथ कृतप्रसवा-
ञ्जलिरास्यतोऽस्य प्रसरेच्च महः ॥ ५४ ॥

मूलमन्त्रास्त्रमन्त्रेणाऽस्त्रायफडित्यनेन वा उक्षितं सिक्तं चक्रमुद्रयाऽभिरक्ष्य वायव्येति वायुबीजजप्तोदकप्रोक्षणपरिशोषितदोषम् अग्निदोष्णा संदह्येति रमितिवह्निबीजाभिजप्तदक्षिणकरेण स्पृष्ट्वा दोषान् दग्ध्वा वामकरसौधरसाभिपूर्णमिति वामहस्तेन पिधाय वंबीजजपेनाऽमृतरसाभिपूर्णं विचिन्त्य मूलमन्त्रेणाऽमृतरूपं विचिन्त्याऽथाऽनन्तरं तदेतादृशं नैवेद्यम् अभिमृशन् स्पृष्ट्वा मनुं मन्त्रम् अष्टशः अष्टवारं प्रजपतु सुरभिमुद्रिकया धेनुमुद्रिकया परिपूर्णं नैवेद्यं विचिन्त्य गन्धमुखैः चन्दनाद्यैः पूजयतु दानप्रकारं दर्शयति हरिमित्यादिना कृतप्रसवाञ्जलिर्हरिं प्रत्यर्चयेत् नैवेद्यग्रहणायाऽऽस्यतस्तेजो निःसरत्विति प्रार्थयेत् अथानन्तरम् अस्य हरेरास्यतो मुखतस्तेजो निः सरेत् प्रसरत्विति चिन्तयेत् नैवेद्ये संयोजयेदिति त्रिपाठिनः ॥ ५३ ॥ ५४ ॥

वीतिहोत्रदयितान्तमुच्चरन् ।
मूलमन्त्रमथ निक्षिपेज्जलम् ॥
अर्पयेत्तदमृतात्मकं हवि-
र्दोर्युजा सकुसुमं समुद्धरन् ॥ ५५ ॥

अथानन्तरं वौषडिति होत्रदयितान्तं स्वाहाकारान्तं मूलमन्त्रमुच्चरन् किञ्चिज्जलन्तदुपरि क्षिपेत् प्रोक्षयेत् अत्र स्वाहान्तेपि मन्त्रे पुनः स्वाहापदप्रयोगः कार्यः एतन्मूलादेव अनन्तरन्दोर्युजा हस्तद्वयेन सकुसुमं सपुष्पं समुद्धरन् उत्तोलयन् तदमृतात्मकं हविः समर्पयेत्॥५५॥

नैवेद्यार्पणमन्त्रमाह—

निवेदयामीति ।

निवेदयामि भगवते जुषाणेदं हविर्हरे ।
निवेद्यार्पणमन्त्रोऽयं सर्वार्चासु निजाख्यया॥५६॥

अयं मन्त्रः सर्वासु देवानां पूजासु निजाख्ययेति हरे इत्यस्मिन् स्थाने यस्मै देवाय दीयते तन्नामग्रहणं कर्तव्यमिति-निजाख्याशब्दार्थः निवेद्याख्ययेति केचित् ॥ ५६ ॥

भोजनोपयोगिमुद्राविशेषं दर्शयति—

ग्रासेति ।

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयेद्दक्षिणेन प्राणादीनां च दर्शयेत् ॥ ५७ ॥

वामदोष्णा ग्रासमुद्रां दर्शयेत् किम्भूतां प्रफुल्लोत्पलसदृशीम् । अनन्तरं दक्षिणहस्तेन प्राणादीनां वक्ष्यमाणां मुद्रां दर्शयेदिति ॥५७॥

प्राणादीनां मुद्रां दर्शयति—

स्पृशेदिति ।

स्पृशेत्कनिष्ठोपकनिष्ठिके द्वे ।
अङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ॥
तथाऽपरा तर्जनिमध्यमे स्या ।
दनामिकामध्यमिके च मध्या ॥ ५८ ॥
अनामिकातर्जनिमध्यमाः स्या ।
त्तच्चतुर्थी सकनिष्ठिकास्ताः ॥

**स्यात्पञ्चमी तद्वदिति प्रदिष्टाः ।
प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥ ५९ ॥**

कनिष्ठोपकनिष्ठिके कनिष्ठानामिके द्वे स्वाङ्गुष्ठमूर्द्ध्नी स्पृशेत् इह मुद्रा प्रथमा तथा तर्जनीमध्यमे स्वाङ्गुष्ठमूर्द्ध्नी स्पृशेत् अनामिकामध्यमिके च तेन स्पृशेदेवं व्यानमुद्रा अनामातर्जनीमध्यमाः तेन स्पृशेत् चतुर्थी उदानस्य तास्तिस्त्रः कनिष्ठासहिताः तद्वत् स्वाङ्गुष्ठमूर्द्ध्नी यदि स्पृशेत्तदा समानमुद्रा इत्यनेन प्रकारेण प्राणादिमुद्राः प्रदिष्टाः कथिताः किम्भूताः यथायोग्यस्वमन्त्रसहिताः मन्त्रसाहित्येन तासां मुद्रात्वम्भवति विल्वमुद्रावदित्यर्थः ॥ ५८ ॥ ५९ ॥

के ते मन्त्रा इत्याकाङ्क्षायां प्राणादीनां मन्त्रानाह—

प्राणेति ।

**प्राणापानव्यानोदानसमानाः क्रमाच्चतुर्थ्यन्ताः ।
ताराधारा वध्वा चेद्धाः कृष्णाध्वनस्त्विमे मनवः॥६०**

प्राणादयः पञ्च क्रमाच्चतुर्थीविभक्तिसाहिताः तथा ताराधाराः ॐकाराधाराः प्रणवाद्या इत्यर्थः तथा कृष्णाध्वनोऽग्नेर्वध्वा प्रियया इद्धा उद्दीप्ताः सम्बद्धाः स्वाहाकारान्ता इत्यर्थः एवं च सति ॐप्राणायस्वाहाइत्याद्याः पञ्च मन्त्रा भवन्तीत्यर्थः ॥ ६० ॥

निवेद्यमुद्रां प्रदर्शयन्मन्त्रं च दर्शयति—

**ततो निवेद्य मुद्रिकां प्रधानया करद्वये ॥
स्पृशन्ननामिकां निजं मनुं जपन् प्रदर्शयेत् ॥६१॥**

ततस्तदनन्तरं निवेद्यमुद्रां प्रदर्शयेत् किंकुर्वन् करद्वये करयोरनामिकां प्रधानया ऽङ्गुष्ठेन स्पृशन् पुनः किंकुर्वन् निजं स्वीयं मनुं मन्त्रं प्रजपन् ॥ ६१ ॥

मन्त्रमुद्धरति—

नन्देति ।

नन्दजोऽम्बुमनुविन्दुयुङ्नतिः ।
पार्श्वरामरुद्वात्मने ऽनि च ॥
रुद्धङ्युक्निवेद्य मात्मभू ।
मांसपार्श्वमनिल स्तथाऽमियुक् ॥ ६२ ॥

नन्दजः ठकारः अम्बु वकारः मनुः औकारः विन्दुः एतैर्युक्ता नतिर्नमः पार्श्वः पकारः राइति स्वरूपं मरुत् यकारः अवात्मने इति ऽनिस्वरूपं रुद्ध इति स्वरूपं ङेचतुर्थी अनिरुद्धशब्दश्चतुर्थीयुक्त इत्यर्थः निवेद्यमिति त्रयः आत्मभूः ककारः मांसो लकारः पार्श्वः पकारः लकारयकाराभ्यां युक्तोऽनिलो यकारः अमीति स्वरूपं तथा ठौँनमः परायाऽवात्मने अनिरुद्धाय नैवेद्यं कल्पयामि इतिमन्त्रः ॥ ६२ ॥

मण्डलमभित इति—

मण्डलमभितो मन्त्री
बीजाङ्कुरभाजनानि विन्यस्य ।
पिष्टमयानपि दीपान्
घृतपूर्णान् विन्यसेत्सुदीप्तशिखान् ॥ ६३ ॥

मण्डलपरितो वीजाङ्कुरपात्राणि संस्थाप्य तथैव पिष्टकृतान् घृतपरिपूर्णान् प्रज्वलितशिखान् प्रदीपान् स्थापयेत् ॥ ६३ ॥

दीक्षाङ्गहोमविधिं दर्शयति—

अथेति ।

अथ संस्कृते हुतवहेऽमलधी-
रभिवाद्य सम्यगभिपूज्य हरिम् ॥
जुहुयात् सिताघृतयुतेन पयः-
परिसाधितेन सितदीधितिना ॥ ६४ ॥

अष्टोत्तरं सहस्रं समाप्य होमं पुनर्बलिं दद्यात् ।
राशिष्वधिनाथेभ्यो नक्षत्रेभ्यस्ततश्च करणेभ्यः ॥६५॥

अथानन्तरं शास्त्रोक्तसंस्कारैः संस्कृते वह्नौ निर्मलबुद्धिः यथोक्तरूपं हरिमावाह्य गन्धादिभिश्च यथाविधि संपूज्याऽष्टोत्तरसहस्रं जुहुयात् केन सितदीधितिना भक्तेन कीदृशेन पयःपरिसाधितेन दुग्धपरिपाचितेन परमान्नेनेत्यर्थः पुनः कीदृशेन सिताघृतयुतेन शर्कराघृतसहितेन अनन्तरं यथोक्तहोमं समाप्याऽवशिष्टपरमान्नेन राशिषु मेषादिषु अधिनाथेभ्यो राशिदेवताभ्यो मङ्गलादिभ्यः नक्षत्रेभ्योऽश्विन्यादिभ्यः करणेभ्यो ववादिभ्यो बलिं दद्यात् प्रयोगस्तु मेषवृश्चिकाधिपतये मङ्गलाय एष बलिर्नमः एवं वृषतुलाधिपतये शुक्राय मिथुनकन्याधिपतये बुधाय कर्कटाधिपतये चन्द्राय सिंहाधिपतये सूर्याय धनुर्मीनाधिपतये गुरवे मकरकुम्भाधिपतये शनये एष बलिर्नमः एवम् अश्वनीभरणीकृत्तिकापादीयमेषराशये एष बलिर्नम इत्यादि एवं ववबालवकौलवतैतिलगरवणिजाविष्टिभ्यः एष बलिर्नमः ॥ ६४ ॥ ६५ ॥

पूजानन्तरं प्रकारमाह—

सम्पाद्येति ।

सम्पाद्य पानीयसुधां समर्प्य ।
दत्वाऽम्भ उद्वास्य मुखार्चिरास्ये ॥
नैवेद्यमुद्धृत्य निवेद्य विष्वक्-
सेनाय पृथ्वीमुपलिप्य भूयः ॥ ६६ ॥

पानीयमेव धेनुमुद्रया सुधां कृत्वा पानार्थं कृष्णाय समर्प्याऽम्भो दत्वा जलमाचमनार्थं दत्वा मुखार्चिर्देवमुखान्नैवेद्येऽवतारितं तेजः आस्ये देवमुखे उद्वास्य निवेश्य नैवेद्यमुत्तोल्य विश्वक्सेनाय देवगणाय नैवेद्यं समर्प्य पृथिवीमुपलिप्य ॥ ६६ ॥

गण्डूषदन्तधवनाचमनास्यहस्त-
मृज्यानुलेपमुखवासस्रमाल्यभूषाः ।

ताम्बूलमप्यभिसमर्प्य सुवाद्यनृत्य-
गीतैः सुतृप्तमभिपूजयतात्पुरेव ॥ ६७ ॥

भूयः पुनरपि गण्डूषं चलुकोदकं दन्तधवन दन्तकाष्ठं दन्तधव-नन्दन्तधावनमितित्रिपाठिनः आचमनं शेषाचमनंद्विराचमनम् आस्यहस्तयोर्मृज्यं मुखहस्तयोः प्रोञ्छनवस्त्रम् अनुलेपश्चन्दनादिः मुखं वास्यते सुरभि क्रियते अनेनेति मुखवासकर्पूरादि माल्यं पुष्पं भूषाऽलङ्करणं ताम्बूलमपि समुच्चये एतानि समर्प्य पुनरेव यथापूर्व पूजा कृता एवं सुवाद्यनृत्यगीतैः सुतृप्तंहरिं नत्वा अभिपूजयेत् ॥६७॥

गन्धादिभिः सपरिवारमथाऽर्घमस्मै ।
दत्वा विधाय कुसुमाञ्जलिमादरेण
स्तुत्वा प्रणम्य शिरसा चुलुकोदकेन
स्वात्मानमर्पयतु तच्चरणाब्जमूले ॥ ६८ ॥

केगन्धादिभिः सपरिवारं पूर्वोक्तावरणसहितम् अथानन्तरम् अस्मै हरये अर्घ्यं दत्वा आदरेण पुष्पाञ्जलिन्दत्वा स्तुत्वा शिरसा प्रणम्य तच्चरणारविन्दमूले स्वात्मानं चुलुकेन अर्घ्यशेषजलेन समर्प्पयतु ॥ ६८ ॥

आत्मनः समर्पणमन्त्रमाह—

इत इत्यादिना स्वात्मसमर्प्पणं इत्यन्तेन ग्रन्थेन ।

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां मुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीय च सकलं हरये सम्यगर्प्पये ॐतत्सदिति च प्रोक्तमन्त्रः स्वात्मसमर्पणे ॥

अनुस्मरन्कलशगमच्युतं जपेत् ।
सहस्रकं मनुमथ साष्टकं बुधः ॥

वपुष्यथो दितिजजितः समावृती-
र्विलाप्य तास्तदपि नयेत्सुधात्मताम् ॥ ६९ ॥

एतच्च मन्त्रत्रयं स्पष्टत्वान्नालिख्यते

अनुस्मरन्निति—

अथानन्तरं बुधः पण्डितः कलशगकुम्भादिनिष्ठं हरिश्चिन्तयन् साष्टकम् अष्टसहितं सहस्रं मनुं मन्त्रं जपेत् अथानन्तरं दितिजजितः श्रीकृष्णस्य वपुषि शरीरे ताः पूर्वोक्ताः समावृतीः आवरणदेवता विलाप्य विलीना इति विचिन्त्य तदपि देववपुः सुधात्मताम् अमृततां नयेत् ॥ ६९ ॥

ध्वजेति—

ध्वजतोरणदिक्कलशादिगता-
मपि मण्डपमण्डलकुण्डगताम् ॥
अभियोज्य चितिं कलशे कुसुमैः ।
परिपूज्य जपेत्पुनरष्टशतम् ॥ ७० ॥

कलशे चितिं मन्त्रदेवतां चैतन्यरूपम् अभियोज्य कुसुमैः पुष्पैः सम्पूज्य पुनरष्टसहितं शतं जपेत् किम्भूतां चितिं ध्वजतोरणदिक्कलशादिगतां न केवलं ध्वजादिगताम् अपितु मण्डले मण्डपे कुण्डगताम् ॥ ७० ॥

अथेति—

अथ शिष्य उपोषितः प्रभाते ।
कृतनैत्यः सुसिताम्बरः सुवेशः ॥
धरणीधनधान्यगोकुलै-
र्धिनुयाद्विप्रवरान् हरेः प्रसत्त्यै ॥ ७१ ॥

अथानन्तरम् उपोषितः कृतोपवासः शिष्यः प्रभाते प्रातः काले कृतनित्यकृत्यः शुक्लवस्त्रधरः सुवेशः शोभनभूषणः धरणी पृथिवी धनं सुवर्णादि धान्यं व्रीह्यादि गौर्दोग्ध्री दुकूलं पट्टवस्त्रम् एतैर्यथा

योग्यं विप्रवरान् ब्राह्मणश्रेष्ठान् धिनुयात् प्रीणयेत् किमर्थं हरेः श्रीकृष्णस्य प्रसादार्थम् ॥ ७१ ॥

भूय इति—

भूयः प्रतर्प्य प्रणिपत्य देशिकं ।
तस्मै परस्मै पुरुषाय देहिने ॥
तां वित्तशाठ्यं परिहृत्य दक्षिणां ।
दत्वा तनुं स्वां च समर्पयेत्सुधीः ॥ ७२ ॥

भूयः पुनरपि प्रतर्प्य ब्राह्मणान् सन्तोष्य पुनः कथनम् अत्यन्त तर्पणार्थं परीत्येति पाठे प्रदक्षिणी कृत्येत्यर्थः देशिकं गुरुं प्रणिपत्य नमस्कृत्य तस्मै गुरवे देहिने देहधारिणे परस्मै पुरुषाय श्रीकृष्णाय धनशाठ्यं परिहृत्य वैभवानुसारेण तां प्रसिद्धां वित्तार्द्धं चतुर्थांशं वा दत्वा न तु दक्षिणामिव मन्त्रादानानन्तरमेव तत्प्रसङ्गात्स्वां स्वीयां तनुं सुबुद्धिः समर्पयेत् ॥ ७२ ॥

अथेति—

अथाऽभिषेकमण्डपे सुखोपविष्टमासने ।
गुरुर्विशोधयेदमुं पुरेव शोषणादिभिः ॥ ७३ ॥

अथानन्तरं गुरुः अमुं शिष्यं पुरेव पूर्ववदेव शोषणादिभिः भूतशुद्ध्यादिभिर्विशोधयेत् कीदृशम् अभिषेकमण्डपे आसने सुखोपविष्टम् ॥ ७३ ॥

पीठेति—

पीठन्यासावसानं वपुषि विमलधीर्न्यस्य तस्यासिकाया-
मन्त्रेणाऽभ्यर्च्य दूर्वाक्षतकुसुमयुतां रोचनां के निधाय ॥
आशीर्वादैर्द्विजानां विशदपटुरवैर्गीतवादित्रघोषै-
र्माङ्गल्यैरानयत्तं कलशमभिवृतस्तत्समीपं प्रतीतः ॥ ७४ ॥

तस्य शिष्यस्य वपुषि शरीरे पीठन्यासावसानं पीठन्यासपर्यन्तं सकलं न्यासं विनस्य आसिकाया आसनस्य मन्त्रेणासनं पूजयित्वा

रोचनां मस्तके निधाय तिलकं कारयित्वा कीदृशीं रोचनां दूर्वाक्षतपुष्पसहिताम् अनन्तरं द्विजानामाशीर्वादैर्गीतिमङ्गलादिशब्दैः कीदृशैरेतै विशदपटुरवैः स्पष्टोत्तमशब्दैः तथा अन्यैरपि माङ्गल्यै मङ्गलस्योपयुक्तैः सहितं तं कलसम् अभिवृतः आचार्यत्वेन वृतः तत्समीपं शिष्यसमीपम् आनयेत् कीदृशः शिष्यात्मीयतया प्रतीतो विश्वासान्वितो यः कश्चिदित्यर्थः इतित्रिपाठिनः ॥ ७४ ॥

तेनेति—

तेनाऽभिलीनमणिमन्त्रमहौषधेन ।
धाम्ना परेण परमामृतरूपभाजा ॥
सम्पूरयन्वपुरमुष्य ततो वितन्वन् ।
तत्सामरस्यमभिषेचयताद्यथावत् ॥ ७५ ॥

कुम्भस्य पल्लवान् शिष्यशिरसि निधाय तेनकलसेनेत्यर्थाद्यथावत् यथायुक्तप्रकारेणाऽभिषेचयेत् अभिषेचनं कुर्यात् ।

तदुक्तम् ।

विधिवत् कुम्भमुद्धृत्य तन्मुखस्थान् सुरद्रुमान् ।
शिशोः शिरसि विन्यस्य मातृकां मनसा जपेदिति ॥

किम्भूतेन अभिलीनः सल्लीनः मणिर्नव रत्नानि मन्त्रः ऋक् महौषधं दिव्यपिप्पलीप्रभृति यत्र तेन कीदृशेन परेण धाम्ना परतेजःस्वरूपेण पुनः कीदृशेन परमामृतरूपभाजा परमामृतरूपमयेन किङ्कुर्वन् अमुष्य शिशो वपुः शरीरं पूरयन् किङ्कुर्वन् ततस्तदनन्तरं तत्सामरस्यं तेन तेन तेजोरूपेण कलशैक्यं वितन्वन् ॥ ७५ ॥

अभिषेकमाह—

क्षाद्यैरित्यादि ।

क्षाद्यैरान्तैर्वर्णैरभिपूर्णैरनुस्त्रिरुक्तमन्त्रान्तैः ।
परिहितसिततरवसनद्वितीयो वाचंयमः समाचान्तः ७६

क्षआदिर्येषां तैः आन्तैः अकार अन्तो येषां तै वर्णै मातृकाक्षरै

मूलमन्त्रत्रिजपावसानैरभिषिक्तशरीरः शिष्यः धृतनवीनातिशुक्ल-वसनयुगलः मौनी कृतद्विराचमनः ॥ ७६ ॥

बहुशः प्रणम्य देशिकनामानं हरिमथोपसङ्गृह्य ।
तद्दक्षिणत उपास्तामभिमुखमेकाग्रमानसः शिष्यः॥७७॥

बहुवारं देशिकनामानं गुरुरूपं हरिं नत्वा अथानन्तरम् उपसंगृह्य गुरुचरणौ व्यत्यस्तहस्तद्वयं कृत्वा तद्दक्षिणतो गुरुदक्षिणे अभिमुखं गुरुसन्मुखम् एकाग्रमानसः एकचित्तस्तिष्ठेत् उपविशेत् ॥ ७७ ॥

न्यासैरिति ।

न्यासैर्यथाविधि तमच्युतसान्निधाय ।
गन्धाक्षतादिभिरलङ्कृतवर्ष्मणोऽस्य ॥
ऋष्यादियुक्तमथ मन्त्रवरं यथावद् ।
ब्रूयात्त्रिशो गुरुरनर्घ्यमवामकर्णे ॥ ७८ ॥

अथानन्तरं यथाविधि यथोक्तप्रकारेण न्यासैः पञ्चाङ्गन्यासादिभिः ते शिष्यम् अच्युतसान्निधाय श्रीकृष्णरूपं कृत्वा गन्धाक्षतपुष्पैः विभूषितशरीरस्याऽस्य अवामकर्णे दक्षिणकर्णे ऋषिच्छन्दोदेवतासहितम् अनर्घ्यममूल्यं मन्त्रवरं मन्त्रश्रेष्ठं त्रिशः त्रिवारं ब्रूयात् यथावत् यथोक्तप्रकारेण स च प्रकारः प्रथमं दक्षिणहस्ते गुरुर्जलं ददाति अमुकमन्त्रं ददामीति अनेन शिष्योऽपि देहि इति ब्रूयात् ततो मन्त्रं दद्यादिति अत्राऽवश्यं वारत्रयं गुरुणा मन्त्रः पठनीयः दत्ते यावच्छिष्यस्य मन्त्रः स्वायत्तो भवति तावत्पठनीय इति ॥ ७८ ॥

मन्त्रग्रहणानन्तरं शिष्यकृत्यं दर्शयति—

गुरुणेति ।

गुरुणा विधिवत्प्रसादितं,।
मनुमष्टोर्ध्वशतं प्रजप्य भूयः ॥
अभिवाद्य ततः श्रृणोतु सम्यक्-
समयान्भक्तिभरेण नम्रमूर्त्तिः ॥ ७९ ॥

यथाविधि गुरुणा हेतुना प्राप्तं मन्त्रं प्रसाधितम् अनुग्रहेण दत्तमिति त्रिपाठिनः अष्टौ ऊर्द्धं यस्य तस्य तदष्टाधिकशतं प्रजप्य भूयः पुनरपि गुरुमभिवाद्य नमस्कृत्य दण्डवत्प्रणम्य ततो गुरुतः समयान् आचारान् सम्यक्कृत्वा शृणोतु यत्तु विद्यामष्टकृत्वो जपेदिति तत्तन्न्यूनसङ्ख्याकजपनिषेधपरं कीदृशो भक्त्यतिशयेन नम्रशरीरः ॥७९॥

मन्त्रदानानन्तरं गुरुकृत्यमाह—

दत्त्वेति ।

दत्त्वा शिष्याय मनुं न्यस्याऽथ गुरुः कृतात्मयजनाविधिः ॥
अष्टोत्तरं सहस्रं स्वशक्तिहान्यनवाप्तये जप्यात् ॥८०॥

अथानन्तरं गुरुः शिष्याय मन्त्रं दत्वा न्यस्य न्यासादिकं कृत्वा कृतात्मयजनाविधिः कृताभ्यन्तरयागः अष्टाधिकं सहस्रं स्वसामर्थ्यहान्यनवाप्तये स्वसामर्थ्यरक्षार्थं दत्तमन्त्रं जपेत् ॥ ८० ॥

शिष्यकृत्यमाह—

कुम्भादिकमिति ।

कुम्भादिकं च सकलं गुरवे समर्प्य ।
सम्भोजयेद् द्विजवरानपि भोज्यजातैः ॥
कुर्वन्त्यनेन विधिना य इहाऽभिषेकं ।
ते सम्पदां निलयनं हि त एव धन्याः ॥ ८१ ॥

कुम्भादिकं सकलं मण्डलसहितं मण्डपावस्थितद्रव्यं गुरवे समर्प्य दत्वा भोज्यसमूहै द्विजश्रेष्ठान्सन्तोषयेत् एतत्करणस्य फलमाह इह जगति अनेन विधिना अनया परिपाट्या ये अभिषेकं कुर्वन्ति ते सम्पदां सर्वसमृद्धीनां निलयनं स्थानं त एव धन्याः पुरुषार्थभागिनः ॥ ८१ ॥

उक्तमर्थमुपसंहरति—

सङ्क्षिप्येति ।

संक्षिप्य किञ्चिदुदिता दीक्षा संस्मरणाय हि विशदधियाम्

एतां प्रविश्य मन्त्री सर्वान् जपेज्जुहोतु यजेच्च मनून् ॥८२॥

इति श्रीकेशवाचार्य विरचितायां
क्रमदीपिकायां दीक्षापूजानामचतुर्थपटलः ॥४॥

किञ्चित् सङ्क्षिप्य दीक्षा उक्ता कथिता विशदधियां निर्मलबुद्धीनां संस्मरणाय एतां दीक्षां प्रविश्य प्राप्य मन्त्री साधकः सर्वान् मन्त्रान् जपेत् यजेज्जुहोतु ॥ ८२ ॥

इति श्रीक्रमदीपिकायां चतुर्थपटलः ॥ ४ ॥

अधुना दीक्षितस्य मन्त्रविधिं दर्शयति—

चैत्रे कृत्वैतन्मासि कर्माऽच्छपक्षे ।
पुण्यर्क्षे भूयो देशिकात्प्राप्य दीक्षाम् ॥
तेनाऽनुज्ञातः पूर्वसेवां द्वितीये ।
मासि द्वादश्यामारभेताऽमलायाम् ॥ १ ॥

चैत्रे मासि पुण्यर्क्षे शुभनक्षत्रे अच्छपक्षे शुक्लपक्षे एतत्कर्म मन्त्रदीक्षात्मकं कर्म कृत्वा भूयः पुनरपि देशिकात् गुरोर्दीक्षां मन्त्रोपदेशं प्राप्याऽनन्तरं तेन गुरुणा ऽनुज्ञात. द्वितीये मासि वैशाखे अमलायां द्वादश्यां तिथौ पूर्वसेवां पुरश्चरणमारभेत् ।

चैत्रे दुःखाय दीक्षा स्यात्-

इति वचनं गोपालमन्त्रभिन्नदीक्षाविषयम् ॥ १ ॥

कृत्वेति—

कृत्वा स्नानाद्यं कर्म देहार्चनान्तं ।
वर्त्माऽऽश्रित्य प्रागीरितं मन्त्रिमुख्यः ॥

शुद्धो मौनी सन् ब्रह्मचारी निशाशी ।
जप्याच्छान्तात्मा शुद्धपद्माक्षदाम्ना ॥ २ ॥

मन्त्रिमुख्यः साधकः स्नानमारभ्यात्मयागान्तं कर्म कृत्वा प्रागीरितं वर्त्माऽऽश्रित्य पूर्वोक्तपूजाप्रकारमाश्रित्य शुद्धो गायत्रीजपेन निष्पापः ब्राह्मणाद्युक्तबाह्यान्तरशौचयुक्तो मौनी वाग्यतः ब्रह्मचारी अष्टविधमैथुनत्यागी निशाशी रात्रिभोजी शान्तात्मा अनुद्धतचित्तः शुक्लपद्मबीजमालया जप्यात् ।

अत्रैवमागमान्तरोक्तं बोद्धव्यम् ।

शुभे दिने कोशं कोशद्वयं वा क्षेत्रं विहारार्थं परिकल्प्य क्षीरद्रुमभववितस्तिपरिमिताऽष्टकीलकाः प्रत्येकमेकदैव वा दशकृत्वः शतकृत्वो वा जपित्वा अष्ट दिग्देवताः संपूज्य मध्ये क्षेत्रे क्षेत्रपालबलिं दत्त्वा पूजां कृत्वा पूर्वाद्यष्टदिक्षु तान्निखन्यात् तत्र तत्र तत्तन्नाम्ना दिक्पतिबलिं च दत्त्वा दीपकं च दत्त्वा जपपूर्वदिवसे एकभोजनमुपवासो वा गुरुं ब्राह्मणांश्च तर्पयेत् ।

तथाच सनत्कुमारकल्पे ।

विप्रांश्च भोजयेदन्नभोजनाच्छादनादिभिः ।
बहुभिर्वस्त्रभूषाभिः सम्पूज्य गुरुमात्मनः ॥
आरभेत जपं पश्चात् तदनुज्ञापुरस्सरमिति ।

ततोऽग्रिमदिने स्नानादिकं कृत्वा सङ्कल्पं कुर्यात् ॐ अद्येत्यम इत्याद्युच्चार्याऽमुकमन्त्रस्य सिद्धिकाम इयत्संख्याकजपतद्दशांशामुकद्रव्यहोमतद्दशांशामुकद्रव्यतर्पणतद्दशांशामुकाभिषेकतद्दशांशब्राह्मणसम्प्रदानकभोज्यदानात्मकपुरश्चरणकर्म करिष्ये इति सङ्कल्पं कुर्यात् ततो मन्त्रर्षिच्छन्दोदेवतानां कामस्थाने पुरश्चरणजपे विनियोग इति ।

जपे चायं नियमः ।

नैरन्तर्यविधिः प्रोक्तो न दिनं व्यतिलङ्घयेत् ।
शयनं दर्भशय्यायां शुचिः प्रयतमानसः ।
दिवसातिक्रमे दोषः सिद्धिबाधः प्रजायते ।
नारदीये ।

शनैः शनैरविस्पष्टं न द्रुतं न विलंबितम् ।
न न्यूनं नाधिकं वाऽपि जपं कुर्याद् दिने दिने ।
तथान्यत्र ।
अनन्यमानसः प्रातः कालान् मध्यंदिनावधि ।
नारदीये तथैव च ।
नवदन्नस्वपन् गच्छन्नान्यत्किमपि संस्मरन् ।
न क्षुज्जृम्भणहिक्कादिविकलीकृतमानसः ।
मन्त्रासिद्धिमवाप्नोति तस्माद्यत्नपरो भवेत् ।
उष्णीषी कञ्चुकी नग्नो मुक्तकेशः तथैव च ।
प्रसारितपाणिपाद नोच्चपादासनो भवेत् ।
तथा वैशम्पायनसंहितायाम् ।
स्नानं त्रिसवनं प्रोक्तमशक्तौ द्विः सकृ त्तथा ।
अस्नातस्य फलं नाऽस्ति न चाऽतर्प्पयतः पितॄन् ।
नाऽसन्यमभिभाषेत नेन्द्रियाणि प्रलोभयेत् ।
शयनं दर्भशय्यायां शुचिः प्रयतमानसः ।
तद्वासः क्षालयेन्नित्यमन्यथा विभ्रमावहेत् ।
नैकवासा जपेन्मन्त्रं बहुवस्त्री कदाचन ॥
उपर्यधो बहिर्वस्त्रे पुरश्चरणकृद्व्रजेत् ।
तथा नारदीये ।
स्त्रीशूद्राभ्यां न सम्भाषे द्रात्रौ जपपरो न च ।
जपेन्न सन्ध्याकालेषु प्रदोषे नो भयेषु च ।
ब्राह्मणानीतवस्त्रशुद्धजलेनकर्मकृद्भवेदिति ॥ २ ॥

जपितुः कृत्यमाह—

तन्वन्निति ।

तन्वन् शुश्रूषां गोषु ताभ्यः प्रयच्छन् ।
ग्रासं भूतेषु प्रोद्वहँश्चानुकम्पाम् ॥
मन्त्राधिष्ठात्रीं देवतां वन्दमानो ।
दुर्गां दुर्बोधध्वान्तभानुं गुरुं च ॥ ३ ॥

गोषु शुश्रूषां गोपरिचर्यां धूमकण्डूयनादिरूपां सेवां विस्तारयन् किंकुर्वन् ताभ्यो गोभ्यो ग्रासं प्रयच्छन् गोपालमन्त्र एव ग्रासादिकम् अत्रोपादानादन्यत्रानुकेष्व भूतेषु प्राणिषु करुणां धारयन् मन्त्राधिष्ठातृदेवतां दुर्गाम् अज्ञानान्धकारसूर्यं गुरुं च वन्दमानः ॥ ३ ॥

कुर्वन्निति—

कुर्वन्नात्मीयं कर्म वर्णाश्रमस्थं।
मन्त्रं जप्त्वा त्रिः स्नानकाले ऽभिषिञ्चेत्॥
आचामन् पाथस्तत्वसङ्ख्याप्रजप्तं।
भुञ्जानश्चाऽन्नं सप्तजप्ताञ्जनादि ॥ ४ ॥

स्वीयं वर्णाश्रमोक्तं कर्म कुर्वन् आत्मीयं आत्मनो यो वर्णो ब्राह्मणादि यो वाऽऽश्रमो ब्रह्मचर्यादिस्तत्र तत्रस्थं कर्म विहितं तत्तत्कुर्वन्नित्यर्थः मन्त्रजप्तजलेन काले वारत्रयं स्वात्मानमभिषिञ्चेत् तत्वसंख्याप्रजप्तं द्वात्रिंशत्संख्याप्रजप्तं पञ्चविंशतिप्रजप्तं वा तथा जलम् आचमन् इत्थमेवाऽन्नं भुञ्जानः पुनः कीदृशः सप्तजप्तं अञ्जनादि कज्जलादि यस्य स तथा आदिशब्देन गन्धमाल्यादीनां परिग्रहः अञ्जनाद्य इति क्वचित्पाठः ॥ ४ ॥

जपस्थानमाह—

अद्रेरिति।

अद्रेः शृङ्गे नद्यास्तटे बिल्वमूले।
तोये ह्रदघ्ने गोकुले विष्णुगेहे॥
अश्वत्थाधस्तादम्बुधेश्चाऽपि तीरे।
स्थानेष्वेतेष्वासीन एकैकशस्तु ॥ ५ ॥
प्रजपेद्युतचतुष्कं दशाक्षरं मनुवरं पृथक् क्रमशः॥
अष्टादशाक्षरं वेदयुतद्वयमित्युदीरिता सङ्ख्या ॥ ६ ॥

पर्वतशृङ्गे नदीतीरे बिल्ववृक्षसमीपदेशे हृदयप्रमाणजले गो-

ष्टु विष्णुप्रतिमाधिष्ठितगेहे पिप्पलवृक्षसमीपदेशे समुद्रस्य तीरे अष्टसु स्थानेषु आसीन उपविष्टः एकैकश एकैकस्मिन् स्थाने स्थानेषु क्रमशः क्रमेण पृथक् अयुतचतुष्कं कृत्वा दशाक्षरमन्त्रं जपेत् यदाऽष्टादशाक्षरमन्त्रः तदा ऽयुतद्वयं कृत्वा इति जपसंख्योदीरिता अत्र न प्रतिस्थानम् अयुतचतुष्कायुतद्वयजपः किन्तु तथा जप्तव्यं येन सर्वत्र जपेन तावत्येव संख्या भवति अन्यथा ऽष्टसु स्थानेषु जपेना ऽष्टादशाक्षरे षोडशायुतजपः स्यात् ।

प्रपञ्चसारेऽपि ।

अयुतद्वितयावधिजपः स्यादिति ।

यद्यप्यष्टादशाक्षरे इयं संख्या तथा ऽपि तुल्यन्यायाद्दशाक्षरेऽपि इयमेव व्यवस्थेति रुद्रधरः ॥ ५ ॥ ६ ॥

उक्तेषु स्थानेषु क्रमेणाऽऽहारनियममाह ।

शाकमिति ।

शाकं मूलं फलं गोस्तनभवदधिनी भैक्षमन्नं च सक्तुं।
दुग्धान्नं चेत्यदानः क्षितिधरशिखरादौ क्रमात्स्थानभेदे।
एकं चैषामशक्तौ गदितमिह मया पूर्वसेवाविधानं–
निर्वृत्तेऽस्मिन्पुनश्च प्रजपतु विधिवत्सिद्धये साधकेशः॥७॥

क्षितिधरशिखरादौ पूर्वोक्तपर्वतशृङ्गादौ स्थानविशेषे क्रमादेकैकं क्रमेण विहितं शाकं वास्तुकादि मूलं शूरणादि फलम् आम्रादि गोस्तनभवं दुग्धं दधि च द्वन्द्वः भैक्षं भिक्षात उपलब्धमन्नं च प्रशस्तं हैमन्तिकं सितास्विन्नं सक्तुं भृष्टयवचूर्णं दुग्धान्नं पायसम् अदानो भक्षमाणः जपं कुर्यात् मितोदनम् ।

शस्तान्नं च समश्नीयान् मन्त्रसिद्धिसमीहया ।
तस्मान्नित्यं प्रयत्नेन शस्तान्नाशी भवेन्नर इति ॥

अशक्तं प्रत्याह एकमिति अशक्तौ चैषामद्रिशृङ्गाद्यष्टस्थानानां

मध्ये एकं स्थानं समाश्रित्य शाकाद्यष्टविधेष्वेकं भोजनमाश्रित्य जपं कुर्यात् ।

तदुक्तं नारदीये ।

मृदु सोष्णं सुपक्वं च कुर्याद्वै लघु भोजनम् ।
नेन्द्रियाणां यथा वृद्धि स्तथा भुञ्जीत साधकः ॥
यद्वा तद्वा परित्याज्यं दुष्टानां सङ्गमं तथा ।

इह ग्रन्थे पूर्वसेवाविधानं मया गदितम् कथितम् अस्मिन्निवृत्ते सम्पूर्णे पुरश्चरणजपे पुनश्च प्रजपतु सिद्ध्यै विशिष्टफलसिद्ध्यै विधिवत् यथोक्तप्रकारेण अत्र केचिदस्मिन्पूर्वसेवारम्भे कर्मणि निर्वृत्ते समाप्ते पुनःपुरश्चरणजपं करोत्वित्याहुः ॥ ७ ॥

देहार्चनान्ते दिनशो दिनादौ-
दीक्षोक्तमार्गान्यतरं विधानम् ।
आश्रित्य कृष्णं प्रयजेद्विविक्ते-
गेहे निषण्णो हुतशिष्टभोजी ॥ ८ ॥

देहार्चनान्तेदेहपूजावसाने दिनशः प्रतिदिनं दिनादौ प्रातर्दीक्षोक्तमार्गेषु षोडशपञ्चोपचारादिषु अन्यतरमेकं वर्त्माश्रित्य कृष्णं प्रयजेत् पूजयतु आवरणभेदात्कर्मभेदः कीदृशः विविक्त एकान्ते गृहे निषण्ण उपविष्टः पुनःकीदृशः हुतशिष्टभोजी प्रात्यहिकजपदशांशहोमावशिष्टभोजी ॥ ८ ॥

प्रकारान्तरमपि महते फलाय पुरश्चरणमाह—
दशलक्षमिति रुद्रधरः ।
वयं तु पश्यामः ।
प्रकृतयथोक्तपुरश्चरणमाह ॥

दशलक्षमिति ।

दशलक्षमक्षयफलप्रदं मनुं
प्रतिजप्य शिक्षितमति र्दशाक्षरम्
जुहुयाद् गुडाज्यमधुसंप्लुतैर्नवै ।
ररुणाम्बुजैर्हुतवहे दशायुतम् ॥ ९ ॥

शुद्धमतिः साधकः अक्षयफलदं मोक्षफलं दशाक्षरं मनुं दशलक्षं प्रतिजप्य हुतवहे संस्कृताग्नौ अरुणाम्बुजैररुणकमलै र्दशायुतं लक्षमेकं जुहुयात् कीदृशैः गुडाज्यमधुसंप्लुतैः गुणघृतमधुसयुक्तैः ॥ ९ ॥

शुषिरेति—

शुषिरयुगलवर्णं चेन्मनुं पञ्चलक्षं-
प्रजपतु जुहुयाच्च प्रोक्तक्लृप्त्याऽर्द्धलक्षम् ।
अमलमतिरलाभे पायसैरम्बुजानां-
सहितघृतसितैरेवाऽऽरभेद्धोमकर्म ॥ १० ॥

शुषिरयुगलवर्णं शुषिरं छिद्रं नवसंख्यात्मकं तस्य युगलं द्वन्द्वम् अष्टादशाक्षरं जपेत् तदा पञ्चलक्षं प्रजपतु प्रोक्तक्लृप्त्या पूर्वोक्तपरिपाट्या चाऽर्द्धलक्षं जुहुयात् यथोक्तहोमद्रव्यालाभे द्रव्यान्तरमाह अमलमतिरिति शुद्धमतिः अम्बुजानां पद्मानामलाभे ऽप्राप्तौ पायसैः परमान्नैः होममारभेत कीदृशैः सहिते घृतसिते येषु तैः घृतशर्करासहितैरित्यर्थः स्वाहान्तेन होमपूजेति सर्वत्र बोद्धव्यं होमादेश्चानुष्ठानप्रकारो मत्कृतहोमानुष्ठानपद्धतेरवगन्तव्यः ।

नारदीयेयथा ॥

जपस्य तु दशांशेन होमः कार्यो दिने दिने ।
अथवा लक्षपर्यन्तं होमः कार्यो विपश्चितेति ॥ १० ॥

होमाशक्तं प्रत्याह—

अशक्तानामिति ।

असक्तानां होमे निगमरसनागेन्द्रगुणितो-
जपःकार्यश्चेति द्विजनृपविशामाहुरपरे ॥
सहोमश्चेदेषां सम इह जपोहोमरहितो-
य उक्तो वर्णानां स खलु विहितस्तच्चलदृशाम् ॥११॥

तावद्द्रव्याद्यसम्पत्त्या होमकर्माणि असमर्थानां ब्राह्मणक्षत्रिय-

वैश्यानां यथासंख्यं निगमा वेदाश्चत्वारः रसाः षट् नागेन्द्राः अष्टौ एतैर्गुणिते जपो ऽनुष्ठेय इत्यपरे आचार्या आहुः तत्रकृत एव जपः एतै गुणित इति रुद्रधरः ।

वस्तुतस्तु ।

होमाशक्तौ जपं कुर्याद्धोमसंख्याचतुर्गुणम् ।
षड्गुणं चाष्टगुणितं यथासंख्यं द्विजातयः ।
इति पुरश्चरणचन्द्रिकोक्तमेव युक्त पश्यामः ।
होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः ॥
इतरेषां तु वर्णानां त्रिगुणो हि विधीयते ।

इति एतेषां मतापेक्षया अपर इत्युक्तम् एतेषां च मते तर्पणादिव्यतिरेकेण मूलभूतजपाद्विगुणजपेनैव पुरश्चरणसिद्धि भवति तथैव ग्रन्थान्तरे ऽभिधानात् एषां ब्राह्मणादीनां होमसहितश्चेज्जपः तदा त्रयाणामपि अयुतचतुष्टयादिसमानमेव वर्णानां ब्राह्मणादीनां होमरहितो य उक्तो जपः अत्र होमरहितो य श्चतुर्गुणो जप इति भैरवत्रिपाठिनः स एव तच्चलदृशां तत्पत्नीनां विहितः ॥ ११ ॥

शूद्रंप्रत्याह—

यं वर्णमाश्रितो यः शूद्रः स च तन्नतभ्रुवाम् ।
विदधीतजपं विधिवच्छ्रद्धावान् भक्तिभरावनम्रतनुः १२॥

ब्राह्मणादीनां मध्ये यं वर्णं शूद्रः समाश्रितः स तन्नतभ्रुवां तेषा मेव द्विजात्यादीनां स्त्रीणां विहितं जपं विधिवत् कथितप्रकारेणविहितं कुर्यात् कीदृशः श्रद्धायुतः पुनः कीदृशः भक्तिभरेण भक्त्यतिशयेन नम्रा तनुः शरीरं यस्य स तथा जपश्चायं होमरहित इति रुद्रधरः ॥ १२ ॥

पुरश्चरणोत्तरकृत्यमाह—

पुनरिति ।

पुनरभिषिक्तो गुरुणा विधिवद्विश्राण्य दक्षिणां तस्मै
अभ्यवहार्य च विप्रान् विभवैःसम्प्रीणयेच्च भक्तियुतः १३॥

गुरुणा पुनरपि विधिवत् यथोक्तविधिना अभिषिक्तः कृताभिषे-

कः तस्मै गुरवे दक्षिणां विश्राण्य दत्वा विप्रानभ्यवहार्य भोजयित्वा भक्तियुतः सन् संप्रीणयेत् धनधान्यादिभिः प्रीतिं कुर्यात् ॥ १३ ॥

सिद्धमन्त्रस्य कृत्यमाह—

इतीति ।

इति मन्त्रवरद्वितयान्यतरं-
परिसाध्य जपादिभिरच्युतधीः ।
प्रयजेत्सवनत्रितये दिनशो-
विधिनाऽथ मुकुन्दममन्दमतिः ॥ १४ ॥

इत्यनेन प्रकारेण मन्त्रद्वितयान्यतरं मन्त्रद्वितययोर्मध्ये एकं जपादिभि र्जपपूजाहोमतर्पणादिभिः परिसाध्य साधयित्वा अच्युतधीः अच्युते श्रीकृष्णे धीर्बुद्धिर्यस्य स तथा यद्वा अच्युता न क्षरिता विष्णौ बुद्धिर्यस्य स तथा सवनत्रितये सन्ध्यादित्रये दिनशः प्रतिदिनं विधिना उक्तप्रकारेण मुकुन्दं कृष्णं प्रयजेत् पूजयतु अमन्दमतिः शुद्धमतिः ॥ १४ ॥

पूजायां प्रातःकालिकध्यानमाह—

अथेति ।

अथ श्रीमदुद्यानसंवीतहैम-
स्थलोद्भासिरत्नस्फुरन्मण्डपान्तः ।
लसत्कल्पवृक्षाध उद्दीप्तरत्न-
स्थलीधिष्ठिताम्भोजपीठाधिरूढम् ॥ १५ ॥

सप्तश्लोकान्तं कुलकम् ।

अथानन्तरं भक्तिनम्रः भक्त्यातिशयेन नम्रदेहः प्रगे प्रातःकाले कथितरूपं कृष्णमनुस्मृत्य ध्यात्वा तदङ्गेन्द्रवज्रादिभिः तस्य कृष्णस्याङ्गानि पूर्वोक्तानि हृदयादीनि इन्द्रादयो दश दिक्पालाः वज्राद्यस्तदायुधानि च तैः सह पूजयित्वा तं कृष्णं सिता शर्करा मोचा कदली विशेषः हैयङ्गवीनं सद्योजातघृतम् एभिस्तथा दध्ना वि-

मिश्रेण दधिसंयुक्तेन दौग्धेन पायसेन च मन्त्री सम्प्रीणयेत् कीदृशं श्रीमत् शोभायुक्तं यदुद्यानं क्रीडावनं तेन संवीतं वेष्टितं यद्धेमस्थलं लसत्काञ्चनभूमि स्तत्रोद्भासीनि उद्गतकिरणानि यानि यानि रत्नानि तैः स्फुरन् देदीप्यमानो यो मण्डप स्तस्या ऽन्तर्मध्ये देदीप्यमानो यः कल्पवृक्ष स्तस्याध श्छायायाम् उद्गता दीप्ति र्यस्य तादृशं रत्नमयं यत्स्थानं तदधिष्ठितं तत्रावस्थितं यदम्भोजं पद्मं तदेव पीठं तत्राधिरूढ मुपविष्टम् ॥ १५ ॥

महानीलेति ।

महानीलनीलाभमत्यन्तबालं-
गुडस्निग्धवक्रान्तविस्रस्तकेशम् ।
अलिव्रातपर्याकुलोत्फुल्लपद्म-
प्रमुग्धाननं श्रीमदिन्दीवराक्षम् ॥ १६ ॥

पुनः कीदृशं महानील इन्द्रनीलः तद्वच्छीलाभं श्यामं पुनः अत्यन्तबालं पञ्चवार्षिकं पुनः गुडाः कुटिलाः स्निग्धाः चिक्कणाः कर्णान्ते कपोले विस्रस्ताः पर्याकुलाः वक्रान्तेतिपाठे विश्रस्ता मुखावलम्बिताः केशा यस्य तम् अलिव्रातेन भ्रमरसमूहेन पर्याकुलं चञ्चलं व्याप्तं वा यत्फुल्लं विकसितं पद्मं तद्वत्प्रमुग्धं मनोहरम् आननं मुखं यस्य तं पुनः श्रीमत् दोषरहित यदिन्दीवरं नीलपद्मं तत्सदृशे अक्षिणी यस्य तम् ॥ १६ ॥

चलदिति —

चलत्कुण्डलोल्लासिसंफुल्लगण्डं-
सुघोणं सुशोणाधरं सुस्मितास्यम् ।
अनेकाश्मरश्म्युल्लसत्कण्ठभूषा-
लसन्तं वहन्तं नखं पौण्डरीकम् ॥ १७ ॥

पुनः कीदृशं चञ्चले ये कुण्डले ताभ्यामुन्नतौ उल्लसितौ शोभमानौ संफुल्लौ विकाशितौ गण्डौ यस्य तं पुनः शोभमाना घो-

णा नासा यस्य तं पुनः सुशोणो लोहितो ऽधरो यस्य तं पुनः शोभनं यत् स्मितमीषद्धास स्तद्युक्तमास्यं यस्य तं पुनः अनेकानि यान्यश्मानि इन्द्रनीलप्रभृतीनि रत्नानि तेषां ये रश्मयः किरणाः तैरुल्लसन्ती या कण्ठभूषा तया लसन्तं शोभमानं पुनः पौण्डरीकं व्याघ्रसम्बन्धिनखं वहन्तं धारयन्तम् ॥ १७ ॥

समुद्धूसर इति—

समुद्धूसरोरःस्थलं धेनुधूल्या
सुपुष्टाङ्गमष्टापदाकल्पदीप्तम् ।
कटीरस्थले चारुजङ्घान्तयुग्मे-
पिनद्धं क्वणत्किङ्किणीजालदाम्ना ॥ १८ ॥

पुनः कीदृशं धेनुधूल्यागोरजसा समुद्धूसरं धूसरितम् उरःस्थलं यस्य तं गवामनुगमनात् सुष्ठु पुष्टमङ्गं यस्य तं कीदृशं अष्टापदाकल्पदीप्तं सुवर्णघटितालङ्कारेण शोभमानं पुनः कीदृशं क्वणत्किङ्किणीजालदाम्ना शब्दायमानक्षुद्रघण्टिकासमूहमालया कटिस्थले श्रोणितटे चारुजङ्घान्तयुग्मे मनोहरगुल्फद्वयोर्द्ध्वप्रदेशे पिनद्धं बद्धम् ॥ १८ ॥

हसन्तमिति—

हसन्तं हसद्बन्धुजीवप्रसून-
प्रभां पाणिपादाम्बुजोदारकान्त्या ॥
करे दक्षिणे पायसं वामहस्ते ।
दधानं नवं शुद्धहैयङ्गवीनम् ॥ १९ ॥

पुनः कीदृशं ।

पाणिपादाम्बुजोदारकान्त्या हस्तचरणपद्मविपुलशोभया हसद्बन्धुजीवपुष्पकान्ति हसन्तं उपहसन्तम् पुनः कीदृशं दक्षिणे करे हस्ते पायसं सव्यहस्ते वामकरे नवं नूतनं शुद्धं निष्कलुषं हैयङ्गवीनं नवनीतं ह्योगोदोहोद्भवं घृतं दधानं धारयन्तम् ॥ १९ ॥

महीति—

महीभारभूतामरारातियूथा-
ननःपूतनादीन्निहन्तुं प्रवृत्तम् ॥
प्रभुं गोपिकागोपगोवृन्दवीतं-
सुरेन्द्रादिभिर्वन्दितं देववृन्दैः ॥ २० ॥

पुनः कीदृशं महीभारभूतामरारातियूथान् पृथिवीभाररूपदैत्यसमूहान् अनःपूतनादीन् शकटासुरप्रभृतीन् निहन्तुं प्रवृत्तं पुनः कीदृशं प्रभु समर्थम् ईश्वरं पुनः कीदृश गोपिका गोपस्त्री गोपः गौः एतेषां समूहेन वीतं वेष्टितं पुनः कीदृशम् इन्द्रादिभिर्देवसमूहैर्नमस्कृतम् ॥ २० ॥

प्रगे पूजयित्वेत्यनुस्मृत्य कृष्णं-
तदङ्गेन्द्रवज्रादिकैर्भक्तिनम्रः ॥
सितामोचहैयङ्गवीनैश्च दध्ना ।
विमिश्रेण दौग्धेन सम्प्रीणयेत्तम् ॥ २१ ॥

पूर्वश्लोकव्याख्यातमपि क्रमानुरोधेन व्याख्याते प्रगे प्रातःकाले उक्तप्रकारेण कृष्णमनुस्मृत्य ध्यात्वा उपचारैः सम्पूज्य अङ्गाद्यावरणैः सह सम्पूज्य नैवेद्यं दद्यात् नैवेद्यद्रव्यमाह सितेति सिता शर्करा मोचा कदली हैयङ्गवीनं दौग्धेन पायसेन ॥ २१ ॥

प्रातःसवनपूजाफलमाह—

इतीति

इति प्रातरेवार्चयेदच्युतं यो-
नरः प्रत्यहं शश्वदास्तिक्ययुक्तः ॥
लभेताचिरेणैव लक्ष्मीं समग्रा-
मिहप्रेत्य शुद्धं परं धाम भूयात् ॥ २२ ॥

इत्यनेन प्रकारेण प्रत्यहं शश्वत्सर्वदा आस्तिक्ययुक्तः सन् यो नरः प्रातःकाले अच्युतमर्चयेत् तमेवावश्यं पूजयति स इह

लोके अचिरेणैवाल्पकालेनैव समग्रां सम्पूर्णां लक्ष्मीं सम्पदं लभते प्राप्नोति प्रेत्य देहं परित्यज्य परं शुद्धं ब्रह्माख्यं महः भूयात् प्राप्नोति तत्स्वरूपो भवती त्यर्थः ॥ २२ ॥

प्रातः पूजायामेव नैवेद्यं तर्पणं च दर्शयति—

अन्होमुखइति ।

अन्होमुखेऽनुदिनमित्यभिपूज्य शौरिं-
दघ्ना थ वा गुडयुतेन निवेद्य तोयैः ॥
श्रीमन्मुखे समनुतर्प्य च तद्धिया तं-
जप्यात्सहस्रमथ साष्टकमादरेण ॥ २३ ॥

अथवा शब्दः पादपूरणे इति पूर्वोक्तप्रकारेण अन्होमुखे प्रातःकाले अनुदिनं प्रत्यहं शौरिं कृष्णम् अभिपूज्य गुडसहितेन दध्ना नैवेद्यं दत्वा जलै तद्धिया गुडसहितबुद्ध्या श्रीमतः कृष्णस्य मुखे समनुतर्प्य अथानन्तरं तं मन्त्रमादरेण साष्टकं सहस्रम् अष्टोत्तरसहस्रं जपेत् ॥ २३ ॥

मध्यंदिनसवनध्यानमाह—

मध्यंदिन इति

मध्यंदिने जपविधानविशिष्टरूपं-
वन्द्यं सुरर्षियतिखेचरमुख्यवृन्दैः ॥
गोगोपगोपवनितानिकरैः परीतं-
सान्द्राम्बुदच्छविसुजातमनोहराङ्गम् ॥ २४ ॥

चतुर्थश्लोकस्थक्रियया योजना एवमनेन प्रकारेण मध्यन्दिने मध्यान्हे नन्दजं कृष्णं ध्यात्वा इन्दिरा श्रीमतस्या आप्त्यर्थम् अर्चयतु कीदृशं जपविधानेन विशिष्टं रूपं यस्य तं जपार्थं यत् ध्यानम् अथ प्रकटसौरभेत्यादि तृतीयपटलोक्तध्यानं तदेवात्रापीति त्रिपाठिनः पुनः कीदृशं वन्द्यं श्रेष्ठं पुनः कीदृशं सुराः इन्द्रादय ऋषय नारदादयः यतयः सनकादयः खेचराः स्वर्गवासिनः एतेषां मुख्याः श्रेष्ठाः तेषां वृन्दैः समूहैः तथा गौः गोपः गोपस्त्री च एतेषां निकरैः

समूहैः परीतं वेष्टितं सान्द्रो निविडो यो अम्बुदो मेघस्तद्वच्छविर्यस्य तत् अथ च सुजातं दोषरहितम् अथ च मनोहरं नेत्रोत्सवकारकमङ्गं यस्य २४ ॥

मायूरपत्रपरिक्लृप्तवतंसरम्य-
धम्मिल्लमुल्लसितचिल्लिकमम्बुजाक्षम् ॥
पूर्णेन्दुबिम्बवदनं मणिकुण्डलश्री-
गण्डं सुनासमतिसुन्दरमन्दहासम् ॥ २५ ॥

पुनः कीदृशं —

मयूरस्येदं मायूरं पत्रं पक्षः मायूरं च तत्पत्रं चेति मायूरपत्रं तेन परिक्लृप्तो यो वतंसः शिरोभूषणम् ।

वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः

इत्यकारलोपः ।

तेन रम्यो मनोहरो धम्मिल्लः केशपाशो यस्य तं पुनः कीदृशम् अम्बुजवत् पद्मवत् अक्षिणी यस्य स तथा तं पुनःकीदृशं संपूर्णो य इन्दुबिम्बश्चन्द्रमण्डल तद्वद्वदनं मुखं यस्य स तथा तं पुनःकीदृशं मणिमयं यत् कुण्डलं तेन श्रीयुक्तौ शोभान्वितौ गण्डौ यस्य तं पुनः कीदृशं शोभना नासा यस्य तं पुनः कीदृशं मनोहरेषद्धास्ययुक्तम् ॥ २५ ॥

पीताम्बरं रुचिरनूपुरहारकाञ्ची-
केयूरकोर्मिकटकादिभिरुज्ज्वलाङ्गम् ॥
दिव्यानुलेपनपिशङ्गितमंसराज-
दम्लानचित्रवनमालमनङ्गदामम् ॥ २६ ॥

पुनः कीदृशं पीतमम्बरं वस्त्रं यस्य तं पुनः कीदृशं मनोहरनूपुरादिभिः शोभितमङ्गं यस्य तं हारो मुक्तावली काञ्ची क्षुद्रघण्टिका केयूरमङ्गदम् ऊर्मिर्मुद्रिका कटकं कङ्कणः आदिपदेन किरीटादीनां परिग्रहः पुनः कीदृशं देवसंबन्धिना ऽनुलेपनेन कुङ्कुमादिना पिशङ्गितं पिञ्जरितम् अंसे स्कन्धे राजन्ती शोभमाना अम्लाना अक्लि-

ष्टा चित्रा नानाप्रकारिका वनमाला पत्रपुष्पमयी आपादलम्बिनी माला यस्य तं पुनः कीदृशम् अनङ्गवत् कामवत् दीप्तम् ॥ २६ ॥

वेणुं धमन्तमथवा स्वकरे दधानं-
सव्येतरे पशुपयष्टिमुदारवेषम् ।
दक्षे मणिप्रवरमीप्सितदानदक्षम् ॥
ध्यात्वैवमर्चयतु नन्दजमिन्दिराप्त्यै ॥ २७ ॥

पुनः कीदृशम् ।

वेणुं धमन्तं वादयन्तम् अथवा पक्षान्तरे स्वकरे सव्येतरे वामे गोरक्षणदण्डं दधानं तथा दक्षे दक्षिणे ईप्सितदानदक्षं मणिं दधानं पुनः कीदृशम् उदारवेषम् उद्भटवेषमिति रुद्रधरः वस्तुनस्तु वेणुं वादयन्तं तदेवदर्शयति अथेति वामकरे सव्यं दक्षिण वामयो रित्यभिधानात् द्वयोरेवात्रतन्त्रेणसंग्रहः तत्र सव्ये द्वितीयवाम- हस्ते पशुपयष्टिं पशुरक्षणार्थं यष्टिं दण्डं तथा सव्ये दक्षिणे हस्ते मणिप्रवरं मणिश्रेष्ठं चिन्तामणिं दधानं कीदृशं मणिप्रवरम् ईप्सित- दानदक्षं वाञ्छितार्थदानक्षमम् इत्यर्थः ॥ २७ ॥

आवरणनैवेद्यदानप्रकारमाह—

दामादिकेति ।

दामादिकाङ्गदयितासुहृदङ्घ्रिपेन्द्र-
वज्रादिभिः समभिपूज्य यथाविधानम् ॥
दीक्षाविधिप्रकथितं च निवेद्यजातं-
हैमे निवेदयतु पात्रवरे यथावत् ॥ २८ ॥

दाम आदिर्यस्य आदिपदेन सुदामादीनां परिग्रहः अङ्गानि पूर्वो- क्तानि पञ्च दयिता रुक्मिण्याद्याः सुहृदो वसुदेवाद्याः अङ्घ्रिपा मन्दाराद्याः पूर्वोक्ता इन्द्रादयो दश दिक्पालाः वज्रादीनि च तेषाम् आयुधानि पूर्वोक्तानि एतैर्यथाविधानं यथोक्तप्रकारेण कृष्णं सं-

पूज्य दीक्षाविधाने कथितं नैवेद्यसमूहं हैमे सुवर्णमये पात्रश्रेष्ठे यथावत् निवेदयतु ॥ २८ ॥

होमादिकमाह—

अष्टोत्तरमिति ।

अष्टोत्तरं शतमथो जुहुयात्पयोन्नैः ।
सर्पिःप्लुतैः सुसितशर्करया विमिश्रैः ॥
दद्याद्बलिं च निजदिक्षु सुरर्षियोगि-
वर्गोपदैवतगणेभ्य उदग्रचेताः ॥ २९ ॥

अनन्तरं पयोन्नैः पायसैः सर्पिःप्लुतैः सुसितशर्करया विमिश्रैः अतिशुभ्रशर्करया मिलितैः अष्टाधिकं शतं जुहुयात् होमं कुर्यात् । साहचर्यात् कल्पनालाघवाच्च होमोक्तद्रव्येणैव निजदिक्षु स्वस्वदिक्षु सुरर्षियोगिवर्गोपदैवतगणेभ्यो बलिं दद्यात् तत्र सुरा विरञ्चिप्रभृतयः पूर्वदिक्स्थाः ऋषयो नारदादयो दक्षिणदिक्स्थाः योगिवर्गः सनकादिः पश्चिमदिक्स्थ उपदेवगणाः यक्षसिद्धगन्धर्वविद्याधराद्याः उत्तरदिक्स्था इतित्रिपाठिनः उपदेवगणाः दशदिक्पाला इतिरुद्रधरः उदग्रचेता उद्भटचित्तः सोत्साह इत्यर्थः ॥ २९ ॥

नवनीतेति ।

नवनीतमिलितपायसधियाऽर्चनान्ते जलैर्मुखे तस्य ।
सन्तर्प्य जपतु मन्त्री सहस्रमष्टोत्तरशतं वाऽपि॥३०॥

अर्चनान्ते पूजावसाने तस्य देवस्य मुखे नवनीतेन मिलितं सम्बद्धं यत् पायसं तद्बुध्या जलैः सन्तर्प्य तर्पणं कृत्वा मन्त्री साधकः अष्टाधिकं सहस्रं शतं वा जपतु ॥ ३० ॥

एतत्फलमाह—

अह्नीति ।

अह्नो मध्ये बल्लवीवल्लभं तं-
नित्यं भक्त्या ऽभ्यर्चयेत् यो नराग्र्यः ॥

देवाः सर्वे तं नमस्यन्ति शश्वत् ।
वर्तेरन् वै तद्वशे सर्वलोकाः ॥ ३१ ॥

यो नराग्र्यो नरश्रेष्ठः अह्नः मध्ये मध्याह्ने तं वल्लवीवल्लभं गोपीप्रियं नित्यं सर्वदा भक्त्या सात्विकेन भावेनार्चयेत् तं नरश्रेष्ठं सर्वे देवाः नमस्यन्ति तथा शश्वत्सर्वदा सर्वे जना एव तद्वशे वर्तेरन् तद्वश्याः स्युरित्यर्थः ॥ ३१ ॥

मेधेति ।

मेधायुःश्रीकान्तिसौभाग्ययुक्तः ।
पुत्रैर्मित्रैर्गोमहीरत्नधान्यैः ॥
भोगैश्चान्यैर्भूरिभिः सम्निह्वाढ्यो-
भूयात् भूयो धाम तच्चाच्युताख्यम् ॥ ३२ ॥

तथा इह लोके मेधा धारणावती बुद्धिः आयुः जीवनं श्रीः लक्ष्मीः कान्तिः शरीरशोभा सौभाग्यं सर्वजनप्रियता एतैः युक्तः सम्बद्धः तथा पुत्रैरौरसैः मित्रैः सुहृद्भिः गौः पृथिवी रत्नं धान्यं व्रीह्यादिः एतैश्च तथा अन्यैर्भूरिभिः प्रचुरैः सुखैराढ्यः उपचितः सन्पुनः देहावसाने अच्युताख्यं कृष्णनामकं तेजो महो भूयात् तद्रूपो भवतीत्यर्थः ॥ ३२ ॥

तृतीयकालपूजाव्यवस्थामाह—

तृतीयेति ।

तृतीयकालपूजायामस्ति कालविकल्पना ।
सायान्हे निशि वेत्यत्र वदन्त्येके विपश्चितः॥३३॥

तृतीयकालपूजायां कालस्य वेलायां विकल्पना विकल्पोऽस्ति तमेवाह सायाह्ने सन्ध्यायां निशि रात्रौ वेति अत्र एके विपश्चितो वदन्ति ॥ ३३ ॥

किं तत्राह—

दशाक्षरेणेति।

दशाक्षरेण चेद्रात्रौ सायान्हे ऽष्टादशार्णतः।
उभयीमुभयेनैव कुर्यादित्यपरे जगुः॥ ३४॥

चेद्यदि दशाक्षरेण मन्त्रेण पूजादिकं तदा रात्रौ यद्यष्टादशार्णतो अष्टादशाक्षरेण मन्त्रेण तदा सायाह्ने इत्येकेषां मतम् अपरे पुनः उभयीम् उभयपूजाम् उभयेनैव दशाक्षरेणा ऽष्टादशाक्षरेण च तत् कुर्यात् इति जगुः कथयन्ति तथा चार्चिकस्तो विकल्प इतिभावः॥३४॥

सायाह्नइत्यादि—

अत्र नवश्लोकान्तं कुलकम्।

सायान्हे द्वारवत्यां तु चित्रोद्यानोपशोभिते।
अष्टसाहस्रसंख्यातैर्भवनैरभिसंवृते॥ ३५॥

हंससारससंकीर्णैः कमलोत्पलशालिभिः।
सरोभिरमलाम्भोभिः परीते भवनोत्तमे॥ ३६॥

उद्यत्प्रद्योतनद्योतसद्युतौ मणिमण्डपे।
मृद्वास्तरे सुखासीनं हेमाम्भोजासने हरिम्॥३७॥

नारदाद्यैः परिवृतमात्मतत्त्वविनिर्णये।
तेभ्यो मुनिभ्यः स्वं धाम दिशन्तं परमक्षरम्॥३८॥

सायाह्ने एवमेतादृशवेषधारिणं हरिं ध्यात्वा ऽर्चयेत् कीदृशं मृद्वास्तरकोमलासनरूपे हेमाम्भोजासने कनकपद्मासने समासीनम् उपविष्टं कुत्रावस्थितं मणिमण्डपे किंविशिष्टे उद्गच्छन् यः प्रद्योतनः सूर्यः तस्य द्योतस्य समाना द्युति र्यस्य तस्मिन् कुत्र भवनोत्तमे गृहश्रेष्ठ किंविशिष्टे चित्रोद्यानोपशोभिते बहुधोपवनसेविते पुनःकिंविशिष्टे द्वारवत्यां विद्यमाने पुनः किंविशिष्टे भवनैर्गृहैरभिसंवृते कीदृशैः अष्टसहस्रसंख्यातैः।

पुनः किंविशिष्टे—

सरोभिः सरोवरैः परीते कीदृशैः अमलाम्भोभिर्निर्मलजलैः पुनः कीदृशैः हंससारससंकीर्णैः हंसादिपक्षिगणैर्व्याप्तैः पुनःकीदृशैः कमलोत्पलशालिभिः पद्मोत्पलसहितैः ।

हरिं कीदृशं—

नारदाद्यैः मुनिभिः परिवृतं वेष्टितं किमर्थमात्मतत्त्वनिर्णये आत्मतत्त्वनिश्चये निमित्ते पुनः कीदृशं तेभ्यो नारदादिभ्यः स्वं धाम ज्ञानस्वरूपमात्मानं कथयन्तं पुनःकीदृशं परमविद्यातत्कार्यरहितं पुनःकीदृशम् अक्षरम् अविनाशि ॥३५॥३६॥३७॥३८॥

इन्दीवरनिभं सौम्यं पद्मपत्रारुणेक्षणम् ।
स्निग्धकुन्तलसंभिन्नकिरीटमुकुटोज्ज्वलम् ॥ ३९ ॥

पुनः कीदृशं—

इन्दीवरनिभं नीलाम्भोजसदृशं सौम्यम् उग्रतारहितं पुनः कीदृशं पद्मपत्रवदायते दीर्घे ईक्षणे यस्य तं पुनः स्निग्धाः चिक्कणा ये कुन्तलाः केशास्तैः सम्भिन्ने मिलिते किरीटमुकुटे ताभ्यामुज्ज्वलं देदीप्यमानं तत्र किरीटशब्देन ललाटाश्रितः त्रिशृङ्गोऽलङ्कारविशेषः कथ्यते मुकुटशब्देन च मूर्ध्नि मध्यभागाश्रितं तच्च दीपशिखाकारो ऽलङ्कारविशेषः कथ्यते ॥ ३९ ॥

चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥४०॥

पुनः कीदृशं चारु मनोहरं प्रसन्नं फलदायि वदनं यस्य तं पुनः स्फुरती देदीप्यमाने मकराकृती कुण्डले यस्य तं पुनः श्रीवत्सो त्रिप्रपादप्रहारकृतचिह्नविशेषो वक्षसि यस्य तं पुनः भ्राजन् देदीप्यमानः कौस्तुभो मणिविशेषो यस्य तं पुनः वनमालाधारिणम् ॥ ४० ॥

काश्मीरकपिशोरस्कं पीतकौशेयवाससम् ।
हारकेयूरकटकरसनाद्यैः परिष्कृतम् ॥ ४१ ॥

पुनः कीदृशं—

काश्मीरेण कुङ्कुमवर्णम् उरो यस्य तं पुन पीतवस्त्रधारिणं पुनः हारः मुक्ताहारः केयूरमङ्गदं बाहुलङ्कारः कटकः कङ्कणः रसना क्षुद्र-घण्टिका आदिशब्देनाऽङ्गुलीयकादेः परिग्रहः एतैःपरिष्कृतम् शोभितम् ॥ ४१ ॥

हृतविश्वम्भराभूरिभारं मुदितमानसम् ।
शङ्खचक्रगदापद्मराजद्भुजचतुष्टयम् ॥ ४२ ॥

पुनर्कीदृशं

हृतो ऽपनीतो विश्वम्भरायाः पृथ्व्या भूरिभरो बृहद्भारो ऽसुरादिलक्षणो येन तं पुनः मुदितं हृष्टं मानसं यस्य तं पुनः शङ्खचक्रगदापद्मैः शोभितं बाहुचतुष्टयं यस्य तम् ॥ ४२ ॥

एवं ध्यात्वा ऽर्चयेन्मन्त्री तदङ्गैः प्रथमावृतिम् ।
द्वितीयायां महिषीभिस्तु तृतीयायां समर्चयेत् ॥४३॥

अत्र पूजायाम् अङ्गैः पूर्वोक्तैः पञ्चाङ्गैः प्रथमावरणं भवति द्वितीयावरण महिषीभिः रुक्मिण्यादिभिः तृतीयायामावृतौ दिक्षु पूर्वादिदिक्षु वक्ष्यमाणान् नारदादीन् अग्रे च विनतासुतं गरुडं पूजयेत् ॥ ४३ ॥

तानेवाह ।

नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान् ।
विश्वक्सेनं च शैनेयं दिक्षवग्रे विनतासुतम् ॥४४॥

पर्वतनामा मुनिविशेषः जिष्णरर्जुनः निशठो यादवविशेषः उद्धवोऽपि तथा दारुकः कृष्णसारथिः विष्वक्सेनः भाण्डागारिकः शैनेयः सात्यकिः ॥ ४४ ॥

लोकेशैस्तत्प्रहरणैः पुनरावरणद्वयम् ।
इति संपूज्य विधिवत्पायसेन निवेदयेत् ॥ ४५ ॥

लोकेशैरिन्द्रादिभिरेकमावरणं तत्प्रहरणैस्तदायुधैर्वज्रादिभिरप-

रावरणं एवं क्रमेणाऽऽवरणद्वयं इत्यनेन प्रकारेण पञ्चावरणकेन संपूज्य विधिवदिक्षा कथित्त पायसं दद्यात् ॥ ४५ ॥

तर्पणप्रकारं जपसंख्यां च दर्शयति ।

तर्पयित्वेति—

तर्पयित्वा खण्डमिश्रैर्दुग्धबुध्या जलैर्हरिम् ।
जपेदष्टशतं मन्त्री भावयन् पुरुषोत्तमम् ॥ ४६ ॥

खण्डेन शर्करया विमिश्रं मिलित यद्दुग्धं तद्बुद्ध्या जलैः कृष्णं तर्पयित्वा पुरुषोत्तमं भावयन् ध्यायन् मन्त्री साधकः अष्टाधिकशतं जपेत् यद्यपि तर्पणस्य क्त्वाप्रत्ययेन पूर्वकालता प्रतीयते तथापि प्रथमं जपः तदनु तर्पणं कार्यं तथैवानुक्रमात् सम्प्रदायाच्चेति रुद्रधरः ॥ ४६ ॥

पूजास्विति—

पूजासु होमं सर्वासु कुर्यान्मध्यंदिने ऽथवा ।
आसनादर्घ्यपर्यन्तं कृत्वा स्तुत्वा नमेत्सुधीः॥४७॥

सर्वासु तिसृष्वपि पूजासु होमं कुर्यात् पक्षान्तरमाह अथवेति मध्यंदिने मध्याह्नपूजायां वा होमं कुर्यादित्यर्थः आसनादिति आसनमन्त्रादारभ्याऽर्घ्यपर्यन्तं कृत्वा स्तुत्वा स्तवनं कृत्वा नमेत् दण्डवत्प्रणमेत् अवसानार्घ्यपर्यन्तमितिपाठे अयमर्थः पूजां कृत्वा पूजाशेषकर्तव्यार्घ्यमवशेषयित्वा मध्येहोमं कृत्वा ततः पूजाशेषार्घ्यमवसानार्घ्यसंज्ञक पराङ्मुखार्घ्यापरपर्यायं दद्यादित्यर्थः ॥ ४७ ॥

समर्प्येति—

समर्प्यात्मानमुद्वास्य तत्स्वे हृत्सरसीरुहे ।
विन्यस्य तन्मयो भूत्वा पुनरात्मानमर्चयेत्॥४८॥

आत्मसमर्पणमन्त्रेण स्वात्मानं परमेश्वरे समर्प्य तत् परमेश्वरतेजः पूजास्थानादुद्वास्य उद्धृत्य स्वकीयहृदयपद्मे विन्यस्य तन्मयो भूत्वा पुनरात्मानं पूजयेत् ॥ ४८ ॥

सायाह्नपूजाफलमाह—

सायाह्न इति ।

सायाह्ने वासुदेवं यो नित्यमेवं यजेन्नरः ।
सर्वान् कामानवाप्यान्ते स याति परमां गतिम् ॥४९॥

यो नरः सायाह्ने वासुदेवं नित्यं सर्वदा एवं कथितप्रकारेण यजेत् पूजातर्पणहोमादिभिः परितोषयेत्सर्वान् कामान्वाञ्छितानर्थान् अवाप्य देहावसाने परां गतिं विष्णुसायुज्यं प्राप्नोति ॥ ४९ ॥

रात्राविति—

रात्रौ चेन्मन्मथाक्रान्तमानसं देवकीसुतम् ।
यजेद्रासपरिश्रान्तं गोपीमण्डलमध्यगम् ॥ ५० ॥

चेद् यदि रात्रौ पूजा क्रियते तदा रासः क्रीडाविशेषस्तेन परिश्रान्तं देवकीनन्दनं यजेत् मन्मथेनाक्रान्तं मानसं हृदयं यस्य तं पुनः गोपीनां मण्डले गोष्ठीविशेषः तस्य मध्ये स्थितम् ॥ ५० ॥

रासक्रीडांदर्शयति ।

पृथुमिति ।

पृथुं सुवृत्तं मसृणं वितस्ति-
मात्रोन्नतं कौ विनिखन्य शङ्कुम् ।
आक्रम्य पद्भ्यामितरेतरात्त-
हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ॥ ५१ ॥

इतरेतरात्तहस्तैः परस्परगृहीतहस्तैः अयंभ्रमोभ्रमणंरासगोष्ठी किंकृत्वा कौपृथिव्यां पृथुंस्थूलंसुवृत्तंवर्तुलाकारं मसृणंस्निग्धंवितस्तिमात्रोन्नितंद्वादशाङ्गुलप्रमाणेनोर्द्धस्थितंशङ्कुकाष्ठखण्डंविनिखन्य पुनःकिंकृत्वा पद्भ्यांशङ्कुमाक्रम्यनियम्य ॥ ५१ ॥

ध्यानमाह—

स्थूलेत्यादि ।

स्थलनीरजसूनपरागभृता ।
लहरीकणजालभरेण सता ॥

मरुता परितापहृताऽध्युषिते ।
विपुले यमुनापुलिने विमले ॥ ५२ ॥

द्वादशश्लोकान्तं कुलकम् ।

कल्याणमयस्वरूपमजं विचिन्त्यप्रथमोदितपीठवरे पूर्वोक्तदीक्षासम्बन्धिपूजापीठश्रेष्ठेविधिवत् यथाविधि प्रयत्नेन पूजयेत् कीदृशं यमुनापुलिने यमुनातटे इतरेतरवद्धकरप्रमदागणकल्पितरासविहारविधौ अन्योन्यबद्धहस्तस्त्रीसमूहपरिकल्पितक्रीडाविशेषविधौ मणिशङ्कुगंमणिमयशङ्कुमध्यगतं कीदृशेपुलिने वायुनाऽध्युषिते आक्रान्ते कीदृशेन स्थलनीरजंस्थलकमलन्तत्पुष्पपरागभृता तत्केशरसंनिकृष्टपुष्परजोयुक्तेन अनेन सौगन्ध्यंवर्णितं पुनः लहरीतरङ्गस्तस्यकणजालंविन्दुसमूहः तस्य भरेणप्रकर्षेणसता उत्कृष्टेनयुक्तेनेतित्रिपाठिनः अनेन शैत्यमुक्तम् पुनः परितापहृताखेदविनाशकेन–अनेन मान्द्यमुक्तं पुनः कीदृशेपुलिने विपुलेविस्तीर्णेपुनः विमलेशुद्धे ॥ ५२ ॥

अशरीरनिशातशरोन्मथित-
प्रमदाशतकोटिभिराकुलिते ।
उडुनाथकरैर्विशदीकृतदिक्-
प्रसरे विचरद्भ्रमरीनिकरे ॥ ५३ ॥

पुनः कीदृशे–

अशरीरः कामः तस्य यो निशातशरस्तीक्ष्णवाणस्तेनउन्माथिताव्यग्रीकृता याः प्रमदास्तासां शतकोटिभिराकुलीकृत इतस्ततोव्याप्ते पुन. कीदृशे उडुनाथश्चन्द्रस्तस्यकरैः किरणैर्विशदीकृतः प्रकाशितोदिक्प्रसरोदिगवकाशोयत्रतस्मिन् पुनःकीदृशे विचरन्तीभ्रमन्तीयाभ्रमरीतस्यानिकरः समूहोयत्रतस्मिन् ॥ ५३ ॥

विद्याधरकिन्नरसिद्धसुरैः ।
गन्धर्वभुजङ्गमचारणकैः ॥
दारोपहितैः सुविमानगतैः ।
स्वस्थैरभिवृष्टसुपुष्पचयैः ॥ ५४ ॥

पुनः कीदृशे–

विद्याधरप्रभृतयोयथाप्रसिद्धाः तथाभुजङ्गमः हस्तपादादिशरीरान्वितोनागलोकस्थः सर्पः एतैर्दारोपहितैः सस्त्रीकैः शोभनविमानगतैः आकाशानिष्ठैः कृतपुष्पवृष्टिसमूहैः आकुलिते ॥ ५४ ॥

इतरेतरबद्धकरप्रमदा-
गणकल्पितरासविहारविधौ ॥
मणिशङ्कुगमप्यमुनावपुषा ।
बहुधा विहितस्वकदिव्यतनुम् ॥ ५५ ॥

पुनः कीदृशं कृष्णम् अमुनावपुषा अनेन मणिशङ्कुगतेन शरीरेण नानाप्रकारकृतस्वीयदिव्यशरीरम् ॥ ५५ ॥

सुदृशामुभयोः पृथगन्तरगं-
दयितागणबद्धभुजद्वितयम् ॥
निजसङ्गविजृम्भदनङ्गशिखि-
ज्वलिताङ्गलसत्पुलकालियुजाम् ॥ ५६ ॥

पुनः कीदृशम् ।

सुदृशां कामिनीनामुभयोर्द्वयोः पृथक् द्वयद्वय क्रमेण अन्तरगं मध्यगतं पुनः कीदृशं दयितागणेन नारीसमूहेन बद्धं स्वहस्तेनान्योन्यं ग्रन्थितं भुजद्वितयं यस्यतम् एतेनैतदुक्तं भवति कामिन्योर्मध्येकामिनीनामेव हस्तेन गृहीतहस्तः परमेश्वर इति अपि समुच्चयेन केवलं शङ्कुगं कामिनीनामपि अन्तरेण युक्तामिति भावः । कीदृशां निजसङ्गेन गोपालकृष्णसङ्गेन विजृम्भमाणः प्रज्वलितोयो अनङ्गशिखीकामाग्निस्तेन ज्वलितं प्रदीप्तं यदङ्गं तत्र लसन्तीशोभमाना या पुलकालीरोमाञ्चपङ्क्तिस्तया युज्यन्ते इति तद्युजस्तासाम् ॥ ५६ ॥

विविधश्रुतिभिन्नमनोज्ञतर-
स्वरसप्तकमूर्छनतालगणैः ॥

भ्रममाणममूभिरुदारमणि-

स्फुटमण्डनशिञ्जितचारुतरम् ॥ ५७ ॥

पुनः कीदृशम् ।

अमूभिर्गोपीभिः सहभ्रममाणं भ्रमीकुर्वाणं कैः विविधो नानाप्रकारः श्रुतिर्नामस्वरारम्भकावयवः शब्दविशेषः तेनभिन्नं सकृतं मनोज्ञतरम् अतिहृदयग्राहि यत्स्वरसप्तकं निषादेत्यादि तस्ययामूर्छना-एकविंशतिप्रकारिका भागतालाश्वतालपरितालादयः ऊनपञ्चाशत् एतेषाङ्गणैः समूहैः पुनः कीदृशम् उदारउद्भूढोयोमणिस्तस्यस्फुटं प्रव्यक्तम् अतितेजस्वितयायन्मण्डनन्तस्य शिञ्जितं शब्दितं तेन चारुतरं हृदयंगमम् ॥ ५७ ॥

इति भिन्नतनुंमणिभिर्मिलितं

तपनीयमयैरिव मारकतम् ॥

मणिनिर्मितमध्यगशङ्कुलस-

द्विपुलारुणपङ्कजमध्यगतम् ॥ ५८ ॥

पुनः कीदृशम्—

इति भिन्नतनुम् ।

अनेन प्रकारेणगोपीभिर्मिलितदेहङ्गोपालकृष्णं कामिव तपनीयमयैः सुवर्णमयैः मणिभिर्मिलितं ग्रथितंमरकतमणिमिव पुनः कीदृशं मणिनिर्मितोमध्यगतो यः शङ्कुः तल्लग्नंलसद्देदीप्यमानंयद्विपुलं-बृहदरुणपङ्कजन्तस्यमध्यगतम् ॥ ५८ ॥

अतसीकुसुमाभतनुं तरुणं-

तरुणारुणपद्मपलाशदृशम् ॥

नवपल्लवचित्रसुगुच्छलस-

च्छिखिपिच्छपिनद्धकचप्रचयम् ॥ ५९ ॥

पुनः कीदृशम्—

अतसीप्रसिद्धा तस्याः कुसुमानीवाभाद्दीप्तिर्यस्यास्तनोस्तादृशी-तनुर्यस्य तं पुनःकीदृशन्तरुणेति नूतनारुणपद्मपत्रसदृशानेत्रं पुनः

कीदृशं नवेति नूतनपल्लवनानाविधस्तवकशोभमानमयूरपुच्छसम्ब-द्धकेशसमूहम् ॥ ५९ ॥

चटुलभ्रुवमिन्दुसमानमुखं
मणिकुण्डलमण्डितगण्डयुगम् ॥
शशरक्तसदृक्दशनच्छदनं
मणिराजदनेकविधाभरणम् ॥ ६० ॥

पुनः कीदृशं—

चटुलभ्रुवञ्चलद्भ्रूलताकं पुनः कीदृशं शुक्लपक्षीयपूर्णचन्द्र-सदृशाननं पुनःकीदृशं मणिमयकुण्डलशोभितगण्डद्वयं पुनः कीदृशं शशशोणिततुल्याधरं पुनः कीदृशं मणिना शोभमाननाना प्रकाराभरणम् ॥ ६० ॥

असनप्रसवच्छदनोज्ज्वलस-
द्वसनं सुविलासनिवासभुवम् ॥
नवविद्रुमभद्रकराङ्घ्रितलं ।
भ्रमराकुलदामविराजितनुम् ॥ ६१ ॥

पुनः कीदृशम्—

असनोवृक्षविशेषः तस्यप्रसवः पुष्पंतस्यच्छदनं पत्रं च तद्वदु-ज्ज्वलंशोभमानं मनोहरं वस्त्रं यस्यतं पुनः कीदृशं शोभनक्रीडावि चित्रस्थानं पुनः कीदृशं नवोनूतनोयोविद्रुमःप्रवालस्तद्वत् भद्रं मनो-हरं कराङ्घ्रितलंयस्यतं पुनः कीदृशं भ्रमरैराकुलंव्याप्तं यत् पुष्पदा-ममालातेनविराजितं भुजद्वयंयस्यतं यद्वामालयाविराजितातनुर्य-स्यतम् ॥ ६१ ॥

तरुणीकुचयुक्परिरम्भमिलत्-
घुसृणारुणवक्षसमुक्षगतिम् ॥
शिववेणुसमीरितगानपरं ।
स्मरविह्वलितं भुवनैकगुरुम् ॥ ६२ ॥

पुनः कीदृशं युवतीनां स्तनद्वयालिङ्गनसम्बद्धकुङ्कुमारुणित-

उरःस्थलं यस्य तं पुनः कीदृशम् उक्षगतिवृषभगति पुनः कीदृशं शिवःकल्याणप्रदोयोवेणुर्वंशस्तेनसमीरितं संपादितं यद्गानगीतं तत्परं तदासक्तं पुनः कीदृशं स्मरेणकामेनाविह्वलितमनायस्य पुनः कीदृशं भुवनत्रयस्य एकम् अद्वितीयं गुरुम् ॥ ६२ ॥

प्रथमोदितपीठवरे विधिवत् ॥
प्रयजेदिति रूपमरूपमजम् ॥
प्रथमं परिपूज्य तदङ्गवृतिं ।
मिथुनानि यजेद्रसगानि ततः ॥ ६३ ॥

इतिरूपमजं प्रथमोदितपीठवरे पूर्वकथितदेवताकल्पपीठेयजेत् अरूपंनिर्गुणम् आवरणानिदर्शयति प्रथममिति तदङ्गवृतिपूर्वोक्ताङ्गावरणं प्रथमं परिपूज्यततस्तदनन्तरंमिथुनानिकेशवकीत्यादीनिरासगानिरासक्रीडागतानि ॥ ६३ ॥

दलषोडशके स्वरमूर्तिगणं ।
सहशक्तिकमुत्तमरासगतम् ॥
सरमामदनं स्वकलासहितं ।
मिथुनाह्वमथेन्द्रपविप्रमुखान् ॥ ६४ ॥

दलषोडशकेषोडशपत्रेपूजयेत्—

मिथुनमेवकथयति स्वरमूर्तिगणम् इति स्वरभवा अकारादिवर्णभवाः केशवादिषोडशमूर्तयः स्वरमूर्तिगणं कीदृशं सहशक्तिकंकीर्त्यादिशक्तिसहितं पुनः कीदृशं उत्तमोयोरासः तत्रगतं क्वचिदुत्तररासगतमिति पाठः तत्रमध्यरासेपरमेश्वरपूजाउत्तरादिरासे केशवादिकं पूजयेत्

पुनः कीदृशं—

रमाश्रीवीजं मदनःकामवीजम् एताभ्यां सहितं पुनः कीदृशं स्वकीया याः कलाः षोडशस्वराः तैः सहितं प्रयोगश्च श्रींक्लीम् अंकेशवकीर्तिभ्यांनमः इत्यादि पुनःकीदृशं मिथुनाह्व मिथुनसंज्ञकम् अथानन्तरम् इन्द्रपविप्रमुखान् इन्द्रादीन् वज्रादींश्च पूजयेदित्यर्थः ॥ ६४ ॥

पूर्वोक्तावृतिसंख्यापूर्वकंनैवेद्यं कथयति ।

इतीति ।

इति सम्यगमुं परिपूज्य हरिं-
चतुरावृतिसंभृतमार्द्रमतिः ॥
रजतारचिते चषके ससितं-
सुशृतं सुपयोऽस्य निवेदयतु ॥ ६५ ॥

अनेन प्रकारेणचतुरावरणवेष्टितममुंहरिंसम्यक्यथाविधिसम्पूज्यश्रद्धावान् रजतारचितेरूप्यनिर्मितचषकेपात्रे अस्यहरेः ससितं सशर्करं सघृतंघृतसहितं पाठान्तरम् सुशृतम् आवर्त्तितं-पयोदुग्धंनिवेदयतु ॥ ६५ ॥

विभवे सति कांस्यमयेषु पृथक्
चषकेषु तु षोडशसु क्रमशः ॥
मिथुनेषु निवेद्य पयः ससितं
विदधीत पुरोवदथो सकलम् ॥ ६६ ॥

विभवेसतियदितादृशमैश्वर्यंभवतितदाकांस्यघटितेषुपृथक् एकैकंषोडशचषकेषुक्रमेणमिथुनगणेषुससितं पयोनिवेद्य अथानन्तरं पुरोवत् निवेदयामिभगवते इत्याद्युक्तप्रकारेणसकलं पूजाविशेषं-समापयेत् ॥ ६६ ॥

रासपूजाफलमाह ।

सकलेति ।

सकलभुवनमोहनं विधिं यो-
नियतममुं निशिनिश्युदारचेताः ॥
भजति स खलु सर्वलोकपूज्यः ।
श्रियमतुलां समवाप्य यात्यनन्तम् ॥ ६७ ॥

अमुम्विधिंरासपूजाप्रकारं सकलभुवनमोहनं सकलभुवनवश्यकरं नियतमबाधेन योनिशिनिशिप्रतिरजनिउदारचेताः प्रसन्नमनाः सन् सम्यक्भजतिकुर्यात् ससर्वलोकपूज्यः सन् अतुलामतिशयितां

श्रियंसमृद्धिसमवाप्य अनन्तंविष्णुंयाति प्राप्नोति ॥ ६७ ॥

निशिवेति—

निशि वा दिनान्तसमये-
मपूजयेन्नित्यशोऽच्युतं भक्त्या ॥
सममफलमुभयं हि ततः-
संसाराब्धिं समुत्तितीर्षति यः ॥ ६८ ॥

यः पुमान् संसारसागरन्तरितुमिच्छतिसोऽच्युतं भक्त्यानिशि वा दिनान्तसमयेवासंध्यायां पूजयेत् नित्यशः प्रत्यहंहियतः उभयंनिशासंध्यापूजनद्वयंसमफलं ततस्तस्माद्धेतोः निशिवादिनान्तेवापूजयेदित्यर्थः ॥ ६८ ॥

उक्तमुपसंहरति ।

इत्येवमिति ।

इत्येवं मनुविग्रहं मधुरिपुं यो वा त्रिकालं यजे-
त्तस्यैवा ऽखिलजन्तुजातदयितस्याऽम्भोधिजावेश्मनः॥
हस्ते धर्मसुखार्थमोक्षतरवः सद्वर्गसम्प्रार्थिताः
सान्द्रानन्दमहारसद्रवमुचो येषां फलश्रेणयः ॥ ६९ ॥

इति अमुनाप्रकारेणयः पुमान्मन्त्रशरीरंमधुसूदनंत्रिकालंवा पूजयते् तस्यनानाविधप्राणिसमूहवल्लभस्य अम्भोधिजावेश्मनोलक्ष्मीनिवासस्यधर्मादिपुरुषार्थचतुष्टयवृक्षाः हस्तेभवन्तीतिशेषः कीदृशाः सतांवर्गः समूहः तेनप्रार्थिताः संसर्गीतिपाठेसंसर्गिभिर्निकटस्थैः यद्यपिमोक्षस्यफलंनास्तितथापिमोक्षपदेन्तद्धेतुभूतं तत्वज्ञानमुक्तं येषां वृक्षाणांफलपङ्क्तयः नित्यानन्दब्रह्मस्वरूपमहारसद्रवदाः ॥ ६९ ॥

अथेति ।

अथोच्यते पूर्वसमीरितानां-
पूजावसाने परमस्य पुंसः ॥
कल्पस्तु काम्येष्वपि तर्पणानां
विना ऽपि पूजां खलु यैः फलं तत् ॥ ७० ॥

अथानन्तरं परमस्यपुंसः श्रीगोपालकृष्णस्य पूजावसाने पूजानन्तरं पूर्वसमीरितानां श्रीमन्मुखइत्यादिकथितानांनित्यतर्पणानां कल्पः प्रकारः काम्येष्वापितर्पणेषुप्रकारउच्यतेयैस्तर्पणैः पूजां विनापि तत्फलं पूजाफलं प्राप्नोतियथापूजातथैवतर्पणम् ॥ ७० ॥

संतर्प्येति

संतर्प्य पीठमन्त्रैः सकृत्सकृत्प्रथममच्युतं तत्र ।
आवाह्य पूजयेत्तं तोयैरेवाखिलैः समुपहारैः ॥७१॥

प्रथमं पीठमन्त्रैराधारशक्त्यादिमन्त्रैः पीठाङ्गभूतदेवतां सकृत्सकृदेकैकवारंसंतर्प्य अनन्तरंतत्रतोयमयेपीठे अच्युतमावाह्यजलैरेवगन्धादिसकलोपचारात्मकैः पूजयेत् ॥ ७१ ॥

बद्ध्वेति ।

बद्ध्वाऽथ धेनुमुद्रां तोयैः सम्पाद्य तर्पणद्रव्यम् ॥
तद्बुद्ध्याऽञ्जलिना तं सुवर्णचषकीकृतेन तर्पयतु ॥७२॥

ततोधेनुमुद्रांबद्ध्वातोयैस्तर्पणद्रव्यं संपाद्य तद्द्रव्यरूपतयातोयं भावयित्वातद्बुद्ध्यातत्कथितद्रव्यतर्पणद्रव्यबुद्ध्यातं कृष्णंतर्पयतु केनाञ्जलिनाकीदृशेनसुवर्णचषकतयाविचिन्तितेनेत्यर्थः ॥ ७२ ॥

विंशतीति ।

विंशतिरष्टोपेता कालत्रयतर्पणेषु संख्योक्ता ॥
भूयः स्वकालविहितान्सकृत्तर्पयेच्च परिवारान् ॥७३॥

कालत्रयतर्पणेषुत्रिकालतर्पणेषु एकस्मिन् कालेऽष्टोपेता अष्टाविंशतिः तर्पणस्यसंख्योक्ता पुनः स्वकालविहितान्स्वस्मिन् प्रातर्मध्याह्नादौ येयेविहिताः परिवारा आवरणदेवतास्तान्सकृदेकैकवारंसन्तर्पयेत् ॥ ७३ ॥

कालत्रयस्यतर्पणद्रव्यमाह ।

प्रातरिति ।

प्रातर्दधिगुडमिश्रं मध्याह्ने पायसं सनवनीतम् ॥

क्षीरं तृतीयकाले ससितोपलमित्युदीरितं द्रव्यम् ॥७४॥

गुडसहितंदधिप्रातःकालेनवनीतसहितं पायसंमध्याह्नेससितोपलंशर्कराविकारसहितंक्षीरंतृतीयकाले इत्यमुनाप्रकारेणद्रव्यंतर्पणद्रव्यं कथितम् ॥ ७४ ॥

तर्पणमन्त्र माह—

तर्पयामीत्यादि ।

तर्पयामिपदं योज्यं मन्त्रान्ते स्वेषु नामसु ॥
द्वितीयान्तेषु तु ततः पूजाशेषं समापयेत् ॥ ७५ ॥

मन्त्रान्ते मूलमन्त्रावसाने स्वकीयानि तर्पणीयदेवतानां नामानितेषु तत्समीपेषु द्वितीयान्तेषु अमुकदेवतामित्यादिरूपेषु तर्पयामीतिपदं योज्यम् अनन्तरं पूजाशेषं समापयेत् ॥ ७५ ॥

उत्तरकृत्यमाह—

अभ्युक्ष्येति ।

अभ्युक्ष्यतत्प्रसादाद्भिरात्मानं प्रपिबेदपः ॥
तज्जप्त्वा तमथोद्वास्य तन्मयः प्रजपेन्मनुम् ॥७६॥

तत्प्रसादाद्भिः परमेश्वरप्रसादतर्पणजलैः आत्मानं शरीरं सिक्त्वातज्जप्त्वामन्त्रंजप्त्वा अपः प्रपिबेत् अथानन्तरंतंदेवमुद्वास्यस्वहृदये संयोज्यतन्मयः सन्मन्त्रं जपेत् ॥ ७६ ॥

सप्रकारंसद्रव्यं काम्यंतर्पणमाह—

अथेति ।

अथ द्रव्याणि काम्येषु वक्ष्यन्ते तर्पणेषु तु ॥
तानि प्रोक्तविधानानामाश्रित्यान्यतरं भजेत्॥७७॥

अथानन्तरंकाम्येषु तर्पणेषु यानिनारदादिभिः कथितानिद्रव्याणितानिवक्ष्यन्ते प्रोक्तविधानानांत्रिकालोक्तविधानानाम् अनन्तरम् एकंविधानमाश्रित्यकाम्यतर्पणकर्मभजेत् ॥ ७७ ॥

द्रव्यैरित्यादि ।

द्रव्यैः षोडशाभिरमुं प्रतर्पयेदेकशश्चतुर्वारम् ॥
स चतुःक्षीराद्यन्तैः सकृज्जलाद्यन्तमच्युतं भक्त्या ॥७८॥

षोडशभिर्द्रव्यैरमुं श्रीकृष्णं एकशश्चतुर्वारं तत्तद्द्रव्यबुद्ध्या जलैरेवतर्पयेत् कीदृशैः चत्वारि क्षीराणि आद्यं येषां तैः । षोडशद्रव्याणाम् आदौ दुग्धाञ्जलिचतुष्टयम् अन्ते च चतुष्टयमित्यर्थः सकृज्जलाद्यन्तमिति क्रियाविशेषणम् तथा च प्रथममेकवारं जलेन ततश्चतुर्वारं ततः चतुर्वारं क्षीरैः ततः सकृज्जलेन इति पर्यवसन्नम् ॥ ७८ ॥

षोडशद्रव्याण्याह—

पायसमिति ।

पायसदाधिककृसरगौडान्नपयोदधीनि नवनीतम् ॥
आज्यं कदलीमोचारजस्वलाचोचमोदकापूपम् ॥ ७९ ॥
पृथुकं लाजोपेतं द्रव्याणां कथितमिह षोडशकम् ॥
लाजान्तेऽन्त्यक्षीरात्प्राक्समर्प्यसितोपलापुञ्जैः ॥८०॥

पायसंपरमान्नं दाधिकं दध्नापरिष्कृतम् अन्नं कृसरं मुद्गौदनं गौडान्नं गुडोदकपक्वम् अन्नम्–पयोदुग्धम् दधि प्रसिद्धम् नवनीतम् आज्यम् घृतम् कदली चम्पाकदली मोचास्वर्णकदली रजस्वला कदलीविशेषः चोचोऽपि कदलीविशेषः मोदको लड्डुकः अपूपम् पूलिका पृथुकं चिपिटकं लाजसमेतम् लाजसहितम् इति द्रव्याणां षोडशकम् कथितम् इह ग्रन्थे लाजेति । लाजतर्पणानन्तरम् अन्त्यचतुःक्षीरतर्पणात् पूर्वं सितोपलापुञ्जैः श्वेतशर्करासमूहैः भावनया तोयभावापन्नैः सकृत्संतर्पयेत् ॥ ७९ ॥ ८० ॥

उक्तकाम्यतर्पणस्यफलमाह—

प्रगेइति ।

प्रगे चतुःसप्ततिवारमित्यमुं-
प्रतर्पयेद् योऽनुदिनं नरो हरिम् ॥

अनन्यधीस्तस्य समस्तसंपदः ।
करे स्थिता मण्डलतोऽभिवाञ्छिताः ॥ ८१ ॥

इत्यनेनप्रकारेणप्रगेप्रातःकालेचतुःसप्ततिवारम् अमुंहरिंकृष्णंयोनरः अनुदिनं प्रत्यहमनन्यधीः एकाग्रचित्तः सन्संतर्पयेत् तस्यपुंसः मण्डलतः एकोनपञ्चाशद्दिवसात् अर्वागितित्रिपाठिनः अष्टचत्वारिंशद्दिवसाभ्यन्तर इतिलघुदीपिकाकरः पञ्चत्रिंशद्दिवसाभ्यन्तर इति रुद्रधरः अभिवाञ्छिताआकाङ्क्षिताः सकलसिद्धिसमूहयः हस्तस्थिताभवन्ति अत्रसितोपलापुञ्जस्य गणना नकार्या ॥ ८१ ॥

काम्यतर्पणान्तरमाह—

धारोष्णेति ।

धारोष्णपक्वपयसीदधिनवनीते घृतं च दौग्धान्नम् ।
मत्स्यण्डीमध्वमृतं द्वादशशः तर्पयेन्नवभिरेभिः॥८२॥

धारोष्णम्पयः तदानींतनमेवानिष्पादितंदुग्धंतथापक्वम्पयः साधितंदुग्धंधारोष्णपक्वेचपयसीच अमूधारोष्णपक्वपयसीदधिप्रसिद्धंनवनीतं घृतंदौग्धान्नं पायसंमत्स्यण्डीशर्कराविशेषः सशर्करं विनष्टदुग्धमितित्रिपाठिनः मधुप्रसिद्धम् अमृतंएतैर्नवभिर्द्रव्यैर्द्वादशवारंतर्पयेत् ॥ ८२ ॥

एतस्यफलमाह—

तर्पणेति ।

तर्पणविधिरयमपरः पूर्वोदितसमफलोऽष्टशतसंख्यः ॥
कार्मणकर्मणि कीर्त्तौ जनसंवनने विशेषतो विहितः॥८३

अयं तर्पणप्रकारः पूर्वोक्ततर्पणप्रकाराद्भिन्नः कीदृशः पूर्वकथिततर्पणफलसमफलः पुनः कीदृशः अष्टोत्तरशतप्रमाणकः ततोनवभिर्द्रव्यैर्द्वादशकृत्वातर्पणेनाष्टोत्तरसंख्याभवति पुनः कीदृशः कार्मणकर्मणिवश्यकरणकर्मणितथाकीर्त्तौसत्कथायां जनसंवननेलोकवशीकरणेलोकप्रियत्वेनवाविशेषेणविहितः ॥ ८३ ॥

तर्पणान्तरमाह—

सखण्डेति ।

सखण्डधारोष्णधियामुकुन्दं-
व्रजन् पुरग्राममपि प्रतर्प्य ॥
लभेत भोज्यं सरसंसभृत्यै-
र्वासांसिधान्यानि धनानि मन्त्री ॥ ८४ ॥

शर्करायुक्तसद्योदुग्धबुद्ध्याजलेन मुकुन्दं प्रतर्प्य नगरं तथा ग्रामं व्रजन् साधकः अनुगैः सह सरसंमधुरादिरससहितं भक्षणीयं तथा वस्त्राणिधान्यानि सुवर्णादीनि प्राप्नोति ॥ ८४ ॥

तर्पणस्याऽशेषफलदातृतां तर्पणोत्तरकृत्यं च दर्शयति ।

यावदित्यादि ।

यावत्संतर्पयेन्मन्त्रीतावत्संख्यंजपेन्मनुम् ।
तर्पणेनैव कार्याणि साधयेदखिलान्यपि ॥ ८५ ॥

अखिलानि समस्तानि कार्याणि वाञ्छितानि तर्पणेनैव विनापि पूजाहोमं साधयेत् अत्र यावत्संख्यं तर्पणं करोति तावत्संख्यं मन्त्रंजपेत् ॥ ८५ ॥

प्रयोगान्तरमाह—

द्विज इति ।

द्विजोभिक्षावृत्तिर्य इह दिनशो नन्दतनयः
स्वयं भूत्वा भिक्षामटति विहरन् गोपसुदृशाम् ॥
अमा चेतोभिः स्वैर्ललितललितैर्नर्मविधिभि-
र्दधिक्षीराज्याढ्यां प्रचुरतरभिक्षां स लभते ॥८६॥

भिक्षावृत्तिर्जीवनोपायो यस्य स द्विजोत्रैवर्णिकोदिनशः प्रतिदिनं स्वयं नन्दतनयो भूत्वातद्रूपेणात्मानं विचिन्त्यइह भिक्षामटतियाचते किङ्कुर्वन् स्वकीयैर्लोलितललितैः अतिमनोहरैः नर्मविधिभिः क्रीडाकर्मभिर्गोपसुदृशां गोपस्त्रीणां चेतोभिः सार्द्धं

विहरन् अमाशब्दः सहार्थे सदधिदुग्धघृतप्रचुरां बह्वीभिक्षां प्राप्नोति ॥ ८६ ॥

यन्त्रमाह—

मध्य इति ।

मध्ये कोणेषु षट्स्वप्यनलपुरपुटस्यालिखेत्कर्णिकायां-
कन्दर्पं साध्ययुक्तं विवरगतषडर्णं द्विशः केशरेषु ॥
शक्ति श्रीपूर्वकानि द्विनवलिपिमनोरक्षराणि च्छदानां-
मध्ये वर्णान् दशानां दशलिपिमनुवर्यस्य चैकैकशो
ऽब्जम् ॥ ८७ ॥

दशदलपद्मं विलिख्यकर्णिकायां षट्कोणं वह्निगृहं विलिख्यवह्निगृहयुग्मस्य मध्ये षट्कोणेषु विलिखेत् लेखन प्रकारमाह कर्णिकायां मध्ये साध्यनामसहितम् अमुकस्यामुकं सिद्ध्यत्वित्यनेन सहितं कन्दर्पं कामबीजं विलिखेत् तथाविवरगतं षडर्णं षट्कोणगतवक्ष्यमाणषडक्षरं विलिखेत् तथा केशरेषु दशदलमूलेषु द्विशः द्वौद्वौकृत्वाद्विनवलिपिमनोरष्टादशाक्षरमन्त्रस्य शक्तिश्रीपूर्वकानि भुवनेश्वरीबीजश्रीबीजाद्यान्यक्षराणि-विलिखेत् तथा दशानां पत्राणां मध्ये दशलिपिमनुवर्यस्य दशाक्षरमन्त्रश्रेष्ठस्य वर्णान् एकैकशोविलिखेत् ततोऽब्जंपद्मम् ॥ ८७ ॥

भूसद्मना ऽभिवृतमस्त्रगमन्मथेन ।
गोरोचनाऽभिलिखितं तपनीयसूच्या ॥
पट्टे हिरण्यरचिते गुलिकीकृतं तद्-
गोपालयन्त्रमखिलार्थदमेतदुक्तम् ॥ ८८ ॥

(गोपालयन्त्रमुक्तं किंभूतम्) भूबिम्बेन चतुरस्रेण वेष्टितं कुर्यात् कीदृशेनभूसद्मना अस्त्रगमन्मथेनकोणगतकामबीजेनएतदखिलार्थदं गोपालयन्त्रमुक्तं कीदृशं सुवर्णशलाकयागोरोचनादिनासुवर्णरचितपट्टेलिखितम् अनन्तरंवर्तुलीकृतम् ॥ ८८ ॥

संस्कारभूतफलंदर्शयति—

सम्पातेति ।

संपातसिक्तमभिजप्तमिदं महद्भि-
र्धार्यं जगत्त्रयवशीकरणैकदक्षम् ।
रक्षायशःसुतमहीधनधान्यलक्ष्मी
सौभाग्यलिप्सुभिरजस्रमनर्घ्यवीर्यम् ॥ ८९ ॥

इदंयन्त्रंसंपातासिक्तम् आहुतिदानशेषपुरःस्थितघृतसिक्तं तथा-मन्त्रेणाभिमन्त्रितं रक्षाभयनिवारणं यशः सत्कथाप्रकाशः सुतः पुत्रः महीपृथिवी धनं सुवर्णादि लक्ष्मीः सर्वसंपत्तिः सौभाग्यं सर्वजनप्रियत्वम् एतत्प्राप्तुमिच्छद्भिर्महद्भिः शौचयुक्तैः सततंधारणीयम् अयमर्थः यथोक्तं यन्त्रंसम्पाद्यप्राणप्रतिष्ठांकृत्वापञ्चगव्यपञ्चामृतादिभिः अभिषिच्य अष्टोत्तरशतंसहस्रंवा-संपातघृतसिक्तं कृत्वा यथोक्तसंख्यंजप्त्वाधारयेदितिकीदृशंजगत्-त्रयायत्तीकरणकुशलं पुनः अनर्घ्यवीर्यमहाप्रभावम् ॥ ८९ ॥

यन्त्रस्यदर्शयति धारणादन्यत्राप्युपयोगं—
भूतोन्मादेति ।

भूतोन्मादापस्मृतिविषमूर्छाविभ्रमज्वरार्त्तानाम् ।
ध्यायन्शिरसि प्रजपेन्मन्त्रमिमं
झटितिशमयितुंविकृतिम् ॥ ९० ॥

भूतः श्मशानदेशवर्त्ती अदृश्यरूपोऽनिष्टकारीउन्मादश्चित्त-विभ्रमः अपस्मृतिरपस्मारणयोगः विषंमूर्छाकारिस्थावरं जङ्गमञ्च मूर्छा अचेष्टा विभ्रमः प्रमादः ज्वरोरोगविशेषः एतैरार्त्तानां पीडितानां शिरसिमस्तकोपरि इदं यन्त्ररूपंध्यायनिमञ्चोपालमन्त्रंजपेत् किङ्कर्तुंविकृतिंझटितिशीघ्रंशमयितु नाशयितुम् ॥ ९० ॥

यन्त्रषडक्षरमन्त्रमुद्धरति—
स्मरेति ।

स्मरस्त्रिविक्रमाक्रान्तश्चक्रीष्णायहृदित्यसौ ॥
षडक्षरोऽयं संप्रोक्तः सर्वसिद्धिकरोमनुः ॥ ९१ ॥

स्मरः कामबीजंत्रिविक्रमः ऋकारः तेनक्रान्तः संबद्धः चक्री-

ककारः तथाकृ इतिष्णायेति स्वरूपंहृन्नमः इत्यनेन प्रकारेणाऽसौ-षडक्षरोऽयंमन्त्रः सम्प्रोक्तः सर्वसिद्धिकरः अखिलकामदः ॥ ९१ ॥

शक्तिबीजमुद्धरति ।

क्रोड इति ।

क्रोडोऽग्निदीप्तोमायाबीलवलाञ्छितमस्तकः ॥
सैषाशक्तिः परासूक्ष्मानित्यासंवित्स्वरूपिणी॥९२॥

क्रोडोहकारः कीदृश अग्निनारेफेणदीप्तः पुनः मायावीदीर्घ-ईकारः तद्युक्तः पुनः लवेनविन्दुनालाञ्छितंमस्तकं यस्यसतथा. सानुस्वारइत्यर्थः एषाशक्तिः पराउत्कृष्टासूक्ष्मामृणालतन्तुसदृशी-नित्याजन्मनाशरहितासंवित्स्वरूपिणी स्वप्रकाशरूपिणी ॥ ९२ ॥

श्रीवीजमुद्धरति—

अस्थीति ।

अस्थ्यग्निगोविन्दलवैर्लक्ष्मीबीजंसमीरितम् ॥
आभ्यामष्टादशालिपिः स्याद्विंशत्यक्षरोमनुः॥९३॥

अस्थिशकारः अग्निःरेफः गोविन्दोदीर्घ ईकारः लवोविन्दुः एतैः संयुक्तैः श्रीवीजंसमीरितंकथितम आभ्यां शक्तिश्रीवीजाभ्यां सहितः पूर्वोक्ताष्टादशाक्षरमन्त्रः विंशत्यक्षरोभवति ॥ ९३ ॥

परमेश्वर—पूजास्थाननियतिंदर्शयति ।

शालग्राम इत्यादिना ।

शालग्रामेमणौयन्त्रे मण्डले प्रतिमासुच ॥
नित्यं पूजाहरेः कार्या नतु केवलभूतले ॥ ९४ ॥

शालग्रामे प्रसिद्धेमणौगोमेदपद्मरागादौयन्त्रेऽस्मिन्नेवगोपाल-यन्त्रेमण्डले सर्वतोभद्रादौसोमसूर्याग्निमण्डलेवेति रुद्रधरः प्रति-मासुसुवर्णादिगोपालप्रतिमायाम अत्रहरेर्नित्यं सर्वदापूजाकार्या नतुकेवलायां भूमौ ॥ ९४ ॥

कथितप्रकाराणां फलदर्शयति—

इतीति ।

इति जपहुतपूजातर्पणाद्यैर्मुकुन्दं
य इह भजति मन्त्रोरेकमाश्रित्य नित्यम् ॥
स तु सुचिरमयत्नात्प्राप्य भोगान् विशेषान्
पुनरमलतरन्तद्धाम विष्णोः प्रयाति ॥ ९५ ॥

इति श्रीकेशवभट्टाचार्यविरचितायां
क्रमदीपिकायां पञ्चमः पटलः ॥ ५ ॥

इतिकथितप्रकारैर्जपहोमपूजातर्पणैः आदिपदादभिषेकादिनायो-मुकुन्दंनित्यंसेवते किं कृत्वा मन्त्वोर्दशाष्टादशाक्षरयोरेकंगृहीत्वा इहलोके अयत्नात्सुचिरंसर्वकालं सर्वान्भोगान्प्राप्यपुनरन्ते प्र-सिद्धं निर्मलन्तेजः प्राप्नोतितद्धामाभवतीत्यर्थः ॥ ९५ ॥

इति श्रीगोविन्दविद्याविनोदभट्टाचार्यविरचिते क्रमदीपिका-विवरणपञ्चमः पटलः ॥ ९५ ॥

अथैवं साधितमन्त्रयोः प्रयोगादीन् दर्शयति ।

विनियोगानिति ।

विनियोगानथो वक्ष्ये मन्त्रयोरुभयोः समान् ॥
तदर्थकारिणोऽनन्तवीर्यान्मन्त्रांश्च कांश्चन ॥ १ ॥

अथो अनन्तरं मन्त्रयोर्दशाष्टादशाक्षरयोः समान् ध्यानविशे-षेणविनियोगान् तथा तदर्थकारिणोऽनन्तवीर्यान् वहुफलदातॄन् कांश्चिन्मन्त्रान् वक्ष्ये ॥ १ ॥

प्रयोगार्थं दशाष्टादशाक्षरयोर्ध्यानमाह ।

वन्द इति ।

वन्दे तं देवकीपुत्रं सद्योजातं घुसप्रभम् ॥
पीताम्बरं करलसच्छङ्खचक्रगदाम्बुजम् ॥ २ ॥

उक्तरूपं प्रसिद्धं देवकीपुत्रंसद्योजातं बालकं घुसप्रभम् आकाशसमानकान्ति श्यामम्पीतवस्त्रं करं लसन्ति शोभमानानि शङ्खचक्रगदापद्मानियस्यतं वन्देनमस्करोमि ॥ २ ॥

एवमिति—

एवं ध्यात्वाजपेल्लक्षं मन्त्रं ब्राह्ममुहूर्तके ॥
स्वादुप्लुतैश्च कुसुमैः पलाशैरयुतं हुनेत् ॥ ३ ॥

एवममुनाप्रकारेणब्राह्मे मूहूर्त्ते केउदयात्प्राक्दण्डद्वये दण्डचतुष्टय इति कश्चित् मन्त्रम् उभयोरेकं लक्षंजपेत् अनन्तरं पलाशपुष्पैः स्वादुप्लुतैर्घृतमधुशर्करामाहितैर्दशसहस्रंजुहुयात् ॥ ३ ॥

फलमाह—

मन्वोरिति ।

मन्वोरन्यतरेणैवं कुर्याद्यः सुसमाहितः ॥
स्मृतिं मेधां मतिबलं लब्ध्वा स कविराड् भवेत् ।
स्यान्मनुस्तत्समजपध्यानहोमफलोऽपरः ॥ ४ ॥

मन्वोर्दशाष्टादशाक्षरयोरन्यतरेणएकेनसुसमाहितः सुसंयतः । सन् य एव कुर्यात् स स्मृतिं स्मरणं मेधांधारणावतींबुद्धिं मति सम्यक् ज्ञानं बलमहाप्राणत्वम् एतत्सर्वं प्राप्य कविराट् कविश्रेष्ठोभवति स्यादिति अपरो ऽग्रेवक्ष्यमाणमन्त्रः कथितमन्त्रद्वयसमानजपध्यानहोमफलोभवति ॥ ४ ॥

मन्त्रमाह—

श्रीमन्मुकुन्देति ।

श्रीमन्मुकुन्दचरणौसदेतिशरणन्ततः ।
अहं प्रपद्य इत्युक्तो मौकुन्दोऽष्टादशाक्षरः ॥ ५ ॥

श्रीमन्मुकुन्दचरणौ सदेतिस्वरूपन्ततस्तदनन्तरंशरणमिति स्व-

रूपम् अहं प्रपद्य इति स्वरूपमित्यनेनप्रकारेण मौकुन्दो मुकुन्दसम्बन्धी अष्टादशाक्षरो मन्त्रः कथितः ॥ ५ ॥

ऋष्यादिकमाह—

नारद इति ।

नारदोऽस्य तु गायत्री मुकुन्दश्चार्षिपूर्वकाः ।
प्रातः प्रातः पिबेत्तोयं जप्तं योऽष्टोत्तरं शतम् ॥
अनेन षड्भिर्मासैः स भवेच्छ्रुतधरो नरः ॥ ६ ॥

अस्यमन्त्रस्य नारदोमुनिर्गायत्रीछन्दोमुकुन्दोदेवताऋषिपूर्वकाः ऋष्याद्याः ऋषिच्छन्दोदेवताइत्यर्थः तेचनारदादयः ।

प्रयोगमाह ।

प्रातः प्रत्यहम् अष्टोत्तरं शतं जप्तं मन्त्रजप्तंजलं पिबेत्सनरो अनेनविधानेनषड्भिर्मासैः श्रुतधरोभवेत् ॥ ६ ॥

प्रयोगान्तरमाह—

उपसंहृतदिव्याङ्गं पुरोवन्मातुरङ्कगम् ।
चलदोश्चरणं बालं नीलाभं संस्मरन् जपेत् ॥ ७ ॥

उपसंहृतदिव्याङ्गं त्यक्तचतुर्बाहुरूपं धृतबाहुद्वयं पुरावत् यथा-वसुदेवसद्मनि भीतेन दिव्याङ्गमुपसंहृतं मातुरङ्कगं देवकीक्रोडस्थितंचलद्दोश्चरणं चञ्चलहस्तपादं बालंशिशुंनीलाभंकृष्णंसंस्मरन् ॥ ७ ॥

अयुतं तावदेवाज्यैर्जुहुयाच्च हुताशने ॥
सलभेदचलां भक्तिं श्रद्धां शान्तिं च शाश्वतीम् ॥ ८ ॥

अयुतं जपेत् तावदेवाज्ञावाज्यैर्घृतैर्जुहुयात् यः स स्थिरां परमेश्वरविषयिणीमाराध्यत्वबुद्धिं शुद्धां शास्त्रबोधिते ऽर्थे ऽवश्यम्भाविनिश्चयाऽऽत्मिकां शान्तिं मोक्षरूपां शाश्वतीं नित्यां प्राप्नोतिदशाष्टादशाक्षरयोर्विशेषध्यानमिदं प्रयोगार्थमिति भैरवत्रिपाठिनः ॥ ८ ॥

मन्त्रान्तरमाह—

मनुनैतदिति ।

मनुनैतत्समस्तान्ते मरुन्नमितशब्दतः ॥

बाललीलात्मने हुंफट् नम इत्यमुनाऽथवा ॥ ९ ॥

अथवा अमुनावक्ष्यमाणमन्त्रेणैतत्प्रयोगजातं साधयेत् मन्त्रमाह समस्तेति स्वरूपम् अस्याऽन्ते मरुन्नमित इति स्वरूपम् एतस्माच्छब्दात् बाललीलात्मने हुंफडिति स्वरूपं नम इति स्वरूपम् अयमप्यष्टादशाक्षरः दशाष्टादशाक्षरसमानः ॥ ९ ॥

ऋष्यादीनाह—

नलेति ।

नलकूबरगायत्रीबालकृष्णा इतीरिताः ॥

ऋष्याद्याः सिद्धयः सर्वाः स्युर्जपाद्यैरिहामुना॥१०॥

अस्य मन्त्रस्य ऋष्याद्याः ऋषिः छन्दो देवता नलकूबरप्रभृतयः तत्र नलकूबरो मुनिर्गायत्री छन्दः बालकृष्णोदेवता इति इह भुवने जपाद्यैः सर्वाः सिद्धयोभवन्ति ॥ १० ॥

लम्बितमिति ।

लम्बितं बालशयने रुदन्तं बल्लवीजनैः ॥

प्रेक्ष्यमाणं दुग्धबुद्ध्या तर्पयेत्सोऽश्नुते ऽशनम्॥११॥

बालशयनेआन्दोलिकायां लम्बितं स्थितं रुदन्तं क्रन्दमानं बल्लवीजनैर्गोपीभिः प्रेक्ष्यमाणं दृश्यमानं प्रेर्यमाणमिति पाठे चाल्यमानमित्यर्थः दुग्धबुद्ध्याजलेन तर्पयेत् अशनं भक्ष्यवस्तु अश्नुते प्राप्नोति ॥ ११ ॥

मन्त्रान्तरमाह—

अमुना वा ऽन्नरूपान्ते रसरूपपदं वदेत् ॥

तुष्टरूपनमोब्रह्मन्नमन्नाधिपतये मम ॥

अन्नं प्रयच्छस्वाहेति त्रिंशद्वर्णोऽन्नदो मनुः ॥१२॥

अमुनामन्त्रेण पूर्वोक्तं कुर्यात् ।

मन्त्रमाह अन्नरूप इति शब्दान्ते रसरूप इति स्वरूपं तुष्टरूपेति स्वरूपं नमोह्नन्द्वामिति नमोनम इति स्वरूपम् अन्नाधिपतये ममान्नं प्रयच्छस्वाहेति त्रिंशदक्षरो अन्नदमन्त्रः दशाष्टादशाक्षरसमानः ॥ १२ ॥

ऋष्यादीनाह—

नारदेति ।

नारदानुष्टुबन्नाधिपतयोऽस्यर्षिपूर्वकाः ॥
भूतबालग्रहोन्मादस्मृतिभ्रंशाद्युपद्रवैः
पूतनास्तनपातारं ग्रस्तमूर्द्ध्नि स्मरन् जपेत् ॥१३॥
सासुचूषणनिर्भिन्नसर्वाङ्गीं रुदतीं च ताम् ॥
आविश्य सर्वे मुक्त्वा तं विद्रवन्ति द्रुतं ग्रहाः ॥१४॥

अस्य मन्त्रस्य नारदोमुनिः अनुष्टुपछन्दः अन्नाधिपतिर्देवता प्रयोगमाह भूतेति भूतपिशाचादिर्बालग्रहो रोगविशेषः उन्मादश्चित्तभ्रमः स्मृतिभ्रंशः सम्मोहः एतैरुपद्रवैरुपतापैः ग्रस्तमूर्द्ध्नि उपतप्तमस्तके पूतनास्तनपायिनं कृष्णं स्मरन् मन्त्रं जपेत् ॥ १३ ॥

तां पूतनां रुदतीं क्रन्दमानां भावयेत्—

पुनः कीदृशीं

सासुचूषणं सह प्राणेन यत् चूषणं समाकर्षणं तेन निर्भिन्नमनायतं सर्वाङ्गं यस्याः सा तथा तां किं भूत्वा जपेत् आविश्य अहमेव हरिरिति भावयित्वा अनन्तरं तं ग्रस्तं सर्वे ग्रहा उपद्रवा मुक्त्वा परित्यज्य द्रुतं शीघ्रं विद्रवन्ति पलायन्ते अत्र दशाष्टादशाक्षरयोर्विशेषध्यानमिदं प्रयोगार्थमिति त्रिपाठिनः ॥ १४ ॥

प्रयोगान्तरमाह—

जुहुयादिति ।

जुहुयात् खरमञ्जर्या मञ्जरीभिर्विभावसौ ॥
सुस्नातः पञ्चगव्याद्भिः पूतनाहन्तुरानने ॥ १५ ॥

खरमञ्जर्या अपामार्गस्य मञ्जरीभिरग्रभागैः पञ्चगव्यजलैः सिक्तै-

विभावसौ वह्नौ पूतनाहन्तुः कृष्णस्याननरूपे जुहुयात् ॥ १५ ॥

प्राशयेच्छिष्टगव्यं तत् कलसेनाऽभिषेचयेत् ॥
साध्यं सहस्रजप्तेन सर्वोपद्रवशान्तये ॥ १६ ॥

होमावशिष्टं पञ्चगव्यसाध्यं प्राशयेत् सहस्रजप्तेन पूर्वोक्तविधिनासाधितेन कलसेन वाऽभिषेचयेत् सर्वोपद्रवनिवृत्त्यर्थम् ॥१६॥

मन्त्रान्तरमाह—

अमुनैतदिति ।

अमुनैतद्द्वादशार्णहुंफट्स्वाहान्तकेन वा ॥
ऋष्याद्या ब्रह्मगायत्र्यौग्रहघ्नहरयोऽस्य तु ॥ १७ ॥

एतत्पूर्वोक्तप्रयोगद्वयं वक्ष्यमाणमन्त्रेण वा कुर्यात् मन्त्रमाह द्वादशेति पूर्वोक्तवासुदेवद्वादशाक्षरान्तेहुंफट्स्वाहेति षोडशाक्षरो मन्त्रः दशाष्टादशाक्षरसमानः ऋष्यादिकमाह ऋष्याद्याइति ऋषिप्रभृतयो ब्रह्मादयः तत्र ब्रह्मा ऋषिः गायत्रीछन्दः ग्रहघ्नरूपो हरिर्देवता ॥ १७ ॥

निजेति ।

निजपादाम्बुजाक्षिप्तशकटं चिन्तयन् जपेत् ॥
अयुतंमन्त्रयोरेकं सर्वविघ्नोपशान्तये ॥ १८ ॥

निजचरणकमलनिक्षिप्तशकटं हरिंचिन्तयेत् मन्त्रयोः पूर्वमन्त्रापरमन्त्रयोरेकमयुतं जपेत् किमर्थं सकलविघ्नोपशमनार्थं दशाष्टादशाक्षरयोरेव सर्वविघ्नशान्त्यर्थं विशेषध्यानामिति त्रिपाठिनः ॥१८॥

अधुना पूर्वोक्तश्रीमन्मुकुन्देत्यादि चतुर्णां मन्त्राणामङ्गावरणानि दर्शयति—

अङ्गानीति ।

अङ्गान्यमीषां मन्त्राणामाचक्रादिभिरर्चना ॥
अङ्गैरिन्द्रादिवज्राद्यैरुदिता सम्पदे सदा ॥ १९ ॥

अमीषां कथितमन्त्राणाम् आचक्रादिभिर्दशाक्षरकथितैरङ्गानि

कार्याणि अर्चना पूजातु अङ्गैस्तथेन्द्राद्यैस्तदायुधैश्चेति सम्पत्त्यर्थं सदा कथिता ॥ १९ ॥

मृत्युञ्जयविधिं दर्शयति।

दशाष्टादशाक्षरयोर्वाऽऽरोग्यार्थं विशेषध्यानमाह—बाल इत्यादिनेति त्रिपाठिनः।

बाल इति।

बालो नीलतनुर्दोर्भ्यां दध्युत्थं पायसन्दधत् ॥
हरिर्वोऽव्याद्द्वीपिनखकिङ्किणीजालमण्डितः॥२०॥

हरिर्वोयुष्मान् रक्षतु कीदृशः बालः पञ्चवर्षीयः पुनः कीदृशः नीलतनुः पुनः कीदृशः हस्ताभ्यां दध्युत्थं नवनीतं पायसं परमान्नञ्च धारयन् पुनः कीदृशः व्याघ्रनखक्षुद्रघण्टिकासमूहाभ्यामलंकृतः ॥ २० ॥

ध्यात्वैवमग्नौजुहुयात् शतवीर्याङ्कुरत्रिकैः।
पयःसर्पिःप्लुतैर्लक्षमेकं तावज्जपेन्मनुम् ॥ २१ ॥

एवंभूतं हरिंध्यात्वावह्नौशतवीर्याङ्कुरैः दूर्वाङ्कुरैस्त्रिभिः—

कीदृशैः।

पयोदुग्धं सर्पिर्घृतं ताभ्यां प्लुतैःसिक्तैः एकं लक्षंजुहुयात् लक्षमेकंजपेत् ॥ २१ ॥

गुरवे दक्षिणां दत्वा भोजयेद्द्विजपुङ्गवान्।
स ब्दानां शतं जीवेन्न रोगी नाऽत्र संशयः॥२२॥

अनन्तरंगुरवेदक्षिणांदत्वाब्राह्मणान्भोजयेच्च स वर्षाणां शतं रोगरहितः सन् जीवेत् अत्रसंशयोनास्ति ॥ २२ ॥

मन्त्रान्तरमाह—

अत्रेति।

अत्राऽपरोमनुर्ब्रह्मदशार्णान्ते पुरुषोत्तम।
आयुर्मेदेहिसम्भाष्य विष्णवे प्रभविष्णवे ॥ २३ ॥

नमोन्तो ह्यधिकत्रिंशद्वर्णोऽस्यार्षिस्तु नारदः
छन्दोऽनुष्टुप्देवता च श्रीकृष्णोऽङ्गान्यतो ब्रुवे॥२४॥

एतादृशेकार्येऽपरो मन्त्रोऽस्ति ।

मन्त्रमाह—

द्वादशाक्षरवासुदेवमन्त्रान्ते पुरुषोत्तम इति स्वरूपम् आयुर्मेदेहीतिस्वरूपं विष्णवेप्रभविष्णवे इति स्वरूपं नमइत्यन्तोह्यधिकत्रिंशद्वर्णोद्वात्रिंशदक्षरोमन्त्रः कथितः तु पुनः अस्यमन्त्रस्यनारदऋषिरनुष्टुप्छन्दोदेवता श्रीकृष्ण इति अतोऽनन्तरम् अङ्गानिब्रुवेवदामि ॥ २३ ॥ २४ ॥

रवीति—

रविभूतेन्द्रियवसुनेत्रार्णैश्चात्मनेयुतैः ।
महानन्दपदज्योतिर्मायाविद्यापदैः क्रमात् ॥ २५ ॥

द्वादशपञ्चपञ्चाष्टद्विसंख्यातैर्मन्त्राक्षैररात्मनेपदान्तैर्महानन्दादिपदैः सह क्रमेण पञ्चाङ्गानि, सहानन्देत्यपिक चित्पाठः ॥ २५ ॥

एतस्यपुरश्चरणादिमाह—

जप्त्वेति ।

जप्त्वा लक्षमिमं मन्त्रमयुतं पायसैर्हुनेत ।
पूर्ववद्दूर्वयाजुह्वदायुर्दीर्घतरंलभेत् ॥ २६ ॥

इमं मन्त्रं लक्षं जप्त्वापायसैरयुतंहुनेत् जुहुयात् एवं मन्त्रं संसाध्यपूर्ववद्दूर्वयाऽङ्कुरकैः दुग्धघृतामिलितैर्लक्षमेकंजुहुयात् । अपँश्च दीर्घतरमतिशतमायुः प्राप्नोति ॥ २६ ॥

दारयन्तमिति—

दारयन्तं वकं दोर्भ्यां कृष्णं संगृह्य तुण्डयोः ।
स्मरन् शिशूनामातङ्केस्पृष्ट्वाऽन्यतरमभ्यसेत् ॥
तज्जप्ततिलजाभ्यङ्गाद्भवेयुः सुखिनश्च ते ॥ २७ ॥

शिशूनां वालानामातङ्केभयेसमुपस्थिते तान् वालान् स्पृष्ट्वा-कृष्णंस्मरन् अन्यतरमुकेष्वेकंमन्त्रंमभ्यसेज्जप्यात् कीदृशंकृष्णं क-

राभ्यांतुण्डयोः संगृह्य वकनामानमसुरं विदारयन्तं तन्मन्त्रजप्त-तैलाभ्यङ्गात्तेबालाः सुखिनोभवन्ति स्मरन्निति शिशुनामानं कृष्णं-स्मरन् के शिरसिस्पृष्ट्वाजप्यादितिबोद्धव्यमत्रदशाष्टादशाक्षरयो-र्विशेषध्यानमिति त्रिपाठिनः ॥ २७ ॥

अस्मिन्नेवबालरक्षार्थेऽन्योपिमन्त्रोस्तीत्याह—

अत्राप्यन्य इति ।

अत्राऽप्यन्यो मनुर्बालवपुषे वह्निवल्लभा ।
गोरक्षायां क्वणद्वेणुं चारयन्तं पशूँस्तथा ॥ २८ ॥

बालवपुषे इति स्वरूपंवन्हिवल्लभेतिस्वाहा अस्मिन्नर्थेगोरक्षायां च विशेषध्यानमाह क्वणदिति वेणुवादनपरं पशूँश्चारयन्तं कृष्णं-स्मरन् जप्यात् ॥ २८ ॥

अस्मिन्नेवबालकरक्षार्थेगोरक्षायां च मन्त्रान्तरमाह—

उक्त्वेति ।

उक्त्वा गोपालकपदं पुनर्वंशधराय च ।
वासुदेवाय वर्मास्त्रशिरांस्यष्टादशाक्षरः ॥ २९ ॥

गोपालक इत्युक्त्वापुनर्वंशधराय इत्युक्त्वावासुदेवायेतिवदेत् वर्महुम् अस्त्रं फडितिशिरः स्वाहा एतानिवदेत् एवं सति अष्टा-दशाक्षरोभवति ॥ २९ ॥

मनोर्नारदगायत्रीकृष्णर्ष्यादिरनेनवा ।
कुर्याद्गोपालसंरक्षामाचक्राद्यङ्गिना बुधः ॥ ३० ॥

अस्यपूर्वोक्तस्यचमनोर्नारदोमुनिर्गायत्रीच्छन्दः श्रीकृष्णोदेवता अनेनवामन्त्रेणउक्तद्रव्यादिनावागोपालरक्षांकुर्यात कीदृशेन आच-क्राद्यङ्गयुक्तेन ॥ ३० ॥

विषहरणप्रयोगमाह—

कुम्भीनसेति ।

कुम्भीनसादिक्ष्वेडार्त्तौ दष्टमूर्ध्नि स्मरन् हरिम् ।
नृत्यन्तं कालियफणारङ्गेऽन्यतरमभ्यसेत् ॥ ३१ ॥

दृशा पीयूषवर्षिण्या सिञ्चन्तं तत्तनुं बुधः ।
तर्जयन् वामतर्जन्या तं द्राङ्मोचयते विषात् ॥३२॥

कुम्भीनसादिक्ष्वेडार्त्तौ सर्पविषपीडायाम् ।
कुम्भीनसास्तु ते सर्पा ये स्युर्दृष्टिविषोल्बणाः ॥
इति धरणिः ।

आदिपदाद्वृश्चिकादिसंग्रहः दष्टमूर्द्ध्नि आर्त्तमस्तके स्पृष्ट्वा कालियः नागविशेषस्तस्यफणासैवरङ्गभूमिस्तत्रनृत्यन्तं स्मरन् अन्यतममन्त्रमभ्यसेत् जपेत् कीदृशं हरिं तत्तनुंशरीरम् अमृतवर्षिण्या दृष्ट्या सिञ्चन्तं किंकुर्वन्स्मरेत् वामतर्जन्यातर्जयन् एवं सति तं दष्टं मन्त्री द्राक्शीघ्रंविषान्मोचयेत् अत्रदृशाष्टादशाक्षरयोर्विशेषध्यानमितित्रिपाठिनः ॥ ३१ ॥ ३२ ॥

प्रयोगान्तरमाह—

आपूर्येति ।

आपूर्यकलशं तोयैः स्मृत्वा कालियमर्दनम् ।
जप्त्वाऽष्टशतमासिञ्चेद्विषिणं स सुखी भवेत् ॥३३॥

कलशंतोयैरापूर्याऽनन्तरङ्कालियमर्दनंदेवं स्मृत्वा ऽऽष्टाधिकं शतं जप्त्वातेनकलशेनविषिणं विषयुक्तम् आसिञ्चेत् अनन्तरंविषात्सुखीभवति ॥ ३३ ॥

कालियमर्दनमन्त्रमाह—

काव्यमध्य इति ।

काव्यमध्ये लियस्यान्ते फणामध्येदिवर्णकान् ।
उक्त्वा पुनर्वदेन्नृत्यङ्करोति तमनन्तरम् ॥ ३४ ॥
नमामि देवकीपुत्रमित्युक्त्वा नृत्यशब्दतः ।
राजानमच्युतं ब्रूयादिति दन्तलिपिर्मनुः ॥ ३५ ॥

काव्य इत्यक्षरद्वयोर्मध्ये लियस्येति स्वरूपम् एतस्यान्ते फणामध्येदि इति स्वरूपम् इत्यन्तान् वदेत् अनन्तरं नृत्यं करोतितमिति अनन्तरं नमामिदेवकीपुत्रम् इति वदेत् अनन्तरं नृत्य-

शब्दतः नृत्यशब्दान्ते राजानमच्युतमिति ब्रूयादित्यनेन प्रकारेण-वृन्तालिपिद्वात्रिंशदक्षरोमन्त्रः कथितः ॥ ३४ ॥ ३५ ॥

अस्य मन्त्रस्य अङ्गादीनिदर्शयति—

अस्येति ।

अस्याऽङ्गान्यङ्घ्रिभिर्व्यस्तैः समस्तैर्नारदो मुनिः ।
छन्दोऽनुष्टुप्देवता च कृष्णः कालियमर्दनः॥३६॥

अस्य मन्त्रस्य व्यस्तैरेकैकम् अङ्घ्रिभिश्चतुर्भिः पादैः समस्तैर्मन्त्रात्मकैश्चाङ्गानिपञ्चाङ्गानिकथितानि मुनिः नारदः छन्दो ऽनुष्टुप् कालीयमर्दनः कृष्णोदेवता ॥ ३६ ॥

पुरश्चरणमाह—

जप्य इति ।

जप्यो लक्षं मनुरयं होतव्यं सर्पिषाऽयुतम् ।
अङ्गदिक्पालवज्राद्यैरर्चनाऽस्य समीरिता ॥ ३७ ॥

अयं मन्त्रः लक्षं जप्यः सर्पिषाघृतेन पुनरयुतं होतव्यम् अङ्गदिक्पालवज्राद्यैस्त्रिभिरावरणैरर्चनापूजाकथिता ॥ ३७ ॥

प्रयोगमाह—

क्रियेति ।

क्रिया सर्वा च कर्तव्याविषघ्नी पूर्वमीरिता ।
सदृशोऽनेन जगति नहि क्ष्वेडहरो मनुः ॥ ३८ ॥

पूर्वमन्त्रकथिता विषघ्नी सर्वा क्रिया अमुनैवमन्त्रेण कर्त्तव्या हियतः जगतिसंसारे अनेनमन्त्रेण सदृशः समानः क्ष्वेडहरः विषहरोनास्ति ॥ ३८ ॥

विषघ्नं प्रयोगान्तरमाह—

अङ्कैरिति ।

अङ्कैः शुकतरोः पिष्टैर्गुलिका धेनुवारिणा ।
आननस्याऽञ्जनालेपैर्विषघ्नी साधिताऽमुना॥३९॥

शुकतरोः करञ्जवृक्षस्येति भैरवत्रिपाठिनः किंशुकवृक्षस्येति

लघुर्दीपिकाकारः अङ्कैस्त्वग्भिरिति रुद्रधरः पञ्चाङ्गैरिति त्रिपाठिनः धेनुवारिणासवत्सागोमूत्रेण पिष्टैः संपादितागुलिका अमुनामन्त्रेणसाधितासतीविषघ्नी भवति केराननस्याऽञ्जनालेपप्रकारैः ॥ ३९ ॥

अधुनाप्रयोगान्तरं दर्शयति ।

उद्दण्डेति ।

उद्दण्डवामदोर्दण्डधृतगोवर्धनाचलम् ।
अन्यहस्ताङ्गुलीव्यक्तस्वरवंशार्पिताननम् ॥ ४० ॥
ध्यायन् हरिं जपन्मन्त्रोरेकं छत्रं विना व्रजेत् ।
वर्षवाताशनिभ्यः स्याद्भयं तस्य नहि क्वचित् ॥४१॥

उत्तोलितो यो वामबाहुदण्डस्तेनधृतो गोवर्धनाचलोयेन तम् अन्यहस्ताङ्गुलिभिः व्यक्तस्वरोयस्य वंशस्यतत्रार्पितमाननं येनतम् एवभूतं हरिंचिन्तयन् मन्त्रोर्दशाष्टादशाक्षरयोरेकं जपन् छत्रं विनाव्रजेत् यस्तस्य वृष्टिवायुवज्रादिभ्योभयं क्वापिनविद्यते ॥४०॥४१॥

प्रयोगान्तरमाह—

मोघेति ।

मोघमेघौघयत्नापगतेन्द्रं तं स्मरन् हुनेत् ।
लवणैरयुतसंख्यातैरनावृष्टिर्न संशयः ॥ ४२ ॥

मोघोनिष्फलोयोमेघसमूहस्तस्य यत्नः तेनापगतः इन्द्रो यस्मात् तमेतादृशंहरिं चिन्तयन् अयुतसंख्यातैर्लवणैर्जुहुयात् अनन्तरमनावृष्टिर्भवति नात्र संशयः ॥ ४२ ॥

प्रयोगान्तरमाह—

क्रीडन्तमिति ।

क्रीडन्तं यमुनातोये मज्जनप्लवनादिभिः ।
तच्छीकरजलासारैः सिच्यमानं प्रियाजनैः ॥४३॥
ध्यात्वाऽयुतंपयःसिक्तैः हुनेद्वानीरतर्पणैः ।
वृष्टिर्भवत्यकालेऽपि महती नाऽत्र संशयः ॥४४॥

यमुनाजलेमज्जनोन्मज्जनैः क्रीडन्तं क्रीडांकुर्वन्तं पुनः कीदृशं

प्रियाजनैः रुक्मिणीप्रभृतिभिस्तच्छीकरजलासारैः यमुनाजलधारारूपैः सिच्यमानम् एवंभूतं कृष्णं ध्यात्वावानीरतर्पणैः वेतसस‌मिद्भिः पयःसिक्तैर्दुग्धोक्षितैरयुतं जुहुयात् एवं सति अकालेऽपि महतीवृष्टिर्भवति नात्र संशयः ॥ ४३ ॥ ४४ ॥

अनेनैवध्यानेन प्रयोगान्तरमाह—

अमुमेवेति ।

अमुमेव स्मरन् मूर्द्ध्नि विषस्फोटज्वरादिभिः ।
सदाहमोहैरार्त्तस्य जपेच्छान्तिर्भवेत् क्षणात्॥४५॥

दाहमोहसहितैर्विषस्फोटज्वरादिभिरार्तस्य मूर्द्धिन मस्तके अमुमेवपूर्वोक्तरूपं कृष्णं ध्यात्वाजपेत् अनन्तरं तस्यपीडितस्य क्षणाद् शान्तिः स्वास्थ्यं भवति ॥ ४५ ॥

एतस्यामेवाऽर्त्तौप्रकारान्तरमाह—

अथ वेति ।

अथवागरुडारूढं वलप्रद्युम्नसंयुतम् ।
निजज्वरविनिष्पिष्टज्वराभिष्टुतमच्युतम् ॥४६॥
ध्यात्वा ज्वराभिभूतस्य मूर्द्धन्यन्यतरमभ्यसेत् ।
शान्तिं व्रजेदसाध्योऽपि ज्वरः सोपद्रवः च्णात्४७॥

अथवाज्वराभिभूतस्य मस्तकेऽच्युतं ध्यात्वा अन्यतरम् द्वयोर्मध्ये एकं मन्त्रम अभ्यसेत् जपेत् कीदृशम् अच्युतं गरुडारूढं पुनः कीदृशं वलप्रद्युम्नाभ्यां संयुतं पुनः कीदृशं निजज्वरेणवैष्णवज्वरेणशीताख्येनाऽऽयुधरूपेणविनिष्पिष्टः चूर्णितो यो रौद्रज्वरउष्णाख्यायुधरूपस्तेनस्तुतम् अनन्तरम् अस्याऽसाध्योपिज्वरः शीघ्रमेव नाशं गच्छति कीदृशोज्वरः उपद्रवोगात्रपीडादि तत्सहितः॥४६॥४७॥

अनेनैव ध्यानेन प्रयोगान्तरमाह—

ध्यात्वेति ।

ध्यात्वैवमग्नावभ्यर्च्य पयोऽक्तैश्चतुरङ्गुलैः ।
जुहुयादमृताखण्डैरयुतं ज्वरशान्तये ॥ ४८ ॥

एवं पूर्वोक्तरूपं कृष्णं ध्यात्वा वन्हौ सम्पूज्यज्वरशान्त्यर्थं च-

तुरङ्गुलपरिमितैर्दुग्धसिक्तैरमृताखण्डैर्गुडूचीखण्डैरयुतं जुहुयात् ॥ ४८॥

प्रयोगान्तरमाह—

निशातेति ।

निशातशरनिर्भिन्नभीष्मतापनुदं हरिम् ।
स्मृत्वा स्पृशन् जपेदार्त्तं पाणिभ्यां रोगशान्तये ॥४९॥

निशातः तीक्ष्णो यः शरस्तेन निर्भिन्नो विद्धो योभीष्मस्तस्य यस्तापस्तं हरति एवंभूतं हरिं ध्यात्वा आर्त्तंज्वरादिपीडितं पाणिभ्यां स्पृष्ट्वाज्वरनाशार्थं मन्त्वोरेकतरं जपेत् ॥ ४९ ॥

प्रयोगान्तरमाह—

अपमृत्युविनाशायेति ।

अपमृत्युविनाशाय सान्दीपनिसुतप्रदम् ।
ध्यात्वाऽमृतलताखण्डैः क्षीराक्तैरयुतं हुनेत् ॥५०॥

सान्दीपनिः कृष्णगुरुः तस्य सुतप्रदं कृष्णं ध्यात्वा अमृतलताखण्डैः गुडूचीखण्डैः क्षीराक्तैर्दुग्धसिक्तैरयुतं हुनेत् जुहुयात् कस्मै अपमृत्युरकालमरणं तस्य विनाशाय निवृत्तये ॥ ५० ॥

प्रयोगान्तरमाह—

मृतपुत्रायेति ।

मृतपुत्राय ददतं सुतान् विप्राय सार्जुनम् ।
ध्यात्वा लक्षं जपेदेकं मन्त्वोः सुतविवृद्धये ॥५१॥

मृतपुत्राय विप्राय पुत्रान् ददतं सार्ज्जुनं अर्ज्जुनसहितं ध्यात्वामन्त्वोरेकं लक्षं जपेत् किमर्थं सुतवृद्धिनिमित्तम् ॥ ५१ ॥

प्रयोगान्तरमाह—

पुत्रजीवेति ।

पुत्रजीवेन्धनयुते जुहुयादनलेऽयुतम् ।
तत्फलैर्मधुराक्तैः स्युः पुत्रा दीर्घायुषोऽस्य तु ॥५२॥

जीयापुत्रेति यस्य प्रसिद्धिः तस्य इन्धनेन युते संपादिते वन्हौ तत्फलैः पुत्रजीवाफलैर्मधुराक्तैस्त्रिमध्वक्तैर्मन्त्वोरेकेनाऽयुतं जुहुयात्

अनन्तरम् अस्य होमकर्त्तुः पुत्राः दीर्घायुषो भवन्ति ॥ ५२ ॥

प्रयोगान्तरमाह—

क्षीरेति ।

क्षीरद्रुक्वाथसंपूर्णमभ्यर्च्य कलशं निशि ।
जप्त्वाऽयुतं प्रगे नारीमाभिषिञ्चेद् द्विषट्दिनम्॥५३॥
सा वन्ध्याऽपि सुतान् दीर्घजीविनो गदवर्जितान्।
लभते नाऽत्रसंदेहस्तज्जप्ताज्याशिनी सती ॥५४॥

कलशपूरणविधानेन क्षीरवृक्षक्वाथेन सम्पूर्णे कलशं निशिरात्रौ सम्पूज्याऽयुतं जप्त्वा प्रगे प्रातःकाले पुत्रार्थिनीं स्त्रियं द्विषट् दिनं द्वादश दिनानि व्याप्याऽभिषिञ्चेत् अनन्तरं साऽभिषिक्ता वन्ध्याऽपि अपत्यजननसमययोग्या अजनितापत्याऽपि पुत्रान् दीर्घायुषो-रोगरहितान् प्राप्नोति किम्भूता सती मन्त्रजप्ताज्यभोजिनी सती अत्रार्थे सन्देहो नास्ति ॥ ५३ ॥ ५४ ॥

प्रयोगान्तरमाह—

प्रातरिति ।

प्रातर्वाचंयमा नारी बोधिच्छदपुटे जलम् ।
मन्त्रयित्वाऽष्टोत्तरशतं पिबेत्पुत्रीयती ध्रुवम् ॥५५॥

प्रातः काले वाचंयमा मौनिनी पुत्रीयती आत्मनः पुत्रमिच्छन्ती बोधिच्छदपुटे पिप्पलपत्रपुटे जलं मन्त्रोरन्यतरेणाष्टोतरशतं जप्तं

मासं व्याप्य पिबेत् अनन्तरं पुत्रं प्राप्नोतीति शेषः ।

जलपानमन्त्रमाह ।

देवकीपुत्रेति ।

अत्र प्रसङ्गात् अस्मिन् ग्रन्थे अनुक्तोऽपि सन्तानगोपालमन्त्रः कथ्यते ।

तद्यथा ।

देवकीपुत्र गोविन्द वासुदेव जगद्गुरो ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ।

अस्य मन्त्रस्य नारदोमुनिः अनुष्टुप्छन्दः सन्तानप्रदगोपालकृष्णोदेवता पदैर्व्यस्तैः समस्तैर्वा पञ्चाङ्गानि ।

ध्यानं यथा ।

शङ्खचक्रधरं कृष्णं रथस्थं च चतुर्भुजम् ।
सर्वाभरणसन्दीप्तं पीतवाससमच्युतम् ।
मयूरपिच्छसंयुक्तं विष्णुतेजोपबृंहितम् ।
समर्पयन्तं विप्राय नष्टानानीय बालकान् ।
करुणामृतसंपूर्णदृष्ट्येक्षन्तं च तं द्विजमिति ॥ ५५ ॥

प्रयोगान्तरमाह—

प्रहितामिति ।

प्रहितां काशिराजेन कृत्यां छित्वा निजारिणा ।
तत्तेजसा तन्नगरीं दहन्तं भावयन् हरिम् ॥ ५६ ॥
स्वस्नेहाक्तैर्हुनेद्रात्रौ सर्षपैः सप्तवासरम् ।
कृत्या कर्तारमेवाऽसौ कुपिता नाशयेद् ध्रुवम्॥५७॥

प्रहितां प्रेषितां काशीश्वरेण कृत्यां घातकर्त्रीं निजारिणा निजचक्रेणछित्वा अनन्तरं तत्तेजसा तस्य काशिराजस्य नगरीं दहन्तं कृष्णं भावयन् स्वस्नेहाक्तैः सर्षपतैलयुक्तैः सर्षपैः सप्तदिनानि व्याप्य रात्रौ मन्त्रयोरेकतरेण जुहुयात् अथाऽनन्तरम् असौ कृत्या क्रुद्धा सती ध्रुवं निश्चितं कर्त्तारमेव नाशयेत् ॥ ५६ ॥ ५७ ॥

प्रयोगान्तरमाह—

आसीनमिति ।

आसीनमाश्रमे दिव्ये बदरीषण्डमण्डिते ।
स्पृशन्तं पाणिपद्माभ्यां घण्टाकर्णकलेवरम् ॥५८॥
ध्यात्वाऽच्युतं तिलैर्लक्षं हुनेत्त्रिमधुराप्लुतैः ।
मुक्तये सर्वपापानां शान्तये कान्तये तनोः ॥५९ ॥

बदरीषण्डोबदरीसमूहस्तेनमण्डिते शोभितेदिव्येउत्कृष्टे आश्रम आसीनम् । उपविष्टं तथा हस्तपङ्कजाभ्यां घण्टाकरणस्यमहादेवमूर्तेः कस्यचिन् महादेवभक्तस्य वाकलेवरंशरीरंस्पृशन्तमच्युतन्ध्यात्वातिलैः त्रिमधुराप्लुतैर्घृतमधुशर्करामि-

भितैर्मन्त्रोरेकेनलक्षं जुहुयात् किमर्थंमोक्षाय तथा सकलपापानां विनाशार्थं तथा तनोर्देहस्यकान्तयेदीप्त्यर्थम् ॥ ५८ ॥ ५९ ॥

प्रयोगान्तरमाह—

द्वेषयन्तमिति ।

द्वेषयन्तं रुक्मिबलौ द्यूतासक्तौ स्मरन् हरिम् ।
जुहुयादिष्टयोर्द्विष्ट्यै गुलिका गोमयोद्भवाः ॥ ६० ॥

द्यूतासक्तौ द्यूतकर्मकुर्वन्तौ रुक्मिबलभद्रौ द्वेषयन्तंपरस्परं द्वेषमुत्पादयन्तंहरिंस्मरन् गोमयोत्पन्ना गुलिका मन्त्रोरेकेन जुहुयात् । अत्र सहस्रहोमोबोद्धव्यः ।

अनुक्तायान्तु संख्यायांसहस्रंतत्रनिर्दिशेत् ।

इति वचनात् ।

किमर्थम् । इष्टयोर्मित्रयोर्द्विष्ट्यैविद्वेषणार्थम् ॥ ६० ॥

प्रयोगान्तरमाह—

ज्वलदिति ।

ज्वलद्वह्निमुखैर्बाणैर्वर्षन्तं गरुडध्वजम्
धावमानं रिपुगणमनुधावन्तमच्युतम् ॥ ६१ ॥
ध्यात्वैवमभ्यसेन्मन्त्रोरेकं सप्तसहस्रकम् ।
उच्चाटनं भवेदेतद्रिपूणां सप्तभिर्दिनैः ॥ ६२ ॥

ज्वलन् देदीप्यमानो योवन्हिस्तद्वन्मुखंयेषां तैर्बाणैर्वर्षन्तंताडयन्तं तथा गरुडारूढं तथा धावमानं शत्रुसमूहमनुपश्चाद्धावन्तं हरिंध्यात्वामन्त्रोर्दशाष्टादशाक्षरयोरेकं सप्तसहस्रमभ्यसेत् जपेत् एवं कृते सतिएतस्यशत्रूणां सप्तभिर्दिनैरुच्चाटनं भवतिस्वदेशात्पलायनं भवति ॥ ६१ ॥ ६२ ॥

प्रयोगान्तरमाह—

उत्क्षिप्तेति ।

उत्क्षिप्तवत्सकं ध्यायन् कपित्थफलहारिणम् ।
अयुतं प्रजपेत्साध्यमुच्चाटयति तत्क्षणात् ॥ ६३ ॥

उत्क्षिप्तऊर्द्ध्वंक्षिप्तोवत्सोवत्सरूपोवत्सकासुरोयेनतथा कपित्थ-

स्यफलं हरतीति कृष्णं ध्यात्वा मन्त्रो मध्ये एकमयुतं जपेत् । अनन्तरं तत्क्षणात् शीघ्रमेव साध्यमुच्चाटनीयमुच्चाटयति ॥ ६३ ॥

प्रयोगान्तरमाह—

आत्मानमिति ।

आत्मानं कंसमथनं ध्यात्वा मञ्चान्निपातितम् ।
कंसात्मानमरिं कर्षन् गतासुं प्रजपेन् मनुम् ॥ ६४ ॥
अयुतं जुहुयाद्वाऽस्य जन्मोड्डुतरुतर्पणैः ।
अपि सेवितपीयूषो म्रियतेऽरिर्नसंशयः ॥ ६५ ॥

आत्मानं कंसमथनं कृष्णं ध्यात्वा कंसमथनात् मनोरैक्यं विचिन्त्य तथा रिपुं कंसस्वरूपम् अपगतप्राणं ध्यात्वा रिपुकंसयोरभेदं विचिन्त्येति भावः मञ्चादधःकृतम् आकर्षयन् आकर्षणं भावयन्मन्त्रोरेकमयुतं जपेत् अस्यारिपोः जन्मोड्डुतरुतर्पणैः समिद्भिर्जुयाद्वा

कारस्करोऽथधात्रीस्यादुदुम्बरतरुः पुनः ।
जम्बूखदीरकृष्णाख्यावंशपिप्पलसंज्ञकौ ।
नागरोहितनामानौ पलाशप्लक्षसंज्ञकौ ।
अम्बष्ठबिल्वाऽर्ज्जुनाख्यांविकङ्कतमहीरुहः ।
बहलः सबलः खर्ज्जुर्भेण्डिलः पनसार्ककौ ।
शमीकदम्बाम्रनिम्बमधुका ऋक्षशाखिनः ।
इति ।
सप्तविंशतिनक्षत्राणांवृक्षाः ।

जन्मनक्षत्रवृक्ष एवं कृतेसेवितपीयूषोपिम्रियतेनात्रसंशयः॥६४॥६५॥

इदं प्रयोजनं प्रकारान्तरेणापिभवतीतिदर्शयति ।

अथवेति ।

अथवा निम्बतैलाक्तैर्हुनेदेधोभिरक्षजैः ।
अयुतं प्रयतो रात्रौ मरणाय रिपोः क्षणात् ॥ ६६ ॥

निम्बतैलसिक्तैः अक्षजैः बिभीतकसमिद्भिः प्रयतः पवित्रः सन्

रात्रौमन्त्रोरेकेन अयुतं हुनेत् किमर्थं शत्रोः शीघ्रविनाशाय ॥ ६६ ॥

अस्मिन्नेवार्थे प्रयोगान्तरमाह—

दोषेति ।

दोषारिष्टदलव्योषकार्पासास्थिकणैर्निशि ॥
हुनेदेरण्डतैलाक्तैः श्मशानस्थोऽरिशान्तये ॥ ६७ ॥

दोषाहरिद्रा अरिष्टदलं विभीतकपत्रमिति रुद्रधरः भल्लातकपत्रमितिरुद्रधरः निम्बपत्रमिति भैरवत्रिपाठिनः व्योषन्त्रिकटुकं कार्पासाऽस्थिकार्पासवीजं कणः पिप्पलीएतैर्मिलितैरेरण्डतैलसिक्तैः श्मशानस्थः मृतसंस्कारस्थानस्थः सन् निशिरात्रौमन्त्रोरेकेनजुहुयात् किमर्थं शत्रुनाशार्थम् ॥ ६७ ॥

रागान्मारणप्रयोगे प्रायश्चित्तमाह—

नशस्तमिति ।

न शस्तं मारणं कर्म कुर्याच्चेदयुतं जपेत् ।
हुनेद्वा पायसैस्तावत् शान्तये शान्तमानसः ॥ ६८ ॥

मारणं कर्म शिष्टजनस्य न प्रशस्तं तथा ऽपियदिवारागात् कुर्यात्तदामन्त्रोर्मध्येएकं मन्त्रम् अयुतं जपेत् परमान्नेनवा अयुतं जुहुयात् शान्तये पापनाशाय शान्तमानसोनिर्मत्सरः ॥ ६८ ॥

प्रयोगान्तरमाह—

जयकाम इति ।

जयकामो जपेल्लक्षं पारिजातहरं हरिम् ।
स्मरन् पराजयस्तस्य न कुतश्चिद्भविष्यति ॥ ६९ ॥

जयकामः पुमान् बलादिन्द्रसकाशात्स्वर्गस्थपारिजातापहारिणं कृष्णं भावयन् मन्त्रोरेकं लक्षं जपेत् एवं कृतेतस्य भङ्गः कस्मादपिनभविष्यतीति ॥ ६९ ॥

प्रयोगान्तरमाह—

पार्थ इति ।

पार्थे दिशन्तं गीतार्थं व्याख्यामुद्राकरं हरिम् ।
रथस्थं भावयन् जप्याद्धर्मवृद्ध्यै शमाय च ॥ ७० ॥

पार्थे अर्ज्जुनेगीतार्थं दिशन्तं कथयन्तं तथा व्याख्यामुद्राकरे· यस्यतम् उत्तानतर्जन्यङ्गुष्ठयुताव्याख्यामुद्रा तथा रथारूढं हरिं· भावयन् मन्त्रोरेकं लक्षं जपेत् किमर्थं धर्मोत्पत्त्यर्थं मोक्षार्थञ्च ॥७०॥

प्रयोगान्तरमाह—

लक्षमिति ।

लक्षं पलाशकुसुमैर्हुनेद्यो मधुराप्लुतैः ।
व्याख्याता सर्वशास्त्राणां स कविर्वादिराड् भवेत् ॥७१

यः पलाशपुष्पैर्घृतमधुशर्करामिश्रैर्मन्त्रोरेकेनलक्षं जुहुयात् सः सकलशास्त्राणां व्याख्याताकविराट्कविश्रेष्ठश्चभवेत् ॥ ७१ ॥

प्रयोगान्तरमाह—

विश्वेति ।

विश्वरूपधरं प्रोद्यद्भानुकोटिसमद्युतिम् ।
द्रुतचामीकरनिभमग्निसोमात्मकं हरिम् ॥ ७२ ॥
अर्काग्निद्योतदास्याङ्घ्रिपङ्कजं दिव्यभूषणम् ।
नानायुधधरं व्याप्तविश्वाकाशावकाशकम् ॥ ७३ ॥
राष्ट्रपूर्ग्रामवास्तूनां शरीरस्य च रक्षणे ।
प्रजपेन्मन्त्रयोरेकतरं ध्यात्वैवमादरात् ॥ ७४ ॥

विश्वरूपधरम् एतद्व्याचष्टे उद्यदादित्यकोटिसमानकान्ति तथा द्रवीभूतसुवर्णतुल्यं तथा अग्निसोमस्वरूपं सूर्यसोमा- त्मकमिति त्रिपाठिनः तथा सूर्याग्निवदुज्ज्वलं मुखं पादपद्मं यस्य तथा चारुभूषणं तथाविविधशस्त्रधरं तथा व्याप्तसंसाराकाशाभ्य- न्तरम् एतादृशं हरिं ध्यात्वा आदरात् मन्त्रयोरेकं जपेत् किमर्थं

राष्ट्रो देशः पूर्नगरं ग्रामोऽल्पजनवासस्थानं वास्तुएकगृहस्वामिवासः क्षेत्रम इति गोविन्दमिश्राः वस्त्विति पाठे हिरण्यादि एतेषां शरीरस्य च रक्षणेरक्षानिमित्तम ॥ ७२ ॥ ७३ ॥ ७४ ॥

प्रकारान्तरमाह—

अथ वेत्यादि ।

अथवा व्यस्तसर्वाङ्घ्रिरचिताङ्गार्जुनर्षिकम् ।
त्रिष्टुप्छन्दसिकं विश्वरूपविष्णवधिदैवतम् ॥ ७५ ॥
जपेद्गीतामनुं स्थानेहृषीकेशाख्यमाज्यकैः ।
हुनेद्वा सर्वरक्षायै सर्वदुःखोपशान्तये ॥ ७६ ॥

इति श्रीकेशवभट्टाचार्यविरचितायां
क्रमदीपिकायां षष्ठः पटलः ॥ ६ ॥

अथवा स्थानेहृषीकेशाख्यंगीतामनुं जपेत् किंभूतं मनुं व्यस्तम् एकैकं सर्वे समस्ता ये अङ्घ्रयः पादचतुष्टयंतैः रचितंम् अङ्गं पञ्चाङ्गम् अर्जुनः ऋषिर्यत्रतं व्यस्तसर्वाङ्घ्रिरचिताङ्गश्चार्जुनऋषिकश्चेति द्वन्द्वः तं त्रिष्टुप्छन्दो यत्रतं विश्वरूपोविष्णुरधिदेवता यस्य तम् आज्यकैर्घृतैर्हुनेद्वा वाशब्दः समुच्चयेहुनेत् टीकान्तरेउक्तप्रयोगेषु यत्र जपहोमयोः संख्या न उक्ता तत्र संनिधानोक्ता गृह्यते तदभावेऽष्टोत्तरंसहस्रंशतं वा अष्टौसहस्राणीत्येके । जगन्मोहनाख्यतन्त्रे ।

लक्षं वाप्ययुतं वापि सहस्रं शतमेव च ।
कार्याणां गौरवान्मन्त्रीतत्तद्धोमंसमाचरेत् ॥ ७५ ॥ ७६ ॥

इति श्रीक्रमदीपिकायां विवरणे षष्ठः पटलः ॥ ६ ॥

अनेकमन्त्रकथनार्थं सप्तमं पटलमुपक्रामति ।
वक्ष्य इत्यादिना ।

वक्ष्येऽक्षयधनावाप्त्यै प्रतिपत्तिं श्रियः पतेः ।
सुगुप्तां धननाथाद्यैर्धन्यैर्या क्रियते सदा ॥ १ ॥

श्रियः पतेर्गोपालस्य प्रतिपत्तिंध्यानं मन्त्रपूजाध्यानादिप्रकारं वा वक्ष्ये या प्रतिपत्तिर्धननाथाद्यैः कुबेरप्रभृतिभिर्महाधनैः क्रियते कस्यै अक्षयमविनाशि यद्धनं तत्प्राप्त्यै सुगुप्तां नात्यन्तप्रकटितां द्विजैरित्यर्थः १

द्वारवत्यामित्यादि सप्तश्लोकैर्मध्यकुलकम् ।

द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः ।
अनल्पैः कल्पवृक्षैश्च परीते मण्डपोत्तमे ॥ २ ॥

अच्युतो ध्येयः कुत्र द्वारवत्यां मणिमण्डपे मणिसिंहासनाम्बुजे आसीनो द्वारकानगरीगतमणिमण्डपावस्थितमणिमयसिंहासनपद्मोपविष्टः मणिमण्डपे कीदृशे भवनोत्तमैः गृहोत्तमैः कल्पवृक्षैश्च परीते वेष्टिते किम्भूतैः सहस्रसूर्याः तद्वद्भास्वरैर्दीप्तैरनल्पैर्विस्तरैः २

पुनः कीदृशे ।

ज्वलद्रत्नमयस्तम्भद्वारतोरणकुड्यके ।
फुल्लस्रगुल्लसच्चित्रवितानालम्बिमौक्तिके ॥ ३ ॥

ज्वलन्तिदीप्तानियानिरत्नानि तन्मयंतत्प्रधानंस्तम्भः गृहाधारभूतं द्वारतोरणं कुड्यं भित्तिर्यत्र तस्मिन् प्रफुल्लाविकासनीयास्रक् पुष्पमालाउल्लसच्छोभमानं पवित्रं नानाप्रकारं वितानं तत्रालम्बिमौक्तिकंयत्र तत्र ॥ ३ ॥

पुनः कीदृशे मणिमण्डपे ।

पद्मरागस्थलीराजद्रत्ननद्योश्च मध्यतः ।
अनारतगलद्रत्नसुधस्य स्वस्तरोरधः ॥ ४ ॥

पद्मरागमयीयास्थली राजद्देदीप्यमानरत्नमयी च यानदी

तयोर्मध्ये स्वस्तरोः पारिजातस्याधः स्वस्तरोः किंभूतस्य अनारतं सर्वदागलन्तीरत्नमयी सुधा अमृतं यस्य तस्य ॥ ४ ॥

पुनः कीदृशेमणिमण्डपे—

रत्नप्रदीपावलिभिः प्रदीपितदिगन्तरे ।
उद्यदादित्यसंकाशे मणिसिंहासनाम्बुजे ॥ ५ ॥

रत्नप्रदीपावलिभिर्ज्वलद्रत्नैः प्रदीपितम् उद्भासितं दिशामन्तरालम् अवकाशो यत्र मणिसिंहासने किंभूते उद्यन् प्रादुर्भवन् य आदित्यस्तस्य सङ्काशे सदृशे ॥ ५ ॥

अच्युतः

किम्भूतः ।

समासीनोऽच्युतो ध्येयो द्रुतहाटकसंनिभः ।
समानोदितचन्द्रार्कतडित्कोटिसमद्युतिः ॥ ६ ॥

द्रुतहाटकसन्निभः द्रवीभूतस्वर्णतुल्यः समानोदिता एकदोद्गता या चन्द्रार्काणां कोटिः तडितामपि कोटिः तत्समाद्युतिर्यस्य सः ॥ ६ ॥

पुनः किम्भूतः—

सर्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः ॥
पीतवासाश्चक्रशङ्खगदापद्मोज्वलद्भुजः ॥ ७ ॥

सर्वाङ्गनमुखादिना सुन्दरोरम्यः सौम्योऽनुद्धतः सर्वाभरणेनकुण्डलाद्यलकारेणभूषितः पीतवासाःपीतेवाससीयस्यसः शङ्खचक्रगदापद्मैःउज्वलादीप्ताभुजायस्यसः ॥ ७ ॥

पुन कीदृशः—

अनारतोच्छलद्रत्नधारौघकलशं स्पृशन् ॥
वामपादाम्बुजाग्रेण मुष्णता पल्लवच्छविम् ॥ ८ ॥

वामपादाम्बुजाग्रेण अनारतं सर्वदाउच्छलन्तीयारत्नधारातस्याओघः प्रवाहोयत्रसचासौकलसश्चेति कर्मधारयः तंस्पृशन् वाम-

मपादाम्बुजाग्रेण किम्भूतेन पल्लवच्छविमुष्णता।किशलयकान्ति चोरयता ॥ ८ ॥

अष्टमहिषीध्यानमाह—

रुक्मिणीसत्यभामेऽस्य मूर्ध्निरत्नौघधारया ॥
सिञ्चन्त्यौदक्षवामस्थेस्वदोःस्थकलशोत्थया ॥ ९ ॥

रुक्मिणीसत्यभामेध्येयेकिम्भूते अस्यहरेर्मूर्द्धिशिरसिरत्नप्रवाहधारयासिचन्त्यौ कीदृशे दक्षवामस्थे अत्र रुक्मिणीदक्षिणेसत्यावामे किम्भूतयाधारयास्वहस्तस्थघटोद्भवया ॥ ९ ॥

नाग्नजितीसुनन्देच ध्येये-
एतेकीदृशे ।

नाग्नजितीसुनन्दा च दिशन्त्यौकलशौतयोः ॥
ताभ्यां च दक्षवामस्थेमित्रविन्दासुलक्ष्मणे ॥ १० ॥

तयो रुक्मिणीसत्यभामयोः स्थानेरत्नघटौदिशन्त्यौददत्यौकीदृशोदक्षवामस्थे तथा मित्रविन्दासुलक्ष्मणेदक्षिणवामस्थेध्येयेकिम्भूतेताभ्यांनाग्नजितीसुनन्दाभ्यां कलशंदिशन्तीभ्याङ्कलशंददत्यौ ॥१०॥

रत्ननद्यासमुद्धृत्यरत्नपूर्णौ घटौतयोः ॥
जाम्बवतीसुशीला च दिशन्त्यौदक्षवामगे ॥ ११ ॥

तथा दक्षवामे जाम्बवतीसुशीलेचध्येयेकिम्भूते रत्ननद्यारत्नपूर्णौघटौसमुद्धृत्यतयोर्मित्रविन्दासुलक्ष्मणयोर्दिशन्त्यौ ॥ ११ ॥

वहिः षोडशसाहस्रसंख्याताः परितः स्त्रियः ॥
ध्येयाः सकलरत्नौघधारयुक्कलशोज्ज्वलाः ॥ १२ ॥

तद्वहिः परितः षोडशसाहस्रसंख्याताः प्रियाध्येयाः किम्भूताः कनकं सुवर्णं रत्नानिपद्मादीनितेषामोघः समूहः तस्यधारां युनक्तीति तद्युक्यः कलसः तेनदीप्ताः ॥ १२ ॥

तद्बहिश्चाष्टनिधयोध्येयाः-
कीदृशाः ।

तद्बहिश्चाष्टनिधयः पूरयन्तोधनैर्धराम् ॥
तद्बहिर्वृष्णयः सर्वे पुरोवत्सुरादयः ॥ १३ ॥

धरांपृथ्वींधनैः पूरयन्तः तद्बहिर्वृष्णयोयादवाध्येयाः अनन्तरं पुरोवत् दिक्षुस्थिताः सुरादयः देवर्षिसिद्धविद्याधरगन्धर्वप्रभृतयोरक्षाभिषेकं कुर्वन्तोध्येयाः ॥ १३ ॥

ध्यात्वेति—

ध्यात्वैवं परमात्मानं विंशत्यर्णं मनुंजपेत् ॥
चतुर्लक्षं हुनेदाज्यैश्चत्वारिंशत्सहस्रकम् ॥ १४ ॥

एवं परमात्मरूपम् अशरीरिणं ध्यात्वाविंशत्यक्षरं मन्त्रं चतुर्लक्षं जपेत् आज्यैर्घृतैश्चत्वारिंशत्सहस्रकं हुनेत् जुहुयात् ॥ १४ ॥

विंशत्यक्षरमन्त्रमुद्धरति-

शक्तीति ।

शक्तिश्रीपूर्वकोऽष्टादशार्णोविंशतिवर्णकः ॥
मन्त्रेणानेन सदृशोमनुर्नहिजगत्त्रये ॥ १५ ॥

शक्तिःभुवनेश्वरीवीजं श्रीः श्रीवीजम् एतद्वीजद्वयपूर्वकः पूर्वोक्ताष्टादशाक्षरमन्त्रः एवं विंशत्यक्षरोभवतीत्यर्थः अनेनमन्त्रेणसदृशोमन्त्रोजगत्त्रयेनास्ति ॥ १५ ॥

ऋष्यादिकंदर्शयति—

ऋषिर्ब्रह्मा च गायत्री छन्दः कृष्णस्तुदेवता ॥
पूर्वोक्तवदेवास्य वीजशक्त्यादिकल्पना ॥ १६ ॥

अस्यमन्त्रस्य वीजशक्त्यादिकल्पना पूर्वोक्तवत् दशाक्षरवत् तथा च दशाक्षरस्ययद्वीजादिकन्तदस्यापीत्यर्थः ॥ १६ ॥

पूजाप्रकारमाह—

कल्प इत्यादिना ।

कल्पः सनत्कुमारोक्तोमन्त्रस्या ऽस्योच्यते ऽधुना ॥

पीठन्यासादिकं कृत्वा पूर्वोक्तक्रमतः सुधीः ॥ १७ ॥

अस्यमन्त्रस्य सनत्कुमारकथितः पूजाप्रकारः संप्रतिमयाकथ्यते पूर्वोक्तक्रमतः दशाक्षरोक्तप्रकारेणपीठन्यासप्राणायामादिकं कृत्वा॥१७॥

करद्वन्द्वाङ्गुलितलेष्वगषट्कं प्रविन्यसेत् ॥
मन्त्रेण व्यापकं कृत्वा मातृकांमनुसंपुटाम् ॥ १८ ॥
संहारसृष्टिमार्गेण दशतत्त्वानिविन्यसेत् ॥
पुनश्चव्यापकं कृत्वा मन्त्रवर्णास्तनौन्यसेत् ॥ १९ ॥

उभयकराङ्गुलिषु उभयकरतलेषु च षडङ्गानि क्रमान्न्यसेत्मन्त्रेणेतिविंशत्यक्षरमन्त्रेणव्यापकं सर्वतनौन्यासं कृत्वामातृकां मातृकान्यासंमनुसपुटांविंशत्यक्षरपुटितप्रत्यक्षरां पूर्वोक्तमातृकास्थानेषु विन्यसेत् प्रयोगश्चह्रीं अंह्रीं नम इत्यादिः एवंभपर्यन्तं द्विरावृत्तिः ततो ह्रीं श्रींह्रीं श्रींनमः क्लीं क्लींपं क्लीं क्लींनम इत्यादिः संहारसृष्टिमार्गेणदशतत्त्वानिमहीसलिलप्रभृतीनि विन्यसेत् पुनरपि विंशत्यक्षरमन्त्रेण व्यापकन्यासंकृत्वाविंशतिमन्त्राक्षराणि तनौस्वशरीरे न्यसेत् ॥ १८ ॥ १९ ॥

अक्षरन्यासस्थानान्याह—

मूर्ध्नीति ।

मूर्द्धिभ्रभालेभ्रुवोर्मध्येनेत्रयोः कर्णयोर्नसोः ॥
आननेचिबुके कण्ठेदोर्मूले हृदि तुन्दके ॥ २० ॥
नाभौ लिङ्गे तथा ऽऽधारेकट्योर्जान्वोश्चजङ्घयोः ॥
गुल्फयोः पादयोर्न्यसेत्सृष्टिरेषासमीरिता ॥ २१ ॥

मस्तकेभाले ललाटे भ्रूमध्ये इत्यादावेकैकमक्षरं न्यसेत् आधारेलिङ्गाधस्त्रिकोणस्थाने एषसृष्टिन्यासप्रकारउक्तः ॥ २० ॥ २१ ॥

स्थितिं हृदादिकांसान्ता संहृतिश्चरणादिका ॥
विधायैवं पञ्चकृत्वःस्थित्यन्तंमूर्त्तिपञ्जरम् ॥
सृष्टिस्थिती च विन्यस्य षडङ्गन्यासमाचरेत् ॥ २२ ॥

हृदादिकांसांता स्थितिः हृदयमारभ्यां ऽसपर्यन्तन्यासः स्थितिः संहृतिश्चरणादिकापादावारभ्यमूर्द्धान्तन्यासः विधायेति एवं पञ्चवारान् स्थित्यन्तं न्यासं कृत्वा इति गृहस्थाभिप्रायेण तथा पूर्वोक्तमूर्त्तिपञ्जरन्यासं कृत्वा पुनः सृष्टिस्थितीविन्यस्य सृष्टिस्थितिप्रकारेणमन्त्रवर्णान् विन्यस्य षडङ्गन्यासमाचरेत् ॥ २२ ॥

षडङ्गानिदर्शयति—

गुणेति ।

गुणाग्निवेदकरणकरणाक्षयक्षरैर्मनोः ॥
मुद्रांवध्वाकिरीटाख्यांदिग्वन्धं पूर्ववचरेत् ॥
ध्यात्वाजप्त्वार्चयेद्देहेमूर्त्तिपञ्जरपूर्वकम् ॥ २३ ॥

मनोर्मन्त्रस्य गुणास्त्रयः अग्नयस्त्रयः वेदाश्चत्वारः करणमन्तःकरणचतुष्टयं पुनः करणचतुष्टयम् अक्षिद्वयमेतैरक्षरैर्मन्त्रसम्भवैः षडङ्गानिकार्याणीत्यर्थः

मुद्रामिति

किरीटाख्यां किरीटाभिधांबद्ध्वा कृत्वाकिरीटाद्यामिति पाठे कौस्तुभश्रीवत्समुद्रयोः परिग्रहः पूर्ववदस्त्रमन्त्रेणादिग्वन्धनं कुर्यात्

आत्मपूजामाह

ध्यात्वेति

पूर्वोदितं ध्यानं कृत्वाऽष्टोत्तरशतं च जप्त्वामूर्त्तिपञ्जरपूर्वकं देहेपूजयेत् तथाचाऽऽभ्यन्तरेप्रथमं परमेश्वराराधनं तदनु मूर्त्तिपञ्जरस्यतदनु सृष्टिस्थितिन्यासंतदनुषडङ्गस्येति ॥ २३ ॥

वाह्यपूजाप्रकारमाह—

अथेति ।

अथवाह्येऽर्चयेद्विष्णुंतदर्थं यन्त्रमुच्यते ॥
गोमयेनोपलिप्योर्वीं तत्र पीठं निधापयेत् ॥ २४ ॥

अथात्मपूजानन्तरं वाह्येविष्णुं पूजयेत् तत्पूजार्थं पूजास्थानमुच्यते गोमयजलेन पृथिवीमुपलिप्य तत्र लिप्तस्थाने पीठं पूजाधारप्रियं पात्रं स्थापयेत् ॥ २४ ॥

विलिप्यगन्धपङ्केनालिखेदष्टदलाम्बुजम् ॥
कर्णिकायां तु षट्कोणं ससाध्यं तत्र मन्मथम् ॥२५॥

अनन्तरं तत्पीठं चन्दनपङ्केनविलिप्यतत्राष्टदलपद्मं विलिख्यकर्णिकायां पद्मंविलिख्यमध्यस्थानेषट्कोणपुटितं वह्निपुरद्वयं लिखेत् तत्र षट्कोणमध्येससाध्यं कर्मसहितंसाध्यनामसहितं मन्मथं कामवीजं लिखेत् साध्यग्रहणात् धारणार्थमप्येतद्योद्धव्यमितित्रिपाठिनः ॥ २५ ॥

शिष्टैस्तं सप्तदशभिरक्षरैर्वेष्टयेत्स्मरम् ॥
प्राग्रक्षोऽनिलकोणेषु श्रियं शिष्टेषु संविदम् ॥२६॥

शिष्टैःसप्तदशभिरक्षरैस्तंकामवीजं वेष्टयेत् षट्कोणस्य पूर्वनिर्ऋतिवायव्यकोणेषु श्रियं श्रीवीजत्रयं लिखेत् शिष्टेषुत्रिषुकोणेषु पश्चिमेशानाग्निकोणेषु संविदं भुवनेश्वरीवीजं विलिखेत् ॥ २६ ॥

षडक्षरं संधिषु च केशरेषु त्रिशस्त्रिशः ॥
विलिखेत्स्मरगायत्रीं मालामन्त्रंदलाष्टके ॥ २७ ॥
षड्शः संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ॥
भूविम्बं च लिखेद्बाह्ये श्रीमाये दिग्विदिक्ष्वपि ॥२८॥

सन्धिषु षट्कोणसन्धिषु षडक्षरङ्कामवीजपूर्वकं कृष्णायनम इति षडक्षरं लिखेत् केशरस्थाने कामगायत्रीं वक्ष्यमाणां त्रिशोऽक्षरत्रयं कृत्वाविलिखेत् पद्माष्टकेवक्ष्यमाणं मालामन्त्रं षट्शः षडक्षराणिकृत्वाविलिख्य पद्मवाह्येमातृकाक्षरैर्वेष्टयेत् । मातृकावेष्टनवाह्य एववक्ष्यमाणस्वरूपं भूविम्वंचलिखेत् भूविम्वदिग्विदिक्षु श्रीमायेदिक्षुश्रीवीजं कोणेषु भुवनेश्वरीवीजं लिखेदित्यर्थः ॥ २७ ॥ २८ ॥

एतद्यन्त्रं हाटकादिपट्टेष्वालिख्य पूर्ववत् ॥
साधितं धारयेद्योवै सोऽर्च्यतेत्रिदशैरपि ॥ २९ ॥

एतद्यन्त्रं पूजायामप्युपयुक्तं योधारयेत्सदेवैरपि पूज्यते किं कृत्वासुवर्णरजतताम्रादि पट्टेषु यथा कथितद्रव्येणालिख्य पूर्ववधः पूजासु यद्वापूर्वमन्त्रवत् कृतप्राणप्रतिष्ठादिक्रियं कीदृशं सा-

धितं यथाकथितप्रकारेणसम्पादितं प्रजप्तं च ॥ २९ ॥

कामगायत्रीमुद्धरति ।

स्याद्गायत्रीकामदेवपुष्पबाणौ तु ङन्तकौ ॥
विद्महेधीमहियुतौ तन्नोनङ्गः प्रचोदयात् ॥
जप्याज्जपादौ गोपालमनूनांजनरञ्जनीम् ॥ ३० ॥

कामदेवपुष्पबाणशब्दौ क्रमेण चतुर्थ्यन्तौ किंभूतौविद्महेधीमहिशब्द सहितौ तदनु तन्नोनङ्गः प्रचोदयादिति स्वरूपम् एवं सतिकामगायत्रीस्यात् भवति जप्यादिति गोपालमन्त्राणां जपादौ जपोपक्रमेएतांकामगायत्रीं जप्यात् । यतइयं जनरञ्जनी वश्यकरीमित्यर्थः ॥ ३० ॥

मालामन्त्रमुद्धरति नत्यन्त इत्यादिना

नत्यन्ते कामदेवाय ङेन्तंसर्वजनप्रियम् ॥
उक्त्वा सर्वजनान्ते तु संमोहनपदंतथा ॥ ३१ ॥
ज्वलज्वल प्रज्वलेतिउक्त्वासर्वजनस्य च ॥
हृदयंममचब्रूयाद्वशङ्कुरुयुगंशिरः ॥
कृत्वामदनमन्त्रोऽष्टचत्वारिंशद्भिरक्षरैः ॥ ३२ ॥

नमः शब्दान्तेकामदेवायेति स्वरूपं तदनुचतुर्थ्यन्तं सर्वजनप्रियशब्दमुच्चार्यतदनुसर्वजनशब्दमुक्त्वासंमोहनपदं वदेत् तदनुज्वलज्वलप्रज्वलेति स्वरूपमुक्त्वासर्वजनस्यहृदयंममेतिस्वरूपमुक्त्वावशमिति स्वरूपमुक्त्वाकुरुकुरुइति स्वरूपमुक्त्वाशिरः स्वाहा इति वदेत् एवं च सति अष्टचत्वारिंशदक्षरकैर्मदनमन्त्रः कथितः ॥ ३१ ॥ ३२ ॥

विनियोगंदर्शयति—
जपादाविति ।

जपादौमारबीजाद्यो जगत्त्रयवशीकरः ॥
भूगृहं चतुरस्रं स्यात्कोणवज्राद्यलंकृतम् ॥ ३३ ॥

यन्त्रे यथोद्भूतपत्रजपपूजाहोमादौतु यदिकामवीजाद्यो भवति तदाजगत्त्रयवशीकरणक्षमः यदायं मन्त्रः स्वतन्त्रेणजप्यतेतदेति-त्रिपाठिनः ।

भूगृहमुद्धरति ।

भूगृहामिति कोणसंलग्नाष्टवज्रालंकृतचतुरस्रं कोणचतुष्टयसहितं भूविम्बामिति पाठोवा ॥ ३३ ॥

यन्त्रेपूजाप्रकारमाह—

पीठंपूर्ववदभ्यर्च्यमूर्त्तिंसंकल्पपौरुषीम् ॥

तत्रा ऽऽवाह्याऽच्युतं भक्त्यासकलीकृत्यपूजयेत् ॥३४॥

पूर्ववत् दशाक्षरवत् गुर्वापीठपूजान्तमभ्यर्च्यतत्रपौरुषींपुरुषाकृतिं मूर्त्तिपारमेश्वरींविचिन्त्य तत्र मूर्त्तावच्युतमावाह्यसकलीकृत्यभक्त्या पूजयेत् सुषुम्णाप्रवाहनाड्यापुष्पयुक्ते उत्तानपाणीहृदयस्थमूर्त्तेस्तेजः संयोज्यतेजोदेवताब्रह्मरन्ध्रेणदेवशरीरगतं विचिन्त्यस्वस्वमुद्रया वाह्य संस्थाप्य सनिधाप्यसंनिरुध्याव गुण्ठ्यसकलीकृत्यदेवताङ्गषडङ्गन्यासंकृत्वाषोडशोपचारैः सम्पूजयेदित्यर्थः ॥ ३४ ॥

आसनेति—

आसनादि भूषणान्तं पुनर्न्यासक्रमात् यजेत्

सृष्टिस्थितीषडङ्गंच किरीटंकुण्डलद्वयम् ॥ ३५ ॥

चक्रशङ्खगदापद्ममालाश्रीवत्सकौस्तुभान् ॥

गन्धाक्षतप्रसूनैश्चमूलेनाभ्यर्च्यपूर्ववत् ॥ ३६ ॥

आसनादिविभूषान्तं यथा स्यादेवं पूजयेत् आसनमारभ्यभूषान्तैरुपचारैः पूजयेदित्यर्थः पुनर्न्यासक्रमात् सृष्ट्यादीन् यजेत् प्रथमं सृष्ट्यादीनां न्यासम्विधायततस्तान् पूजयेत् अथवान्यासक्रमाद्यथातेषां न्यासः कृतस्तेन क्रमेणेत्यर्थः ॥ ३५ ॥

गन्धाक्षतेति—

अक्षतायवागन्धाक्षतपुष्पैश्च पूर्ववत् मूलमन्त्रेणकृष्णं पूजयित्वासप्तावृतीः सम्पूजयेदित्यर्थः ॥ ३६ ॥

आवरणान्याह—

आदाविति

आदौ वह्निपुरद्वन्द्वकोणेष्वङ्गानि पूजयेत्।
सहृच्छिरःशिखावर्मनेत्रमस्त्रमिति क्रमात्॥ ३७॥

प्रथमं वह्निपुरयुगलसम्बन्धिषट्कोणेषु आग्नेयकोणमारभ्य-षडङ्गानि पूजयेदित्यर्थः।

अङ्गान्याह।

सहृदिति।

सहहृदावर्तत इति सहृत् हृदयं शिरः शिखावर्मकवचंनेत्रमस्त्रं चेति प्रथमावरणम्॥ ३७॥

द्वितीयावरणमाह—

वासुदेव इति।

वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः॥
अग्न्यादिदलमूलेषु शान्तिः श्रीश्च सरस्वती॥ ३८॥
रतिश्च दिग्दलेष्वर्च्यास्ततोऽष्टौ महिषीर्यजेत्॥
रुक्मिण्याद्या दक्षसव्ये क्रमात् पत्राग्रकेषु च॥ ३९॥

अग्न्यादिकोणदलमूलेषु केशरस्थानेषु वासुदेवादयः पूज्यास्तथैवपूर्वादिचतुर्दिक्षुदलमूलेषुशान्त्यादयः पूज्या इत्यर्थः।

तृतीयावरणमाह।

ततोऽष्टाविति।

तदनन्तरम्।

अष्टौमहिष्यः पूज्या इत्यर्थः ता हि रुक्मिण्याद्या इति।

पूजास्थानमाह।

दक्षसव्ये इति।

परमेश्वरस्य दक्षिणभागेचतस्रः वामभागेचतस्रः क्रमेण पूज्या इत्यर्थः॥ ३८॥ ३९॥

चतुर्थावरणमाह—

तत इति।

ततः षोडशसाहस्रं सकृदेवाऽर्चयेत्प्रियाः ॥
इन्द्रनीलमुकुन्दाद्यान्मकराऽनङ्गकच्छपान् ॥ ४० ॥
पद्मशङ्खादिकांश्चाऽपि निधीनष्टौ क्रमाद्यजेत् ॥
तद्बहिश्चेन्द्रवज्राद्ये आवृती सम्प्रपूजयेत् ॥ ४१ ॥

पूर्वादिदलाग्रेषुषोडशसहस्रं प्रियाः देवपत्नीः सकृदेवएकक्रमेणैवाऽर्चयेत् ।

पञ्चमावरणमाह—

इन्द्रनीलाद्यानष्टौ निधीन् पूर्वादिक्रमेण पूजयेत् अत्रेन्द्रादिशब्दानन्तरं प्रत्येकंचतुर्थ्यन्तं निधिपदंद्वयं प्रयोगश्च ॐइन्द्रनिधयेनमः इत्यादिः ।

षष्ठसप्तमावरणद्वयमाह—

तद्बहिरिति ।

तद्बाह्ये इन्द्रादिकं वज्रादिकं च पूजयेत् ॥ ४० ॥ ४१ ॥

आवरणानि सन्दर्श्यनैवेद्यं दर्शयति—

इतीति ।

इति सप्तावृतिवृतमभ्यर्च्याऽच्युतमादरात् ॥
प्रीणयेद्दधिखण्डाज्यमिश्रेण तु पयोऽन्धसा ॥ ४२ ॥

इत्यनेन प्रकारेण सप्तावरणवेष्टितं कृष्णमादरपूर्वकं सम्पूज्य दधिशर्कराघृतसहितेन पायसेन प्रीणयेदित्यर्थः ॥ ४२ ॥

राजोपचारमिति ।

राजोपचारं दत्त्वाऽथ स्तुत्वा नत्वा च केशवम् ॥
उद्वासयेत् स्वहृदये परिवारगणैः सह ॥ ४३ ॥

छत्रचामरादीनिदत्वा अथानन्तरं स्तवं कृत्वा अष्टाङ्गपञ्चाङ्गान्यतरेण प्रणम्य परिवारगणैः सह केशवं हृदये उद्वासयेत् उत्तोल्य स्थापयेत् ॥ ४३ ॥

न्यस्त्वेति ।

न्यस्त्वाऽऽत्मानं समभ्यर्च्य तन्मयः प्रजपेन्मनुम् ॥
रत्नाभिषेकध्यानेज्याविंशत्यर्णाश्रितेरिता ॥ ४४ ॥

जपहोमार्चनैर्ध्यानैर्योऽमुं प्रभजते मनुम् ॥
तद्वेश्म पूर्यते रत्नैः स्वर्णधान्यैरनारतम् ॥ ४५ ॥

न्यस्त्वा पूजापूर्वोक्तं सृष्ट्यादिन्यासं कृत्वा आत्मपूजां विधाय तन्मयः पूज्यदेवस्वरूपो भूत्वा पूजाङ्गमन्त्रं जपेत् ।

प्रकृतमुपसंहरति—

रत्नेति ।

ध्यानं च इज्या च पूजा च इत्यर्थः तथा च यस्यां पूजायां कृष्णस्यरत्नाभिषेकध्यानं तत्र कृष्णस्य विंशत्यक्षरोक्ता पूजेयमुक्ता ।

फलं दर्शयति ।

जपेति जपादिभिर्यो अमुं मन्त्रं सेवते तस्य गृहं पद्मरागादिभिः रत्नैः काञ्चनै र्धान्यैश्चाऽनारतमनवरतं पूर्यते ॥ ४४ ॥ ४५ ॥

पृथ्वी पृथ्वी करे तस्य सर्वसस्यकुलाकुला ॥
पुत्रैर्मित्रैः सुसम्पन्नः प्रयात्यन्ते परां गतिम् ॥ ४६ ॥

तथा पृथ्वी महती—पृथिवी साधकस्य करे आयत्ता भवति किंभूता सर्वस्य धान्यादेः कुलेन समूहेनाकुला परिपूर्णा तथा औरसपुत्रैः सुहृद्भिश्च समेतः सन् शरीरपातानन्तरं विष्णुलोकं गच्छति ॥ ४६ ॥

प्रयोगं दर्शयति ।

वह्नाविति ।

वह्नावभ्यर्च्य गोविन्दं शुक्लपुष्पैः सतण्डुलैः ।
आज्याक्तैरयुतं हुत्वा भस्म तन्मूर्द्ध्नि धारयेत् ।
तस्या ऽन्नादिसमृद्धिः स्यात्तद्वशे सर्वयोषितः ॥ ४७ ॥

यथोक्तप्रकारेणाग्निमाधाय तत्र यथोक्तप्रकारेण गोविन्दं सम्पूज्य घृताक्तैस्तण्डुलसहितैः शुक्लपुष्पैर्दशसहस्राणि हुत्वाहोमाग्निभस्म यः पुमान् मूर्द्धनि धारयेत् तस्य नानासमृद्धिः सम्पत्तिर्भवति सर्वाश्च स्त्रियस्तदायत्ता भवन्ति ॥ ४७ ॥

प्रयोगान्तरमाह—

आज्यैरिति ।

आज्यैर्लक्षं हुनेद्रक्तपद्मैर्वा मधुराप्लुतैः ॥
श्रियातस्यैन्द्रमैश्वर्यं तृणलेशायते ध्रुवम् ॥ ४८ ॥

घृतैः केवलैः घृतमधुशर्करायुतैः रक्तपद्मैर्वा यो लक्षं जुहोति तस्य साधकस्य श्रियालक्ष्म्या कृत्वा इन्द्रसम्बन्धि ऐश्वर्यं तृणसमानं भवति ध्रुवमुत्प्रेक्षायाम् ॥ ४८ ॥

प्रयोगान्तरमाह—

शुक्लेति ।

शुक्लादिवस्त्रलाभाय शुक्लादिकुसुमैर्हुनेत् ॥
त्रिमध्वक्तैर्दशशतमाज्याक्तैर्वाऽष्टसंयुतम् ॥ ४९ ॥

शुक्लादिवस्त्रप्राप्त्यर्थं घृतमधुशर्करासहितैः शुक्लपुष्पैः घृताक्तैर्वा अष्टाधिकंदशशतं जुहुयात् ॥ ४९ ॥

प्रयोगान्तरमाह—

क्षौद्रसिक्तैरिति ।

क्षौद्रसिक्तैः सितैः पुष्पैरष्टोत्तरसहस्रकम् ॥
हुनेन्नित्यं स षड्मासान् पुरोधा नृपतेर्भवेत् ॥ ५० ॥

मधुमिश्रितैः शुक्लपुष्पैरष्टाधिकसहस्रं प्रत्यहं यो जुहुयात् स षट्के अतीते राज्ञः पुरोहितो भवति ॥ ५० ॥

दशाष्टेति—

दशाष्टादशवर्णोक्तं जपध्यानहुतादिकम् ॥
विदध्यात्कर्म चाऽनेन ताभ्यामप्यत्र कीर्त्तितम् ॥५१॥

दशाष्टादशाक्षरयोरुक्तं जपध्यानहोमादिकम् अनेनमन्त्रेणकुर्यात् अत्र मन्त्रे कथितं प्रयोगादिकं ताभ्यां च कुर्यात् ॥ ५१ ॥

मन्त्रान्तरमाह—

श्रीशक्तिरिति ।

श्रीशक्तिस्मरकृष्णाय गोविन्दाय शिरो मनुः ॥
रव्यर्णो ब्रह्मगायत्र्याकृष्णऋष्यादिरथाऽस्य तु ॥ ५२ ॥

श्रीबीजं शक्तिबीजं स्मरः कामबीजं कृष्णायगोविन्दा-

योतिस्वरूपं शिरःस्वाहेति स्वरूपं रव्यर्णाष्टादशार्णोमन्त्रः ऋषि-रादौयषान्तेऋष्यादयो ब्रह्मगायत्रीकृष्णा ऋष्यादय इत्यर्थः अस्य-ब्रह्माऋषिः गायत्रीछन्दः कृष्णोदेवता इत्यर्थः बीजशक्त्या-दिपूर्ववत् ॥ ५२ ॥

वीजैरित्यादि ।

वीजैस्त्रिवेदयुग्मार्णैरङ्गषट्कमिहोदितम् ॥
विंशत्यर्णोदितजपध्यानहोमार्चनाक्रियाः ।
मन्त्रोऽयं सकलैश्वर्यकाङ्क्षिभिः सेव्यताम्बुधैः॥५३॥

इह मन्त्रे अङ्गषट्कंषडङ्गं कथितं कैस्त्रिभिर्वीजैरङ्गत्रयं तथा त्रिवेदयुग्मार्णैः त्रिभिश्चतुर्भिर्द्वाभ्यां चाऽपराङ्गत्रयमिति ।

विंशेति ।

अयं मन्त्रः विंशत्यक्षरमन्त्रोक्तजपध्यानहोमपूजासहितः सकलै-श्वर्यकामैः पण्डितैरुपास्यताम् ॥ ५३ ॥

मन्त्रान्तरमाह—

श्रीति ।

श्रीशक्तिकामपूर्वोऽङ्गजन्मशक्तिरमान्तकः ॥
दशाक्षरः सरावादौ स्याच्चेच्छक्तिरमायुतः ॥
मन्त्रौ विकृतिरव्यर्णावाचक्राद्यङ्गिनाविमौ ॥ ५४ ॥

श्रीवीजं भुवनेश्वरीवीजं कामवीजं च एते पूर्वे यस्य दशाक्ष-रस्य तथा ऽङ्गजन्म कामवीजं शक्तिःभुवनेश्वरीवीजं रमाश्री-वीजम् एते अन्ते यस्यदशाक्षरस्य एवंभूताद्यन्तविशिष्टो दशाक्षरो-षोडशाक्षरमन्त्रोभवति तथा सएव दशाक्षरोमन्त्रः आदौशक्ति-रमायुतः भुवनेश्वरीश्रीवीजसाहितश्चेत्तदाद्वादशाक्षरमन्त्रोभवति एवं च साति इमौ विकृतिरव्यर्णौषोडशाक्षरद्वादशाक्षरौ मन्त्रौ आचक्राद्य-ङ्गिनौ दशाक्षरोक्तानि आचक्राद्यङ्गानि ययोस्तादृशौ ज्ञेयो ॥ ५४ ॥

विंशत्यर्णेति—

विंशत्यर्णोक्तयजनविधी ध्यायेद्‌थाऽच्युतम् ॥

वरदाभयहस्ताभ्यां श्लिष्यन्तं स्वाङ्कगे प्रिये ॥
पद्मोत्पलकरे ताभ्यां श्लिष्टं चक्रदरोज्ज्वलम् ॥५५॥

विंशत्यक्षरकथितपूजाप्रकारावेतौ अथानन्तरम् अच्युतं चिन्तयेत् कीदृशं स्वाङ्कगे स्वक्रोडस्थिते प्रिये लक्ष्मीसरस्वत्यौ यद्वा रुक्मिणीसत्यभामेश्लिष्यन्तम् आलिङ्गन्तं काभ्यां वरदाभयहस्ताभ्यां वरंददातीतिवरदः नविद्यतेभयं यस्मात्स वरदाभयौ च तौहस्तौ-चेतिवरदाभयहस्तौताभ्यामित्यर्थः प्रियेकीदृशे पद्मंसामान्यपङ्कजम् उत्पलं नीलपद्मं ते करयोर्ययोस्ते तादृग्विधे पुनःकीदृशंताभ्यां प्रियाभ्यां श्लिष्टम् आलिङ्गितं पुनःकीदृशं शङ्खचक्राभ्यामुज्ज्वलम् ॥ ५५ ॥

पुरश्चरणजपादिकमाह—

दशलक्षेत्यादि ।

दशलक्षं जपेदाज्यैस्तावत्सहस्रहोमतः ॥
सिद्धाविमौ मनू सर्वसम्पत्सौभाग्यदौ नृणाम्॥५६॥

दशलक्षसंख्यंजपेत् आज्यैर्घृतैस्तावत्संख्यसहस्रहोमतोदशसहस्रहोमतः सिद्धौ इमौ मन्त्रौ मनुष्याणां सर्वैश्वर्यसर्वजनप्रियप्रदौ भवतः ॥ ५६ ॥

इदानींक्रमेणमन्त्रमुद्धरतिमारशक्तीत्यादिना ।

मारशक्तिरमापूर्वः शक्तिश्रीमारपूर्वकः ॥
श्रीशक्तिमारपूर्वश्च दशार्णा मनवस्त्रयः ॥ ५७ ॥

अत्राद्यः कामभुवनेश्वरीश्रीबीजपूर्वो दशाक्षरः भुवनेश्वरी श्रीमारः पूर्वो यस्येतिद्वितीयः श्रीभुवनेश्वरीकामबीजपूर्वो दशाक्षर इति तृतीयः ॥ ५७ ॥

एतेषां मनुवर्याणामङ्गष्यादिदशार्णवत् ॥
शङ्खचक्रधनुर्बाणपाशाङ्कुशधरोऽरुणः ॥
वेणुं धमन् धृतं दोर्भ्यां कृष्णो ध्येयो दिवाकरे ॥५८॥

आद्ये मनौ ध्यानमेवं द्वितीये विंशदर्णवत् ॥
दशार्णवत् तृतीयेऽङ्गदिक्पालाद्यैः समर्चना ॥ ५९ ॥
पञ्चलक्षं जपेत्तावदयुतम्पायसैर्हुनेत् ॥
ततः सिध्यन्ति मनवो नृणां सम्पत्तिकान्तिदाः ॥६०॥

एतेषामित्यादिसुगमम् ।
दिवाकरेसूर्यमण्डले ॥ ५८ ॥ ५९ ॥ ६० ॥
स्पष्टं मन्त्रान्तरमुद्धरति—
अष्टादशार्णेति ।

अष्टादशार्णो मारान्तो मनुः सुतधनप्रदः ॥
कृष्णाद्यष्टादशार्णोक्तं माराङ्ढस्वरैः क्रमात् ॥
अङ्गान्यस्य मनोरङ्गदिक्पालाद्यैः समर्चना ॥६१॥

कामबीजान्तः पूर्वोक्ताष्टादशाक्षरमन्त्रः सुतधनप्रदः माराङ्ढै-र्नपुंसकरहितकामबीजसहितैः दीर्घस्वरषट्कैः क्लांक्लीमित्यादिषट्कैः क्रमादस्यमनोः षडङ्गानि ॥ ६१ ॥

ध्यानमाह—

पाणौ पायसपक्कमाहितरसं बिभ्रन्मुदा दक्षिणे ।
सव्ये शारदचन्द्रमण्डलनिभं हैयङ्गवीनन्दधत् ।
कण्ठे कल्पितपुण्डरीकनखमत्युद्दामदीप्तिं वहन्
देवो दिव्यदिगम्बरो दिशतु वः सौख्यं यशोदाशिशुः ६२

पाणौपायसपक्वं सुपक्वं पायसं सुस्वाद्वित्यर्थः अत्युद्दामदीप्तिम् अत्युद्भटकान्ति दिव्यइति दिव्यश्चासौदिगम्बरश्चेतिसमासः दिव्यदेवस्वरूप इति ॥ ६२ ॥

दिनशोऽभ्यर्च्य गोविन्दं द्वात्रिंशल्लक्षमानतः ॥
जप्त्वा दशांशं जुहुयात्सिताज्येन पयोऽन्धसा ॥६३॥

सिताज्येनपयोऽन्धसाशर्कराघृतसहितेनपरमान्नेन ॥ ६३ ॥

पद्मस्थंदेवमभ्यर्च्य तर्पयेत्तन्मुखाम्बुजे ॥
क्षीरेण कदलीपक्वैर्दध्ना हैयङ्गवेन च ॥ ६४ ॥

सुतार्थी तर्पयेद्देवं वत्सराल्लभते सुतम् ॥
यद्यदिच्छति तत्सर्वं तर्पणादेव सिध्यति ॥ ६५ ॥

क्षीरेणेत्यादिना तर्पणंयदुक्तं तज्जलेनैवक्षीरादिद्रव्ययुक्ताकार्यम् ॥ ६४ ॥ ६५ ॥

मन्त्रान्तरमुद्धरति—

वाग्भवमिति ।

वाग्भवं मारबीजं च कृष्णायभुवनेश्वरी ॥
गोविन्दाय रमा गोपीजनवल्लभङेशिरः ॥ ६६ ॥
चतुर्दशस्वरोपेतः शुक्लः सर्गी तदूर्ध्वतः ॥
द्वाविंशत्यक्षरो मन्त्रो वागीशत्वस्य साधकः ॥६७॥

वाग्भवम् ऐम् इति बीजं मारबीजं क्लीं कृष्णायेतिस्वरूपंभुवनेश्वरीबीजं ह्रींगोविन्दायेति स्वरूपं रमाश्रीबीजंगोपीजनवल्लभ इति स्वरूपं ङे चतुर्थ्येकवचनं शिरः स्वाहा शुक्लः शकारश्चतुर्दशस्वरेणोपेतः औकारसहितः शुक्रइति पाठे दन्त्यसकारः संशुक्रात्मनेनमइति न्यासविधानात् सर्गीविसर्गसहितः तदूर्द्धत इति तस्यउर्द्ध्वम् तस्यएकाविंशत्यक्षरस्यउर्द्धतः प्रथमबीजमेतदिति रुद्रधरः ।

तदूर्द्धतः—

स्वाहाकारोर्द्धतः इति लघुदीपिकाकारः ।

अनेनबीजेन सहद्वाविंशत्यक्षरोमन्त्रोभवति कीदृशोऽयं वचनेश्वरत्वदाता ॥ ६६ ॥ ६७ ॥

अष्टादशार्णेति—

अष्टादशार्णवत्सर्वमङ्गष्यादिकमस्य तु ॥
पूजा च विंशत्यर्णोक्ता प्रतिपत्तिस्तु कथ्यते ॥ ६८ ॥

अस्य ऋषिच्छन्दोधिष्ठातृदेवताबीजशक्त्यङ्गानि सर्वाणि अष्टादशार्णवत् यथाष्टादशाक्षरमन्त्रे तथात्रापीत्यर्थः पूजा पुनः विंशत्यक्षरकथिता बोद्धव्या प्रतिपत्तिर्ध्यानं कथ्यतेपुनः ॥ ६८ ॥

वामोर्द्ध्वेति ।

वामोद्र्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् ॥
अक्षमालां च दक्षोद्र्ध्वे स्फाटिकीं मातृकामयीम्॥६९॥
शब्दब्रह्ममयं वेणुमधःपाणिद्वयेरितम् ॥
गायन्तं पीतवसनं श्यामलं कोमलच्छविम् ॥ ७० ॥
बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ॥
उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥ ७१ ॥

श्लोकत्रयेणाऽऽदिकुलकम्—

हरिम् उपतिष्ठेत् ध्यायेत् वामोर्द्ध्वहस्ते विद्यासर्वस्वपुस्तकं वेदान्तपुस्तकं धारयन्तं दक्षोर्द्ध्वे पञ्चाशत्संख्यमातृकाक्षरसंमितां पञ्चाशत्स्फटिकवद्धामक्षमालांधारयन्तं पुनः कीदृशम् अधः स्थितकरद्वयेन ईरितं वादितं शब्दब्रह्ममयं शब्दब्रह्मस्वरूपं वेणुरन्ध्रं दधानं पुनः कीदृशं वेणुनैवगायन्तम् पुनः कीदृशं पीतवस्त्रंयस्यतं श्यामवर्णं च पुनःकीदृशं कोमलामनोहरा छविर्यस्य सतथातं पुनः कीदृशं वर्हीमयूरस्तस्यवर्हे पिच्छं तेन कृत उत्तंसः शिरोभूषणं येनतं पुनः कीदृशं सर्वसाक्षिणं पुनः कीदृशं सर्वदाउपासितं सेवितं कैः सर्ववेदिभिः अतीतानागतज्ञैः मुनिगणैः सनकादिभिः ॥ ६९ ॥ ७० ॥ ७१ ॥

पुरश्चरणमाह—

ध्यात्वैवमिति ।

ध्यात्वैवं प्रमदावेशविलासम्भुवनेश्वरम् ।
चतुर्लक्षं जपेन्मन्त्रमिमं मन्त्री सुसंयतः ॥ ७२ ॥

एवं पूर्वोक्तं भुवनेश्वरं श्रीकृष्णं प्रमदास्त्रीतस्या वेशः संस्थानविशेषः तस्य विलास आल्हादो यस्यतं प्रमदारूपधारिणमित्यर्थः यद्वास्त्रीरूपधरं स्त्रीविलासञ्च ध्यात्वा इमंमन्त्रंलक्षचतुष्टयं जपेत्सुसंयतः सन् पूर्वोक्तपुरश्चरणवान् ॥ ७२ ॥

होममाह ।

पलाशेति—

पलाशपुष्पैः स्वाद्वक्तैश्चत्वारिंशत्सहस्रकम् ॥
जुहुयात्कर्मणाऽनेन मनुः सिद्धो भवेद् ध्रुवम् ॥७३॥

घृतमधुशर्करान्वितैः पलाशपुष्पैश्चत्वारिंशत्सहस्रकं जुहुयात् अनेनविधिना अवश्यंमन्त्रः सिध्यति ॥ ७३ ॥

फलंदर्शयति—

योऽस्मिन्निति ।

योऽस्मिन्निष्णातधीर्मन्त्री वर्तते वक्त्रगह्वरात् ॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ॥ ७४ ॥

यो मन्त्री अस्मिन् मन्त्रेनिष्णातधीर्दृढमतिर्वर्तते तस्य साधकस्यवक्त्रगह्वरात् मुखमध्यतो गद्यपद्यमयीवाणीप्रवर्त्तते गङ्गाप्रवाहवत् विशुद्धानवरतत्वेनगङ्गाप्रवाहेणोपमा ॥ ७४ ॥

सर्वेति—

सर्ववेदेषु शास्त्रेषु सङ्गीतेषु च पण्डितः ॥
संवित्तिं परमां लब्ध्वा चाऽन्ते भूयात्परम्पदम् ॥७५॥

सर्वेषुऋग्वेदादिषुशास्त्रेषुवेदान्तेषुपण्डितोविवेकबुद्धियुक्तः सन् संवित्तिम् उत्कृष्टज्ञानं प्राप्य अन्तेदेहावसानेविष्णुलोकं प्राप्नोति॥७५॥

मन्त्रान्तरमाह—

तारमिति ।

तारं हृद्भगवान् ङेऽन्तो नन्दपुत्रपदं तथा ॥
ऽऽनन्दान्ते वपुषेऽस्थ्यग्निमायान्ते दशवर्णकः ॥ ७६ ॥
अष्टाविंशत्यक्षरोऽयं ब्रुवे द्वात्रिंशदक्षरम् ।
नन्दपुत्रपदं ङेऽन्तं श्यामलाङ्ग पदं तथा
ङेन्ता बालवपुःकृष्णगोविन्दा दशवर्णकः ॥ ७७ ॥

तारंप्रणवःहृत् नमःङे ऽन्तः चतुर्थ्यन्तो भगवान् भगवत इति स्वरूपं

नन्दपुत्रं तथा ङेन्तं चतुर्थ्यन्तं नन्दपुत्रायेति पदान्ते आनन्द इति शब्दशेषे वपुषे इति स्वरूपम् अस्थिशकारः अग्निरेफः मायादीर्घ ईकारः तथा च श्रीवीजम् अस्याऽन्तेदशार्णकः दशाक्षरमन्त्रः एते-नायं मन्त्रः अष्टाविंशत्यक्षरो भवति ।

अधुना द्वात्रिंशदक्षरमन्त्रान्तरमुद्धरति ।

ब्रुवे वच्मीति ।

प्रतिज्ञामन्त्रमुद्धरति ।

नन्देति ।

नन्दपुत्रपदं चतुर्थ्यन्तं श्यामलाङ्ग पदमपि चतुर्थ्यन्तं बालवपुः कृष्णगोविन्दशब्दाश्च प्रत्येकं चतुर्थ्यन्ताः अनन्तरं पूर्वोक्तदशाक्षरमन्त्रः एतेन द्वात्रिंशदक्षरोमन्त्रो भवति ॥ ७६ ॥ ७७ ॥

ऋष्यादिकं दर्शाति—

अनयोरिति ।

अनयोर्नारदऋषिः छन्दस्त्रिष्टुबनुष्टुभौ ॥
आचक्राद्यैरङ्गमङ्गदिक्पालाद्यैश्च पूजनम् ॥ ७८ ॥

अनयोर्नारदऋषिः यथाक्रमं त्रिष्टुबनुष्टप्छन्दसी आचक्राद्यैः पूर्वोक्तैरङ्गपञ्चकम् अङ्गदिक्पालवज्राद्यैरावरणपूजनं पीठपूजातु पूर्ववत् ॥ ७८ ॥

ध्यानं दर्शयति—

दक्षिण इति ।

दक्षिणे रत्नचषकं वामे सौवर्णवेत्रकम् ॥
करे दधानं देवीभ्यामाश्लिष्टं चिन्तयेद्धरिम् ॥ ७९ ॥

हरिंचिन्तयेत् कीदृशं—

दक्षिणहस्तेरत्नपात्रं वामहस्तेसुवर्णघटितवेत्रंदधानं पुनः कीदृशंदेवीभ्यांलक्ष्मीसरस्वतीभ्यां रुक्मिणीसत्यभामाभ्यां वा आलिङ्गितम् ॥ ७९ ॥

जपेदिति—

जपेल्लक्षं मनुवरौ पायसैरयुतं हुनेत् ॥
एवं सिद्धमनुर्मन्त्री त्रैलोक्यैश्वर्यभाग् भवेत् ॥८०॥

मन्त्रश्रेष्ठौ प्रत्येकं लक्षंजपेत् ।

अनन्तरं परमान्नेनदशसहस्रं जुहुयात् अनेनासिद्धोमन्त्रोयस्य-मन्त्री लोकत्रयैश्वर्यभाजनं भवति ॥ ८० ॥

मन्त्रान्तरमाह—

तारेति ।

तारश्रीशक्तिर्बीजाढ्यं नमोभगवतेपदम् ॥
नन्दपुत्रपदङेऽन्तं भूधरो मुखवृत्तयुक् ॥
मासान्ते वपुषे मन्त्र उनविंशतिवर्णकः ॥ ८१ ॥

तारंप्रणवः श्रीवीजं भुवनेश्वरीवीजम् एतद्बीजत्रयाढ्यं नमोभगवते इति स्वरूपंततश्चतुर्थ्यन्तनन्दपुत्रपदं भूधरोवकारः मुखवृत्तमाकारः तद्युक्तः मांसोलकारस्तदन्तेवपुषे इति स्वरूपम् एतेन उनविंशतिवर्णकोमन्त्रउद्धृतोभवति ॥ ८१ ॥

ऋषिर्ब्रह्माऽनुष्टुप्छन्दस्तथाऽन्यदुदितं समम् ॥
अयं च सर्वसम्पत्तिसिद्धये सेव्यताम्बुधैः ॥ ८२ ॥

अस्य मन्त्रस्य ब्रह्माऋषिः छन्दोनुष्टुप् अन्यदुदितम् अन्यत्सर्वसमानं पूर्वोक्तवद्वेदितव्यमित्यर्थः ॥ ८२ ॥

मन्त्रान्तरमुद्धरति—

तारमित्यादिना ।

तारं हृत् भगवान् ङेऽन्तो रुक्मिणीवल्लभस्तथा ॥
शिरोऽन्तः षोडशार्णोऽयं रुक्मिणीवल्लभाह्वयः ॥८३॥

तारः प्रणवः हृन्नमः चतुर्थ्यन्तोभगवान् तथा चतुर्थ्यन्तोरुक्मिणीवल्लभशब्दः शिरोन्तः स्वाहाशब्दान्तः एतेनरुक्मिणीवल्लभाख्यः षोडशाक्षरोमन्त्रः कथितः ॥ ८३ ॥

सर्वसम्पत्प्रदो मन्त्रो नारदोऽस्य मुनिःस्मृतः ॥
छन्दोऽनुष्टुप् देवता च रुक्मिणीवल्लभो हरिः ॥
एकदृग्वेदमुनिदृग्वर्णैरस्याऽङ्गपञ्चकम् ॥ ८४ ॥

अस्यऋषिर्नारदः अनुष्टुप्छन्दः रुक्मिणीवल्लभोहरिर्देवतेति ।

एकेति—

अस्य मन्त्रस्य पञ्चाङ्गानि भवन्ति कैः मन्त्रस्यएकद्विचतुःसप्तद्विवर्णैः ॥ ८४ ॥

ध्यानमाह—

तापिच्छेति ।

तापिच्छच्छविरङ्कगाम्प्रियतमां स्वर्णप्रभामम्बुज-
प्रोद्यद्वामभुजां स्ववामभुजयाश्लिष्यन् सचिन्ताश्मना॥
श्लिष्यन्तीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिर-
म्पायाद्वोऽसनसूनपीतवसनो नानाविभूषो हरिः॥८५॥

तापिच्छच्छविस्तमालकान्तिर्हरिर्वो युष्मान् पायात् रक्षतु किंकुर्वन् अङ्कस्थांगौराङ्गींप्रियतमां चिन्तामणिरत्नसहितेन हस्तेन आलिङ्गन् किंभूतां पद्मोल्लसत्मनोहरवामकरां पुनः किंभूतां स्वयमात्मना आत्मानं देवं वा दक्षिणकरेण आश्लिष्यन्तीम् आलिङ्गन्तीं कीदृशोहरिः आलिङ्गनान्यहस्ते शोभमानः काञ्चनदण्डो यस्य तथा पुनः कीदृशः असनवृक्षपुष्पवत्पीतवस्त्रे यस्यस पुनः कीदृशः नानाप्रकारो ऽलङ्कारोयस्य ॥ ८५ ॥

पुरश्चरणमाह—

ध्यात्वेति ।

ध्यात्वैवं रुक्मिणीनाथं जप्याल्लक्षमिमं मनुम् ॥
अयुतं जुहुयात्पद्मैररुणैर्मधुराप्लुतैः ॥ ८६ ॥

एवं पूर्वोक्तं रुक्मिणीवल्लभं रुक्मिणीनाथं ध्यात्वाइमंमन्त्रं

लक्षमेकं जपतु घृतमधुशर्करासिक्तैः लोहितपद्मैरपि दशसहस्रं जुहुयात् ॥ ८६ ॥

पूजां दर्शयति—

पूजयेदिति ।

अर्चयेन्नित्यमङ्गैस्तं नारदाद्यैर्दिशाधिपैः ॥
वज्राद्यैरपि धर्मार्थकाममोक्षाप्तये नरः ॥ ८७ ॥

पीठपूजापूर्ववत् आवरणपूजातु कथ्यते प्रत्यहं तं हरिं पूजयेत् केरङ्गैराचक्राद्यैः सायाह्नपूजोक्तैः नारदप्रभृतिभिश्च दिशाधिपैरिन्द्राद्यैः तेषामायुधैर्वज्राद्यैः कीदृशं पुरुषार्थचतुष्टयप्रदम् ॥ ८७ ॥

मन्त्रान्तरमुद्धरति—

लीलादण्डेति ।

लीलादण्डावधौ गोपीजनसंसक्तदोःपदम् ॥
दण्डान्ते बालरूपेति मेघश्यामपदं ततः ॥ ८८ ॥
भगवान् विष्णुरित्युक्त्वा वह्निजायान्तको मनुः ॥
एकोनत्रिंशदर्णोऽस्य मुनिर्नारद ईरितः ॥ ८९ ॥
छन्दोऽनुष्टुप् देवता च लीलादण्डधरो हरिः ॥
मन्वब्धिकरणाग्न्यब्धिवर्णैरङ्गक्रिया मता ॥ ९० ॥

लीलादण्डावधौ लीलादण्डशब्दान्ते गोपीजनसंसक्तदोःपदम् अनन्तरंदण्डशब्दान्ते बालरूपेतिपदं तदनुमेघश्यामेतिपदं ततः शब्दोऽपि काकाक्षिवत् सम्बध्यते तदनुभगवान् विष्णुः सम्बोधनान्तमुक्त्वास्वाहाशब्दान्तएकोनत्रिंशदक्षरोमन्त्रउद्ध्रियतामित्यर्थः । अस्य मन्त्रस्य नारदऋषिरनुष्टुप्छन्दोलीलादण्डोहरिर्देवतेति ।

मन्वब्धीति—

अस्य मन्त्रस्याऽङ्गक्रिया मनुश्चतुर्दशः अब्धिश्चतुष्टयं करणं पञ्च अग्निस्त्रयश्चत्वारोऽब्धिरेतत्संख्याकैर्मन्त्रवर्णैर्मता संमता पञ्चाङ्गानीत्यर्थः ॥ ८८ ॥ ८९ ॥ ९० ॥

ध्यानमाह—

संमोहयन्निति ।

संमोहयन्निजकवामकरस्थलीला-
दण्डेन गोपयुवतीः सुरसुन्दरीश्च ॥
दिश्यान्निजप्रियतमांसगदक्षहस्तो-
देवः श्रियं निहतकंस उरुक्रमो वः ॥ ९१ ॥

देवः श्रीकृष्णः वोयुष्मभ्यं श्रियंलक्ष्मींदिश्यात् प्रयच्छतु किंकुर्वन् गोपयुवतीः सुरयुवतीश्च संमोहयन् केन स्वीयवामहस्तस्थविलासवेत्रेण कीदृशो निजप्रियांसगदक्षहस्तः स्वीयवल्लभाबाहुमूलस्थितदक्षिणकरः प्रियसखांसगदक्षहस्तइति पाठे निजसखांसगतदक्षिणहस्तः पुनः कीदृश उरुर्महान् क्रमः पराक्रमोयस्य सतथा ॥ ९१ ॥

पुरश्चरणमाह—

ध्यात्वेति ।

ध्यात्वैवं प्रजपेल्लक्षमयुतं तिलतण्डुलैः ॥
त्रिमध्वक्तैर्हुनेदङ्गदिक्पालाद्यैः समर्चयेत् ॥ ९२ ॥

एवं पूर्वोक्तं कृष्णंध्यात्वालक्षमेकं जपेत् तदनु घृतमधुशर्करास-हितैस्तिलतण्डुलैर्दशसहस्रं जुहुयात् ।

अङ्गेति ।

पीठपूजा पूर्ववदावरणपूजापश्चाङ्गैरिन्द्राद्यैश्चेति ॥ ९२ ॥

प्रात्यहिकपूजाफलमाह—

लीलेति ।

लीलादण्डं हरिं यो वै भजते नित्यमादरात् ॥
स पूज्यते सर्वलोकैस्तम्भजेदिन्दिरा सदा ॥ ९३ ॥

योमनुष्यः प्रत्यहं लीलादण्डधरं हरिं सेवते स सर्वजनैः पूज्यते तम् इन्दिरालक्ष्मीः सर्वदाभजते ॥ ९३ ॥

मन्त्रान्तरमुद्धरति—

त्रयोदशेति ।

त्रयोदशस्वरयुतः शार्ङ्गी मेदः सकेशवः ॥
तथा मांसयुगम्भाय शिरः सप्ताक्षरो मनुः ॥ ९४ ॥

त्रयोदशस्वरऔँकारस्तेनयुतः शार्ङ्गीगकारः मेदोवकारः कीदृशः सकेशवः अकारसहितः तथा मांसयुगं लकारद्वयमिति भाय शिरः स्वाहा अनेनसप्ताक्षरोमन्त्रः उक्तः ॥ ९४ ॥

ऋष्यादिकमाह—

आचक्राद्यैरिति ।

आचक्राद्यैरङ्गक्लृप्तिर्नारदोऽस्य मुनिः स्मृतः ॥
छन्द उष्णिग्देवता च गोवल्लभ उदाहृतः ॥ ९५ ॥

आचक्राद्यैः पञ्चाङ्गकरणम् अस्य मन्त्रस्य नारदऋषिः उष्णिक्छन्दः गोवल्लभः कृष्णोदेवतेति ॥ ९५ ॥

ध्यानमाह—

ध्येय इति ।

ध्येयोऽच्युतः स कपिलागणमध्यसंस्थः ।
ता आह्वयन् दधदक्षिणदोष्णि वेणुम् ॥
पाशं सयष्टिमपरत्र पयोदनीलः ।
पीताम्बरोऽहिरिपुपिच्छकृतावतंसः ॥ ९६ ॥

अच्युतः कृष्णोध्येयः कीदृशः कपिलागणोगोविशेषसमूहस्तस्याभ्यन्तरवर्ती किङ्कुर्वन् ताः कपिला आह्वयन् अभिमुखीकुर्वन् पुनः कीदृशः अदक्षिणदोष्णि वामहस्तेन सरन्ध्रंवंशं वहन् अपरत्र दक्षिणहस्ते दण्डसहितगोबन्धनरज्जुं दधत् पुनः कीदृशः पयोदनीलो मेघश्यामः पीतवसनः पुनः कीदृशः अहिरिपुर्मयूरः तस्य पिच्छं शिखण्डः तेन कृतोऽवतंसः कर्णालङ्कारः शिरोभूषणं वा येन स तथा ॥ ९६ ॥

पुरश्चरणमाह—

मुनिलक्षेति ।

मुनिलक्षं जपेदेतद् घुनेस्सप्तसहस्रकम् ॥
गोक्षीरैरङ्गदिक्पालमध्येऽर्च्य गोगणाष्टकम् ॥ ९७ ॥

इमंमन्त्रं मुनिलक्षं सप्तलक्षं जपेत् गोदुग्धैः सप्तसहस्रं जुहुयात् अङ्गपूजा अनन्तरं दिक्पालपूजायाः प्राक् गोगणाष्टकं पूजनीयं गोगणाष्टकं च प्रथमादि यथा स्यात् ।

सुवर्णवर्णा कपिला द्वितीया गौरपिङ्गला ।
तृतीया गौरपिङ्गाक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी अभ्रवर्णा स्यादेताः स्युरुत्तमा गवाम् ।
चतुर्थीपिङ्गला षष्ठी सप्तमी खुरपिङ्गला
अष्टमी कपिला गोषु विज्ञेयः कपिलागणः ।

इत्यनेनोक्तम् ॥ ९७ ॥

प्रयोगान्तरमाह—

अष्टोत्तरेति ।

अष्टोत्तरसहस्रं यः पयोभिर्दिनशो हुनेत् ॥
पक्षात्स गोगणैराढ्यो दशार्णेनैष वा विधिः ॥ ९८ ॥

गोदुग्धैः प्रतिदिनं योऽष्टाधिकं सहस्रं जुहुयात् स पञ्चदशदिनाभ्यन्तरे गोसमूहेन सम्पन्नो भवति एषविधिप्रयोगो दशाक्षरमन्त्रेण वा कार्य्य इत्यर्थः ॥ ९८ ॥

मन्त्रान्तरमाह—

सलवेति ।

सलवो वासुदेवो हृत् ङेऽन्तं च भगवत्पदम् ॥
श्रीगोविन्दपदं तद्वत् द्वादशार्णोऽयमीरितः ॥ ९९ ॥

लवोबिन्दुःतत्सहितो वासुदेवः ओंकारः अर्थात्प्रणवः ॐनमः

चतुर्थ्यन्तं भगवत्पदं तथा श्रीगोविन्दपदं चतुर्थ्यन्तम् एतेन द्वादशाक्षरो मन्त्र उद्धृतः ॥ ९९ ॥

ऋष्यादिकमाह—

मनुरिति ।

मनुर्नारदगायत्रीकृष्णर्ष्यादिरथाऽङ्गकम् ॥
एकाब्धिवेदभूतार्णैः समस्तैरपि कल्पयेत् ॥ १०० ॥

कश्चिन्मुनिरिति पाठोमयुक्तः असमन्वयात् पौनरुक्त्याच्च किन्तु मनुरित्येव पाठः ।

अयमिति पाठोयुक्त्यालभ्यत इति रुद्रधरः ।

अथाऽङ्गपञ्चकं कल्पयेत् कैः एकाब्धिचतुःपञ्चभिः तथा ओं नमो भगवते श्रीगोविन्दाय अस्त्रायफट् इति ॥ १०० ॥

ध्यानमाह—

वन्दइति ।

वन्दे कल्पद्रुमूलाश्रितमणिमयसिंहासने सन्निविष्टं ।
नीलाभं पीतवस्त्रं करकमललसच्छङ्खवेत्रं मुरारिम् ॥
गोभिः सप्रश्रवाभिर्वृतममरपतिप्रौढहस्तस्थकुम्भ-
प्रच्योतत्सौधधारास्नपितम-
भिनवाम्भोजपत्राभनेत्रम् ॥ १०१ ॥

मुरारिं वन्दे कीदृशं कल्पवृक्षमूलावस्थिते पद्मरागमणिघटिते सिंहासने उपविष्टं पुनः कीदृशं नीलाभंश्यामं तथा पीतवस्त्रं तथा हस्तपद्मे शोभमानौ शङ्खवेत्रौ यस्य तं तथा सप्रस्रवाभिः क्षीरस्तनाभिः गोभिर्वृतं वेष्टितं तथा अमरपतेरिन्द्रस्य प्रौढोवलिष्ठो यो हस्तस्तदवस्थितो यः कुम्भः घटस्तस्मात् प्रस्रवदमृत धाराभिः स्नापितं तथा ऽभिनवं नूतनं यदम्भोजं पद्मं तस्य पत्रवदाभा कान्तिर्नयनयोर्यस्यतम् ॥ १०१ ॥

पुरश्चरणमाह—

ध्यात्वेति—

ध्यात्वैवमच्युतं जप्त्वा रविलक्षं हुनेत्ततः ॥
दुग्धैर्द्वादशसाहस्रं दिनशोऽमुं समर्चयेत् ॥ १०२ ॥

एवं पूर्वोक्तमच्युतं ध्यात्वा द्वादशलक्षं जप्त्वा दुग्धैर्द्वादशसहस्रं जुहुयात् प्रत्यहं वा अमुं पूजयेत् ॥ १०२ ॥

आयतनादिषु पूजाविशेषं दर्शयति—

गोष्ठ इति ।

गोष्ठे प्रतिष्ठितं चाऽऽत्मगेहे वा प्रतिमादिषु ॥
समस्तपरिवाराचास्ताः पुनर्विष्णुपार्षदाः ॥ १०३ ॥
द्वाराग्रे बलिपीठेऽर्च्याः पक्षीन्द्रश्च तदग्रतः ॥
चण्डप्रचण्डौ प्राक् धातृविधातारौ च दक्षिणे ॥१०४॥
जयः सविजयः पश्चाद्बलः प्रबल उत्तरे ॥
ऊर्द्ध्वं द्वारश्रियं चेष्ट्वा द्वास्थेशान् युग्मशोऽर्चयेत्॥१०५॥
पूज्यो वास्तुपुमांस्तत्र तत्र द्वाःपीठमध्यगः ॥
द्वारान्तःपार्श्वयोरर्च्या गङ्गा च यमुना निधी ॥१०६॥
कोणेषु विघ्नं दुर्गाञ्च वाणीं क्षेत्रेशमर्चयेत्
अर्चयेद्वास्तुपुरुषं वेश्ममध्ये समाहितः ॥
देवतार्चानुरोधेन नैऋत्यां वा विचक्षणः ॥ १०७ ॥

गोष्ठे गोस्थाने प्रतिष्ठितं स्थापितं तथा आत्मगेहे सुवर्णादिघटितप्रतिमादिषु प्रतिष्ठितं विष्णुं पूजयेदिति पूर्वेणान्वयः ताः पूर्वोक्ता एव समस्तपरिवारपूजाः कार्याः तथा वक्ष्यमाणाश्च विष्णुपार्षदाः पूर्वादिचतुर्द्वाराग्रभागे बलिदानपीठे द्विशः पूज्याः अत्र त्रिपाठिनः ।

द्वादशाक्षरगोविन्दमन्त्रस्य पूजाप्रसङ्गेन पूर्वोक्तदीक्षापूजायां तथा त्रिकालपूजास्वपि पूर्वादिचतुर्द्वारपूजा विशेषतः कर्तव्यत्वेन ज्ञातव्या समस्तपरिवारायाऽच्युताय नमोनमः विष्णुपार्षदेभ्यो नमो-

नमः अनेनमन्त्रद्वयेन पूर्वादिचतुर्द्वाराग्रभागे बलिदानपीठे पूज-येदित्यर्थः ।

पक्षीन्द्रोगरुडः तदग्रतः बलिदानपीठाग्रतः पूज्यः ।

विष्णुपार्षदान् दर्शयति ।

प्रागिति ।

द्वारपूजामाह ।

ऊर्ध्व इति ।

चतुरस्त्रचतुर्द्वारोर्ध्वभागे द्वारश्रियं पूजयित्वा चण्डादीन् द्वौद्वौ-कृत्वा पूजयेत् ।

अनुक्रमेण पूर्वद्वारमारभ्य द्वारबलिपीठयोर्मध्ये वास्तुपुरुषाय न महाति पूजयेत् ।

द्वारान्त इति ।

चतुर्द्वारमध्योभयफलके गंगायमुने पूज्ये तथा शङ्खनिधिपद्म-निधी च पूज्यौ ।

तदनु मण्डपे प्रविश्याऽऽग्नेयादिकोणेषु विघ्नदुर्गासरस्वतीक्षेत्रे-शाः क्रमेण पूज्याः मण्डपमध्ये ब्रह्मस्थाने पुनर्वास्तुपुरुषं संयतः सन् पूजयेत् ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥

अस्त्रमुद्धरति—

तारमिति ।

तारं शार्ङ्गपदं ङेऽन्तं सपूर्वं च शरासनम् ॥
हुंफट् नतिरित्युक्त्वा ऽस्त्रमुद्रया ऽग्रे स्थितो हरेः॥१०८॥
पुष्पाक्षतं क्षिपेद्दिक्षु समासीता ऽऽसने ततः
विधेयमेतत् सर्वत्र स्थापितेषु विशेषतः ॥ १०९ ॥

तारं प्रणवः शार्ङ्गपदं ङेऽन्तं चतुर्थ्यन्तं सपूर्वं सशरासनशब्दं चतुर्थ्यन्तं हुंफट्नमः इति उक्त्वा पुष्पाक्षतं चतुर्दिक्षु अस्त्रमुद्रया-छोटिकया निक्षिपेत् कीदृशः हरेरग्रे स्थितः ततः आसने स्वोचिते-उपविशेत् एतत्सर्वं सर्वपूजादौ कर्तव्यं स्थापितेषु प्रतिमादिषु पुनर्विशेषतः कर्तव्यमेव ॥ १०८ ॥ १०९ ॥

पीठपूजामाह—

आत्मेति ।

आत्मार्चनान्तं कृत्वाऽथ गुरुपङ्क्तिं पुरोक्तवत् ॥
श्रीगुरून् परमाद्यांश्च महास्मत्सर्वपूर्वकान् ॥ ११० ॥

स्वदेहे पूर्वोक्तस्वरूपेण पीठमारभ्य सम्पूज्य हृदि भगवन्तमभ्यर्च्याऽनन्तरं बाह्यपीठे पूर्ववत् पूर्वोक्तदीक्षाप्रकरणकथितोत्तरदिग्विभागे इति वद् गुरुपङ्क्तिं पूजयेत् ।

गुरुपङ्क्तिमेवाह—

श्रीगुरूनिति ।

श्रीशब्दपूर्वान् गुरून् परमगुरून् ।

प्रयोगाश्च—

श्रीगुरुभ्योनमः

श्रीपरमगुरुभ्योनमः

श्रीमहागुरुभ्योनमः

श्रीअस्मद्गुरुभ्योनमः

सर्वगुरुभ्योनमः ॥ ११० ॥

तत्पादुकानारदादीन्पूर्वसिद्धाननन्तरम् ॥
ततो भागवतांश्चेष्ट्वा विघ्नं दक्षिणतोऽर्चयेत् ॥१११॥

तत् पादुकाभ्यः नारदादिभ्यः पूर्वसिद्धेभ्यः भागवतेभ्य इति लघुदीपिकाकारः ।

श्रीगुरुपादुकाभ्योनमः श्रीपरमगुरुपादुकाआदिगुरुपादुकामहागुरुपादुकाअस्मद्गुरुपादुकासर्वगुरुपादुकाभ्योनमः ।

इति त्रिपादिनः ।

एवं गुरुपङ्क्तिपीठस्योत्तरे समभ्यर्च्य दक्षिणे गणेशं पूजयेत्॥१११॥

पूर्ववत् इति—

पूर्ववत् पीठमभ्यर्च्य श्रीगोविन्दमथाऽर्चयेत्
रुक्मिणीं सत्यभामां च पार्श्वयोरिन्द्रमग्रतः ॥११२॥
पृष्ठतः सुरभिश्चेष्ट्वा केशरेष्वङ्गदेवताः
अर्च्या हृदादिवर्मान्ता दिक्ष्वस्त्रं कोणकेषु च ॥११३॥

पूर्वोक्तप्रकारेणाऽऽधारशक्त्यादिपीठमन्त्रान्तं सम्पूज्य देवमावाह्य अर्घ्यादिभिरुपचारैः पूजयेत् ।

आवरणपूजामाह–

रुक्मिणीमिति ।

गोविन्ददक्षिणवामयोः पार्श्वयोः कर्णिकायां रुक्मिणी सत्यभामा च संपूज्या देवाग्रे च इन्द्रं सम्पूज्य देवपृष्ठे तु सुरभिं पूर्वादिचतुर्दिक्कोणेषु केशरेषु हृदादिवर्मान्ता अङ्गदेवताः पूज्याः केशरेषु कोणेषु पुनरस्त्रमङ्गं पूजयेत् ॥ ११२ ॥ ११३ ॥

कालिन्दीति—

कालिन्दीरोहिणीनाग्नजित्याद्याः षट् च शक्तयः ॥
दलेषु पीठकोणेषु वह्न्याद्यर्च्याश्च किङ्किणीः ॥११४॥
दामानि यष्टिवेणुश्च पुरः श्रीवत्सकौस्तुभौ
अग्रतो वनमालां च दिक्ष्वष्टासु ततोऽर्चयेत् ॥११५॥
पाञ्चजन्यं गदां चक्रं वसुदेवं च देवकीम् ॥
नन्दगोपं यशोदां च सगोगोपालगोपिकाः ॥११६॥

कालिन्द्याद्याः शक्तयो देवपत्न्यः पत्रेषु पूज्याः आदिपदेन सुनन्दामित्रविन्दासुलक्ष्मणापरिग्रहः आग्नेयादिपीठकोणेषु किङ्किणीदामादीन् पूजयेत् तत्र श्रीकृष्णक्षुद्रघण्टिकाम् अग्निकोणे ॥

गोरक्षणार्थं दामानि नैर्ऋते गोप्रेरणार्थं लकुटं वायौ वंशम् ईशानकोणे देवस्याऽग्रे श्रीवत्सकौस्तुभौ श्रीवत्सकौस्तुभाग्रतः वनमालां तदुपरि अष्टदिक्षु पाञ्चजन्यादय इति ।

पाञ्चजन्यायनमः सगोगोपालगोपिकाभ्यो नमः इत्यन्ताः पूज्याः आदिपदेन गदाचक्रवसुदेवदेवकीनन्दयशोदापरिग्रहः ११४॥११५॥११६॥

इन्द्राद्या इति—

इन्द्राद्याः कुमुदाद्याश्च विश्वक्सेनं तथोत्तरे ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ ११७ ॥

इन्द्राद्याः स्वस्वदिक्षु पूज्याः तदस्त्राणि वज्रादीन्याद्दिशान्नमा-

ह्याणि तथा कुमुदाद्याश्चाऽष्टगजाः तदुपरि स्वस्वदिक्षु पूज्याः तद्बहिर्दैवतोत्तरे बिष्वक्सेनं पूजयेत् ।

कुमुदादीनां नामान्याह—

कुमुदाद्यइति ११७ ॥

पूजाफलमाह—

एकेति ।

एककालं द्विकालं वा त्रिकालं चेति गोष्ठगम्
श्रीगोविन्दं यजेन्नित्यं गोभ्यश्च यवसप्रदः ॥११८॥
दीर्घजीवी निरातङ्को धेनुधान्यधनादिभिः
पुत्रैर्मित्रैरिहाऽन्योऽन्ते प्रयाति परमं पदम् ॥ ११९ ॥

गोष्ठगं व्रजगं कृष्णं प्रत्यहम् एककालं द्विकालं त्रिकालं पूजयेत् गोभ्यश्च ग्रासप्रदः सन्निह लोके चिरायुर्निर्भयो धेनुधान्यसुवर्णादिभिः पुत्रमित्रादिभिश्च सम्पन्नो भवति देहपातान्ते च विष्णुलोकं च गच्छति ॥ ११८ ॥ ११९ ॥

मन्त्रान्तरमाह—

उदूर्ध्वेति ।

ऊर्द्धदन्तयुतः शार्ङ्गी चक्री दक्षिणकर्णयुक् ॥
मांसं नाथाय नत्यन्तो मूलमन्त्रोऽष्टवर्णकः ॥१२०॥

ऊदूर्ध्वदन्तः ओकारः तेन सहितः शार्ङ्गी गकारः चक्री ककारः दक्षिणकर्णयुक् उकारसहितः मांसो लकारः नाथायेति स्वरूपं नत्यन्तो नमःपदान्तः अयमष्टाक्षरोमूलमन्त्रसंज्ञकः ॥ १२० ॥

ऋष्यादिकमाह—

ऋषिरित्यादि ।

ऋषिर्ब्रह्मा च गायत्रीछन्दः कृष्णस्तु देवता ॥
युग्मवर्णैः समस्तेन प्रोक्तं स्यादङ्गपञ्चकम् ॥ १२१ ॥

अस्यमन्त्रस्य ब्रह्माऋषिः गायत्रीछन्दः श्रीकृष्णोदेवता चशब्दोऽनुक्तसमुच्चये तेनबीजशक्त्यधिष्ठातृदेवता दशाक्षरवत् तथा अस्य

मन्त्रस्य मन्त्रोत्थवर्णानां चतुर्भिर्युग्मवर्णैश्चतुरङ्गं समग्रेण च मन्त्रेणाऽङ्गपञ्चकं ज्ञेयम् ॥ १२१ ॥

ध्यानमाह—

पञ्चवर्षमिति ।

पञ्चवर्षमतिदृप्तमङ्गणे-
धावमानमलकाकुलेक्षणम् ॥
किङ्किणीवलयहारनूपुरै-
रञ्जितं स्मरत गोपबालकम् ॥ १२२ ॥

गोपशिशुं नमत कीदृशं पञ्चवर्षवयस्थं तथा अतिवलिष्ठं तथा प्राङ्गणे धावमानं तथा चातिचञ्चलेक्षणं तथा किङ्किणी-क्षुद्रघण्टिका वलयः कङ्कणः हारोमुक्ताहारः नूपुरस्तुलाकोटिरेतैरञ्जितं भूषितम् ॥ १२२ ॥

पुरश्चरणमाह—

ध्यात्वैवमिति ।

ध्यात्वैवं प्रजपेदष्टलक्षं तावत्सहस्रकम् ॥
जुहुयात् ब्रह्मवृक्षोत्थसमिद्भिः पायसेन वा ॥ १२३ ॥

एवं पूर्वोक्तं ध्यात्वा अष्टलक्षं मन्त्रं जपेत् तदनुपलाशवृक्षसमिद्भिः परमान्नेन वा ऽष्टसहस्रं जुहुयात् ॥ १२३ ॥

पूजाप्रकारमाह—

प्रासादे इति ।

प्रासादे स्थापितं कृष्णममुना नित्यशोऽर्चयेत्
द्वारपूजादि पीठार्चनान्तं कृत्वोक्तमार्गतः ॥ १२४ ॥

धवलगृहे स्थापितं कृष्णम् अमुना वक्ष्यमाणप्रकारेण प्रत्यहं पूजयेत् द्वारपूजामारभ्य पीठपूजापर्यन्तं पूर्वोक्तमन्त्रवर्त्मना कुर्यात् ॥ १२४ ॥

मध्य इति ।

मध्येऽर्चयेद्धरिं दिक्षु विदिक्ष्वङ्गानि च क्रमात् ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः ॥ १२५ ॥
रुक्मिणी सत्यभामा च लक्ष्मणा जाम्बवन्त्यपि ॥
दिग्विदिक्ष्वर्चयेदेतान् इन्द्रवज्रादिकान् बहिः ॥१२६॥

पद्ममध्ये हरिं पूजयेत् पूर्वादिदिक्केशरेषु हृदाद्यङ्गचतुष्टयम् आग्नेयादिविदिक्केशरेषु अस्त्रमङ्गं पूजयेत् ।

वासुदेव इति—

पूर्वादिदिक्पत्रेषु वासुदेवादीन् पूजयेत् आग्नेयादिविदिक्पत्रेषु रुक्मिण्याद्याः पूजयेत् तद्बाह्ये स्वस्वदिक्षु इन्द्रादीन् तदनु वज्रादीन् पूजयेदित्यर्थः ॥ १२५ ॥ १२६ ॥

फलमाह—

योऽमुं मन्त्रं जपेन्नित्यं विधिनेत्यर्चयेद्धरिम् ॥
स सर्वसम्पत्संपूर्णो नित्यं शुद्धं पदं व्रजेत् ॥ १२७ ॥

योऽमुमिति—

यःपुमान् उक्तविधिना हरिमर्चयेत् अमुं मन्त्रं जपेत् स सर्वैश्वर्यसम्पन्नः सन्नित्यमविनाशि शुद्धम् अविद्यातत्कार्यरहितं पदं ब्रह्माख्यं प्राप्नोति ॥ १२७ ॥

मन्त्रान्तरमाह—

तारश्रीशक्तिमारान्ते श्रीकृष्णायपदं वदेत् ।
श्रीगोविन्दाय तस्योर्द्ध्वे श्रीगोपीजन इत्यपि ॥१२८॥
वल्लभाय ततस्त्रिः श्रीः सिद्धगोपालको मनुः ॥
माधवीमण्डपासीनौ गरुडेनाऽभिपालितौ ॥ १२९ ॥
दिव्यक्रीडासुनिरतौ रामकृष्णौ स्मरन् जपेत् ॥
चक्री वसुस्वरयुतः सर्गेकार्णो मनुर्मतः ॥ १३० ॥

तारेति ।

तारः प्रणवः श्रीः श्रीबीजं शक्तिबीजंकामबीजान्ते श्रीकृष्णायेति

स्वरूपंतदनु श्रीगोविन्दायेति स्वरूपं तदनु श्रीगोपीजनवल्लभायेति स्वरूपं श्रीवीजत्रयमितिसिद्धिगोपालकोमन्त्रउद्धृतः ॥

ध्यानमाह—

माधवीति ।

रामकृष्णौस्मरन् जपेत् कीदृशौ माधवीलतामण्डपसमुपस्थितौतथागरुडेनसेवितौ ॥

एकाक्षरादिगोपालमन्त्रान् दर्शयेति ।

चक्रीति ।

ककारोवसुस्वरः अष्टमस्वरः ऋकारस्तेनसाहित इति लघुदीपिकाकारः मुनिस्वरः सप्तमस्वरस्तेनसाहित इति रुद्रधरः सर्गीविसर्गसहितः इत्येकाक्षरोमन्त्रः ॥ १२८ ॥ १२९ ॥ १३० ॥

कृष्णेति स्वरूपं द्व्यक्षरोमन्त्रः स एवद्व्यक्षरः कामबीजपूर्वश्चेत् तदाऽव्यक्षरो मन्त्रोभवति—

कृष्णेति द्व्यक्षरः कामपूर्वस्त्र्यर्णः स एव तु
स एव चतुरर्णः स्यात् ङेऽन्तोऽन्यश्चतुरक्षरः ॥ १३१ ॥
वक्ष्यते पञ्चवर्णः स्यात्कृष्णायनम इत्यपि
कृष्णायेतिस्मरद्वन्द्वमध्ये पञ्चाक्षरोऽपरः ॥ १३२ ॥

स एवत्र्यक्षरः चतुर्थीविभक्त्यन्तश्चेत्तदाचतुरक्षरो मन्त्रः अन्यः चतुरक्षरः सद्यफलप्रदम् इत्यनेनाग्रेवक्ष्यते कृष्णायनम इति पञ्चाक्षरः कृष्णायेति स्वरूपं स्मरद्वन्द्वकामबीजद्वयस्य मध्येयदाभवति तदा अपरःपञ्चाक्षरोमन्त्रोभवति ॥ १३१ ॥ १३२ ॥

गोपालायेति स्वरूपं वन्हिजाया स्वाहेति पदद्वयेनषडक्षरःकथितः

गोपालायाऽग्निजायान्तः षडक्षर उदाहृतः
कृष्णायकामबीजाढ्यो वह्निजायान्तकोऽपरः ॥१३३॥
षडक्षरः प्रागुदितः कृष्ण गोविन्दकौ पुनः
चतुर्थ्यन्तौ सप्तवर्णः सप्तार्णोऽन्यः पुरोदितः ॥१३४॥

कामबीजसहितकृष्णायेति स्वाहेति पदद्वयेन च षडक्षरोमन्त्र उद्धृतस्तथाऽपरः षडक्षरः प्रागेवकथितः सचक्लींकृष्णायनमइति

कृष्णगोविन्दकौशब्दौयदिचतुर्थ्यन्तौभवतस्तदासप्ताक्षरोमन्त्रो-ऽपरः सप्ताक्षरः प्रागुदितः सचगोवल्लभायस्वाहेति ॥ १३३ ॥ १३४ ॥

श्रीशक्तिमारः कृष्णाय मारः सप्ताक्षरो ऽपरः ॥
कृष्णगोविन्दकौ ङेऽन्तौ स्मराद्यावष्टवर्णकः ॥१३५॥

श्रीशक्तिमाराः श्रीभुवनेश्वरीमारबीजानिकृष्णायेतिमारान्तो-ऽपरः सप्ताक्षरोमन्त्रः कृष्णगोविन्दशब्दौङेऽन्तौचतुर्थ्यन्तौ कीदृशौ कामबीजाद्यौ इति वसुवर्णः अष्टाक्षरोमन्त्रः ॥ १३५ ॥

दधीति—

दधिभक्षणङेवन्हिजायाभिरपरोऽष्टकः ॥
सुप्रसन्नात्मने प्रोक्ता नम इत्यपरोऽष्टकः ॥ १३६ ॥

चतुर्थ्यन्तोदधिभक्षणशब्दः वह्निजायास्वाहा एतैर्वर्णैरपरो-ऽष्टाक्षरोमन्त्रः सुप्रसन्नात्मनेस्वरूपमुक्तानम इति वदेत् इत्यपरो-ऽष्टाक्षरोमन्त्रः ॥ १३६ ॥

प्राक् प्रोक्तो मूलमन्त्रश्च नवार्णः स्मरसंयुतः ॥
कृष्णगोविन्दकौ ङेऽन्तौ नमोऽन्तोऽन्यो नवार्णकः॥१३७॥

प्रागुक्तश्चाष्टाक्षरोमूलमन्त्रः स्मरसंयुतः कामबीजयुक्तः सन् नवाक्षरो भवति सच क्लींगोकुलनाथायनमइति कृष्णगोविन्दकौङेन्तौ-चतुर्थ्यन्तौस्मरसंयुतौयदि भवतस्तदानवाक्षरोमन्त्रो भवति यद्ये-तावेवनमोन्तकौनमः शब्दान्तौ भवतस्तदापरोनवाक्षरोमन्त्रः ॥१३७॥

क्लींग्लौँक्लींश्यामलाङ्गाय नमस्तु स्याद्दशार्णकः ॥
शिरोन्तो बालवपुषे क्लीँ कृष्णाय स्मृतो बुधैः ॥
एकादशाक्षरो मन्त्र एतेषां नारदो मुनिः ॥१३८॥
उक्तं छन्दस्तु गायत्री देवता कृष्ण ईरितः ॥
कलाषड्दीर्घकैरङ्गमथा ऽमुं चिन्तयेद्धरिम् ॥१३९॥

क्लींग्लौं क्लींश्यामलाङ्गायनमइति दशवर्णकोमन्त्रः शिरोन्तः

स्वाहान्तः बालवपुषे इति पदं क्लींकृष्णायेति एकादशाक्षरोमन्त्रः बुधैः स्मृतः ॥

उक्तानामृष्यादिकमाह—

एतेषामेकाक्षरमारभ्यैकादशाक्षरपर्यन्तानां द्वाविंशतिमन्त्राणाम् ऋषिर्नारदः गायत्रीछन्दः श्रीकृष्णोदेवता ।

अङ्गान्याह—

कलेति ।

ककारलकाराभ्यां षड्दीर्घकैर्नपुंसकरहितषड्दीर्घस्वरैः क्लाँक्लीं-क्लूँक्लैँक्लौँक्लः एभिरित्यर्थः ॥ १३८ ॥ १३९ ॥

ध्यानमाह—

अव्यादिति ।

अव्याद्व्याकोषनीलाम्बुजरुचिररुणाम्भोजनेत्रोऽम्बुजस्थो बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः। दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं वः॥१४०

वोयुष्मान् चिरं बहुकालंमुकुन्दोऽव्यात् रक्षतु कीदृशः व्याकोशं प्रफुल्लं यन्नीलाम्बुजं तद्वद्रुचिर्यस्य स तथा अरुणंरक्तं यदम्भोजंपद्मं तद्वन्नेत्रेयस्य सतथा पद्मोपविष्टः तथा बालः-पाञ्चवार्षिकः तथा जङ्घापादयोः संधिः कटीरस्थलंकटी उभयोर्घटितासम्बद्धारणन्तीशब्दायमानाकिङ्किणीक्षुद्रघण्टिकायस्य सतथा हस्ताभ्यां हैयङ्गवीनं सद्योजातं घृतं सुपक्वं पायसंदधत् तथागोगोपाङ्गनागोपालैर्वेष्टितः तथा रुरुःव्याघ्रस्तस्य नखेनविलसन्तीशोभमानाकण्ठभूषाऽलंकारो यस्यसतथा ॥ १४० ॥

एतेषां पुरश्चरणमाह—

ध्यात्वैवमिति ।

ध्यात्वैवमेकमेतेषां लक्षं जप्यान्मनुं ततः ।
सर्पिःसितोपलोपेतैः पायसैरयुतं हुनेत् ॥ १४१ ॥

यथोक्तध्यानं कृत्वाएतेषां मध्येएकं मन्त्रंलक्षंजपेत् तदनुघृत-

खण्डसारयुक्तैः परमान्नै र्दशसहस्रं जुहुयात् ॥ १४१ ॥

तर्पयेत्तावदन्येषां मनूनां हुतसंख्यया ।
तर्पणं विहितं नित्यं योऽर्चयेत्सुसमाहितः ॥१४२॥
वन्ह्यादीशान्तमङ्गानि हृदादिकवचान्तकम् ।
अर्चयेत्पुरतो नेत्रमस्त्रं दिक्षु वहिः पुनः ॥ ॥१४३॥
इन्द्रवज्रादयः पूज्याः सपर्येषा समीरिता ।
इत्येकमेषां मन्त्राणां भजेद्यो मनुवित्तमः ॥१४४॥
करप्रचेयाः सर्वार्थास्तस्याऽसौ पूज्यते ऽमरैः ॥
सद्यः फलप्रदं मन्त्रं वक्ष्येऽन्यं चतुरक्षरम् ॥ १४५ ॥
स प्रोक्तो मारयुग्मान्तरस्थकृष्णपदेन तु ॥
ऋष्याद्यमङ्गषट्कं च प्रागुक्तं प्रोक्तमस्य तु ॥ १४६ ॥

तदनुतावद्दशसहस्रं तर्पयेत् एवं प्रकारेणैकस्मिन्मन्त्रेसिद्धेजातेतदन्येषां सकृत्पुरश्चरणानाम् एकविंशतिमन्त्राणां जपहोमसंख्ययाविनैवहुतायुतेनतर्पणमेवपुरश्चरणं विहितं करणीयम् एतेषां मन्त्राणां होमसंख्यया अयुतेनैवतर्पणं विहितम् ।

पूजामाह ।

नित्यमिति ।

नित्यं सर्वदासुसमाहितः संयतः सन् पूजयेत् वह्न्यादीशान्तम् आग्नेयकोणमारभ्य ईशानकोणपर्यन्तहृदादिकवचपर्यन्तमङ्गचतुष्टयम् पूजयेत् पुरतो ऽग्रेनेत्रमस्त्रं पूजयेत् ॥

पूर्वादिचतुर्दिक्षु इन्द्रादीन् पूजयेत् तदनुवज्रादीनिति ।

उपसंहरति ।

एषां मन्त्राणां सपर्या पूजाकथिता ॥

फलमाह ।

इत्येकमिति ।

अमुनाप्रकारेणयः साधकोऽसमएषां मन्त्राणांमध्येएकं मन्त्रंभजेत् उपासीततस्यसर्वे पुरुषार्थाहस्तप्राप्याःदेवैश्चासौपूज्यते ॥

मन्त्रान्तरमाह—

सद्य इति ।

तात्कालिकफलदायकमपरं चतुरक्षरमन्त्रंवक्ष्येसचतुरक्षरः कामबीजद्वयमध्यस्थेन कृष्णपदेनकथितः ॥

ऋष्यादिकमस्य ऋषिश्छन्दोदैवतम् अङ्गषट्कंचप्रागुक्तं पूर्वमन्त्रसमूहेकथितंबोद्धव्यम् ॥ १४२ ॥१४३ ॥ १४४ ॥ १४५ ॥ १४६ ॥

ध्यानमाह—

श्रीमदिति ।

श्रीमत्कल्पद्रुमूलोद्गतकमललसत्कर्णिकासंस्थितोय-
स्तच्छाखालम्बिपद्मोदरविगलदसंख्यातरत्नाभिषिक्तः
हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलं भासयन् वासुदेवः
पायाद्वः पायसादोऽनवरतनवनीतामृताशीविशीसः१४७

वासुदेवःयोयुष्मान् पायात् कीदृशः यः श्रीयुक्तकल्पवृक्षमूलोद्गतपद्मेशोभमाना या कर्णिका तत्रोपविष्टः तथा कल्पद्रुमशाखालम्बियत् पद्मं तस्योदरं ततोविगलन्तिप्रसरन्तियानि असंख्यातानिरत्नानितैरभिषिक्तः तथा सुवर्णगौरः तथा स्वकान्तिभिः समस्तंत्रैलोक्यं भासयन् क्षीराक्षाशी तथा अनवरतमनुवेलं नूतनं नवनीतमेवामृतंतदश्नातीति ॥ १४७ ॥

पुरश्चरणमाह—

ध्यात्वेति ।

ध्यात्वैवं प्रजपेल्लक्षं चतुष्कं जुहुयात्ततः ।
त्रिमध्वक्तैर्बिल्वफलैश्चत्वारिंशत्सहस्रकम् ॥१४८॥

यथोक्तं ध्यानं कृत्वा लक्षचतुष्टयं जपेत् तदनुघृतमधुशर्करायुतैर्बिल्वफलैश्चत्वारिंशत्सहस्रं जुहुयात् ॥ १४८ ॥

पूजामाह—

अङ्गैरिति ।

अङ्गैर्निधिभिरिन्द्राद्यैर्वज्राद्यैरर्चनोदिता ।
तर्पयेद्दिनशः कृष्णं स्वादुत्रयधिया जलैः ॥ १४९ ॥

षडङ्गैः निधिभिरिन्द्रद्यष्टनिधिभिरिन्द्राद्यैर्वज्राद्यैश्चाऽर्चनाऽर्चना-पूजा कथिता ।

तर्पणमाह—

तर्पयेदिति ।

प्रतिदिनं स्वादुत्रयधिया घृतमधुशर्कराबुद्ध्या जलैः कृष्णं पूजयेत् ॥ १४९ ॥

मन्त्रान्तरमाह—

मारयोरिति ।

मारयोरस्य मांसाधोरक्तं चेदपरो मनुः ।
षडङ्गान्यस्य कलषट्दीर्घैर्मन्त्रशिखामणेः ॥१५०॥

अस्य पूर्वोक्तचतुरक्षरमन्त्रस्य मारयोराद्यन्तकामबीजयोर्मांसाधः लकारस्याधस्तात् चेद्यदि रक्तं रेफोभवति तदाऽपरश्चतुरक्षरः क्लींकृष्णक्लीम् इति मन्त्रः अस्य मन्त्रशिखामणे मन्त्रशिरोरत्नस्य कलषट्दीर्घैः कलाईकारसहितकामबीजेनषट्दीर्घैः कलसहितैर्नपुंसकरहितैः षाट्दीर्घस्वरैः षडङ्गानिकुर्यादितिशेषः ॥ १५० ॥

ध्यानमाह—

आरक्तेति ।

आरक्ताद्यानकल्पद्रुमशिखरलसत्स्वर्णदोलाधिरूढं-
गोपाभ्यांप्रेङ्ख्यमानंविकसितनवबन्धूकसिन्दूरभासम्॥
बालं नीलालकान्तं कटितटविलुठत्क्षुद्रघण्टाघटाढ्यम्॥
वन्देशार्दूलकामाङ्कुशललितगलाकल्पदीप्तंमुकुन्दम् २५१

मुकुन्दं वन्दे कीदृशम् आरक्तमरुणं यदुद्यानं तत्रः यः कल्प-

वृक्षस्तस्यशिखरमग्रं तत्रलसन्ती या शोभमाना सुवर्णमयी दोला तत्रोपविष्टं तथा गोपाङ्गनाभ्यां प्रेक्ष्यमाणं दोलायमानं विकसितं प्रफुल्लंनवीनं यद्बन्धुजीवपुष्पं सिन्दूरंतयोरिवभायस्यतं तथा बालं शिशुं तथाकृष्णकेशं तथा कटितटे इतस्ततोगच्छन्ती या क्षुद्रघण्टिकासमूहस्तेन सम्बद्धं तथा शार्दूलस्य व्याघ्रस्य घटाक्षुद्रघण्टिका कामाङ्कुशेनशोभमानं यत्कण्ठभरणंतेनशोभमानम् ॥ १५१ ॥

ध्यात्वेति ।

एवं—

ध्यात्वैवं पूर्वक्लृप्त्यैनं जप्त्वा रक्तोत्पलैर्नवैः ॥
मधुत्रयप्लुतैर्हुत्वा ऽभ्यर्चयेत्पूर्ववद्धरिम् ॥ १५२ ॥

पूर्वोक्तं मुकुन्दं ध्यात्वाएनं मन्त्रं पूर्वोक्तमन्त्रजपसंख्यमेव-जप्त्वारक्तपद्मैर्नूतनैर्घृतमधुशर्करायुतैः पूर्वोक्तसंख्यमेवहुत्वा पूर्वोक्तप्रकारेण हरिं पूजयेत् ॥ १५२ ॥

आरादुक्तं मन्त्रयोः प्रयोगंदर्शयति—

मधुरेति ।

मधुरत्रयसंयुक्तामारक्तां शालिमञ्जरीम् ॥
जुहुयान्नित्यशोऽष्टोर्द्ध्वं शतमेकेन मन्त्रयोः ॥१५३॥

घृतमधुशर्करामिश्रितां लोहितांहैमन्तिकधान्यमञ्जरीम् अष्टोत्तरशतमनयोमन्त्रयोर्मध्ये एकेनमन्त्रेणप्रत्येकं प्रत्यहं योजुहुयात् तस्यपुंसः मण्डलतः एकोनपञ्चाशद्दिनादर्वाक्षड्विंशतिदिना-दितिलघुदीपिकाकारः पञ्चचत्वारिंशद्दिनानन्तरमितिरुद्रधरः महती पृथिवी धान्यादिसमूहव्याप्ताभवति तथा तद्गृहं शालिधान्यसमूहव्याप्तं शीघ्रं भवति ॥ १५३ ॥

तस्य मण्डलतः पृथ्वी पृथ्वीसस्यकुलाकुला ॥
स्याच्छालिपुञ्जपूर्णं च तद्गेहमाऽऽशु प्रजायते॥१५४॥

फलमाह—

यस्त्वति ।

यस्त्वेतयोर्नियतमन्यतरं भजेत ।
मन्त्रोर्जपार्चनहुतादिभिराप्तभक्तिः ॥
श्रीमान्स मन्मथ इव प्रमदासु वाग्मी ।
भूयात्तनोर्विपदि तच्च महोऽच्युताख्यम् ॥ १५५ ॥

इति क्रमदीपिकायां केशवकाश्मीर्याचार्य
विरचितायां सप्तमः पटलः ॥ ७ ॥

यः पुमानेतयोरेकं नियतं नियतो भजेत्साधयेत् कैर्जपपूजाहोमादिभिः कीदृशः प्राप्तभक्तिः स लक्ष्मीयुक्तः स्त्रीषु कामदेववत् उत्कृष्टवचनभाक् भवति तनोर्विपदि शरीरपातानन्तरं विष्णुलोकं च गच्छति ॥ १५५ ॥

इति श्रीगोविन्दविद्याविनोदभट्टाचार्यविरचिते क्रमदीपिका-
विवरणे सप्तमः पटलः ॥ ७ ॥

अथोच्यते वश्यविधिः पुरोक्त-
दशार्णतोऽष्टादशवर्णतश्च ॥
स्मृत्यैव यौ सर्वजगत् प्रियत्वं-
मनू मनुज्ञस्य सदा विधत्तः ॥ १ ॥

अथाऽनन्तरं वश्यकरः प्रयोगः कथ्यते पूर्वोक्तदशाक्षरस्याऽष्टादशाक्षरस्य च यौ मन्त्रौ स्मरणमात्रेण साधकस्य सर्वजनवल्लभत्वं सर्वदा कुरुतः ॥ १ ॥

फुल्लैरिति ।

फुल्लैर्वन्यैःप्रसूनैरमुमरुणतरैरर्चयित्वा दिनादौ ।
नित्यंनित्यक्रियायांरतमथ-
दिनमध्योक्तक्लृप्त्यामुकुन्दम् ॥
अष्टोपेतं सहस्रं दशलिपिमनुवर्यं जपेद् यः स मन्त्री ।
कुर्याद्वश्यान्यवश्यंमुखरमुखभुवांमण्डलान्मण्डलानि२

पुष्पितैः वनोद्भवपुष्पैरतिलोहितममुंमुकुन्दं नित्यं सर्वदा नित्यकर्मानुष्ठाननिष्ठं दिनादौ प्रातः प्रत्यहं मध्याह्नोक्तपूजाप्रकारेण पूजयित्वा यो मन्त्री दशाक्षरं मन्त्रश्रेष्ठम् अष्टाधिकं सहस्रं जपेत् मण्डलादेव पञ्चाशद्दिनादर्वाक्मुखरमुखभुवां विद्वद्ब्राह्मणानां मण्डलानि समूहानवश्यं वश्यानि कुर्याद्वशयतीत्यर्थः ॥ २ ॥

क्षत्रियवैश्यशूद्रस्याऽपि प्रयोगत्रयं दर्शयति ।

जातीति ।

जातीप्रसूनैर्वरगोपवेषं-
क्रीडारतं रक्तहयारिपुष्पैः ॥
नीलोत्पलैर्गीतिरतं पुरोव-
दिष्ट्वा नृपादीन् वशयेत् क्रमेण ॥ ३ ॥

वरगोपवेषं श्रेष्ठगोपरूपधरं श्रीकृष्णं विचिन्त्य जातीपुष्पैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तरसहस्रं जप्त्वा क्षत्रियं वशयेत् क्रीडासक्तं ध्यात्वा रक्तकरवीरपुष्पैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तरं सहस्रं जप्त्वावैश्यंवशयेत् गीतिरतं गीतासक्तं ध्यात्वा नीलोत्पलैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तर सहस्रं जप्त्वा शूद्रं वशयेत् इत्यनेन प्रकारेणनृपादीन् वशयेदित्यर्थः॥३

प्रयोगान्तरमाह—

सितेति—

सितकुसुमसमेतैस्तण्डुलैराज्यसिक्तै-
र्दशशतमथ हुत्वा नित्यशः सप्तरात्रम् ।

कचभुवि च ललाटे भस्म तद्धारयन्ना ।
वशयति मनुजस्त्रीं साऽपि नूनंस्तथैव ॥ ४ ॥

श्वेतपुष्पसहितैः श्वेततण्डुलैर्घृतमिश्रितदशाक्षरमन्त्रेण दश-शतं हुत्वा नित्यशः सप्तदिनपर्यन्तं तदनु तद्धोमभस्म कचभुवि शि-रसि ललाटे च धारयन् ना पुरुषः मनुजस्त्रीं मनुष्यनारीमिति रुद्रधरः तरुणीं स्त्रियं वशयतीति त्रिपाठिनः साऽपि स्त्री अनेन प्रयोगेण नूनं वशयेदित्यर्थः ॥ ४ ॥

प्रयोगान्तरमाह—

ताम्बूलेति ।

ताम्बूलवस्त्रकुसुमाञ्जनचन्दनाद्यं-
जप्तं सहस्रत्रयमन्यतरेण मन्वोः ॥
यस्मै ददाति मनुवित् स जनोऽस्य मङ्क्षु ।
स्यात् किङ्करो न खलु तत्र विचारणीयम् ॥ ५ ॥

ताम्बूलं वस्त्रं पुष्पं कज्जलं चन्दनं च एतद्यदन्यद्वस्तु मन्वोर्दशा-ष्टादशाक्षरयोरन्यतरेणैकेन सहस्रत्रयं संजप्तं यस्मै जनाय ददाति साधकः स नरोऽस्य साधकस्य मङ्क्षुशीघ्रं वश्यो भवति नाऽत्र संशय इत्यर्थः ॥ ५ ॥

प्रयोगान्तरमाह—

राजद्वारे इति ।

राजद्वारे व्यवहारे सभाया-
द्यूते वादे चाऽष्टयुक्तं शतं च ॥
जप्त्वा वाचं प्रथमामीरयेद्यो-
वर्त्तेताऽसौ तत्र तत्रोपविष्टान् ॥ ६ ॥

राजसमीपे क्रयविक्रये सदसि अक्षक्रीडादौ वादे च यो मन्वोरेकमष्टोत्तरशतं जप्त्वा प्रथमत एव यां वाचं वदति तयैववाचा तत्र वादादौ उपविष्टानसौ वर्तेत तज्जयी भवतीत्यर्थः ॥ ६ ॥

प्रयोगान्तरमाह—

आसीनमिति ।

आसीनं मुरमथनं कदम्बमूले ।
गायन्तं मधुरतरं व्रजाङ्गनाभिः ॥
स्मृत्वाऽग्नौ मधुमिलितैर्मयूरकेध्मै-
र्हुत्वा ऽसौ वशयति मन्त्रविस्त्रिलोकीम् ॥ ७ ॥

कदम्बमूले उपविष्टं मुरमथनं कृष्णं गोपीभिर्मधुरतरं गायन्तं ध्यात्वा वह्नौ मधुप्लुतैर्मयूरकेध्मैरपामार्गसमिद्भिर्हुत्वा असौ साधको लोकत्रयं वशयति ॥ ७ ॥

प्रयोगान्तरमाह—

रासेति ।

रासमध्यगतमच्युतं स्मरन् ।
यो जपेद्दशशतं दशाक्षरम् ॥
नित्यशो झटिति मासतो नरो-
वाञ्छितामभिवहेत्स कन्यकाम् ॥ ८ ॥

यो नरः पूर्वोक्तरासमध्यगतं कृष्णं ध्यायन् दशाक्षरं मन्त्रं प्रत्यहं दशशतं जपेत् स मासैकेन शीघ्रमेव वाञ्छितां कन्यां प्राप्नोति ॥ ८ ॥

प्रयोगान्तरमाह—

तुङ्गेति ।

तुङ्गकुन्दमधिरूढमच्युतं-
या विचिन्त्य दिनशः सहस्रकम् ॥
साऽष्टकं जपति सा हि मण्डला-
द्वाञ्छितं वरमुपैति कन्यका ॥ ९ ॥

उच्चकदम्बवृक्षस्थं विचिन्त्य प्रत्यहम् अष्टोत्तरसहस्रं दशाक्षरं या कन्यका जपति सा हि निश्चयेन मण्डलादेकोनपञ्चाशद्दिनादर्वा-क्वाञ्छितवरं प्राप्नोति ॥ ९ ॥

समानफलं प्रयोगद्वयमाह—

नृत्यन्तमिति ।

नृत्यन्तं व्रजसुन्दरीजनकराम्भोजानि संगृह्य तं-
ध्यात्वाऽष्टादशवर्णकं मधुवरं लक्षं जपन्मन्त्रवित् ॥
लाजानामथवा मधुप्लुततरैर्हुत्वा ऽयुतं चूर्णकै-
रुद्दोहुं प्रजपेच्च तावदचिरादाकाङ्क्षितां कन्यकाम्॥१०॥

अचिरात् शीघ्रवाञ्छितांकन्यां परिणेतुं मन्त्रवित्साधकः गोपयुवतीहस्तपद्मानि संगृह्य धृत्वानृत्यन्तं तं प्रसिद्धं श्रीकृष्णं ध्यात्वालक्षमात्रपरिमितमष्टादशाक्षरं मन्त्रश्रेष्ठं जपेत् अथवा लाजानां चूर्णैर्मधुद्रुततरैर्घृतमधुशर्कराप्रचुरान्वितैः मधुना द्रवीभूतैरितिरुद्रधरः दशसहस्रहुत्वातावदेवसख्यं जपेदित्यर्थः ॥ १० ॥

प्रयोगान्तरमाह—

अष्टादशेति ।

अष्टादशाक्षरेण द्विजतरुजैस्त्रिमध्वक्तैरयुतम् ॥
कुशैस्तिलैर्वा सतण्डुलैर्वशयितुं द्विजान् जुहुयात् ११॥

द्विजान् ब्राह्मणान् वशयितुमष्टादशाक्षरमन्त्रेणाद्विजतरुजैः पलाशवृक्षसमुद्भवैः समिद्भिस्त्रिमधुराक्तैः घृतमधुशर्करामिश्रितैरयुतं दशसहस्रं जुहुयात् अथवात्रिमध्वक्तैः कुशैस्तिलैः तण्डुलैर्वाजुहुयात् ॥ ११ ॥

प्रयोगान्तरमाह—

कृतमालभवैर्वशयेन् नृपतीन् ।
मुकुलैश्च कुरुण्टकजैश्च तथा ॥
विशमिक्षुरकैरपि पाटलजै-
रितरानपि तद्वदथो वशयेत् ॥ १२ ॥

कृतमालभवैः राजवृक्षसमुद्भवैः मुकुलैः कलिकाभिः हुत्वानृपतीन् क्षत्रियान् वशयेत् कुरुण्टकजैश्च झिंटीसमुद्भवैः मुकुलैर्हुत्वावैश्यान् वशयेत् इक्षुरसैः इक्षुरकैरितिपाठे कोकिलाक्षोमथीनथइत्यर्थः पाटलसमुद्भवैः मुकुलैर्वाहुत्वा इतरान् शूद्रान् वशयेत्

अनुक्तसंख्याहोमस्यबोद्धव्यातस्याप्येवप्रकरणत्वादिति १२ ॥

प्रयोगान्तरमाह—

अभिनवैरिति ।

अभिनवैः कमलैररुणोत्पलैः ।
समधुरैरपि चम्पकपाटलैः ॥
प्रतिहुनेदयुतं क्रमशोऽचिरा-
द्वशयितुं मुखजादिवराङ्गनाः ॥ १३ ॥

शीघ्रं मुखजादिवराङ्गना ब्राह्मणादिस्त्रियोवशयितुंचतुर्भिर्द्रव्यैः समधुरैर्मधुरत्रयामिलितैः क्रमशः प्रत्येकं सार्द्धसहस्रद्वयं कृत्वा-दशसहस्रं प्रतिहुनेत् जुहुयात् ।

द्रव्याण्याह ।

नूतनैः श्वेतपद्मैः रक्तोत्पलैश्चम्पकपुष्पैः पाटलपुष्पैः ॥ १३ ॥

प्रयोगान्तरमाह—

हयारीति ।

हयारिकुसुमैर्नवैस्त्रिमधुराप्लुतैर्नित्यशः ।
सहस्रमृषिवासरं प्रतिहुनेन्निशीथे बुधः ॥
सुगर्विताधियं हठात् झटिति वारयोषामसौ ।
करोति निजकिङ्करीं स्मरशिलीमुखैरर्दिताम्॥१४॥

हयारिकुसुमैः करवीरकुसुमैः नूतनैः त्रिमधुरामिश्रितैः प्रत्यहं सहस्रं ऋषिवासरंसप्तवासरंबुधः साधकोनिशीथेरात्रौप्रत्यहं प्रति-दिनं जुहुयात् असौ अहंकारवतीं वारयोषां वेश्याकामवाणैः पीडितां हठात् बलात् झटितिशीघ्रं निजदासींकरोति ॥ १४ ॥

प्रयोगान्तरमाह—

पटुसंयुतैरिति ।

पटुसंयुतैस्त्रिमधुरार्द्रतरै-
रपि सर्षपैर्दशशतं त्रितयम् ॥

निशि जुह्वतोऽस्य हि शचीदयितोऽ-
प्यवशो वशी भवति किन्वपरे ॥ १५ ॥

लवणसंयुतैः कटुसंयुतैरितिपाठेकटुकसंयुतैरित्यर्थः मधुरार्द्र-तरैर्घृतमधुशर्करास्निग्धैरपिः समुच्चये सर्षपैर्दशशतं त्रितयंत्रिसहस्रं निशिरात्रौजुह्वतः पुरुषस्यशचीदयितः इन्द्रोपि अवशोवशीभवति किं पुनरन्ये ॥ १५ ॥

प्रयोगान्तरमाह—

अथेति ।

अथ विल्वजैः फलसमित्प्रसव-
च्छदनैर्मधुद्रुततरैर्हवनात् ॥
कमलैः सिताक्षतयुतैश्च पृथक् ।
कमलां चिराय वशयेदचिरात् ॥ १६ ॥

विल्ववृक्षोद्भवैः फलसमित्पुष्पपत्रैः श्वेतपद्मैरत्यन्तमधुराप्लुतैः सिताक्षतयुतैः शर्करातण्डुलमिश्रितैः सिताज्यसहितैरिति-पाठे सिताशर्करा आज्यं घृतं तत्सहितैः पृथक् एकैकं वस्तु-त्रिसहस्रहोमात् चिरकालम् अचिरात् शीघ्रंकमलां लक्ष्मींवशये-त् अत्रसंख्यासमनन्तरोक्ता ॥ १६ ॥

प्रयोगान्तरमाह—

अपहृत्येति ।

अपहृत्यगोपवनिताम्बराण्यमा ।
हृदयैः कदम्बमधिरूढमच्युतम् ॥
प्रजपेत्स्मरन्निशि सहस्रमानयेद्-
द्रुतमुर्वशीमपि हठाद्दशाहतः ॥ १७ ॥

हृदयैः अमासह हठात् गोपयुवतीवस्त्राण्यपहृत्यगृहीत्वाकदम्ब-वृक्षमधिरूढं कृष्णंस्मरन् निशिरात्रौसहस्रंजपेत्स दशाहतो दश-दिवसमध्येहठान्मन्त्रस्यबलात् उर्वशीमपिदेववेश्यामपि वशमानये-त् निजनिकटमिति शेषः ॥ १७ ॥

मन्त्रयोर्माहात्म्यमाह—

बहुनेति ।

बहुना किमत्र कथितेन मन्त्रयो-
रनयोः सदृक् न हि परो वशी कृतौ ॥
अभिकृष्टिकर्मणि विदग्धयोषितां-
कुसुमायुधास्त्रमयवर्ष्मणोरिह ॥ १८ ॥

अत्र ग्रन्थेबहुनाकथितेनकिं प्रयोजनम् अनयोर्दशाष्टादशाक्षरयोः सदृक्समः वशीकरणेइहजगति अपरोनास्तिकिम्भूतयोर्नगरस्त्रीणामाकर्षणकर्मणिकामास्त्रशरीरयोः ॥ १८ ॥

मोक्षसाधकप्रयोगान्तरमाह—

वन्द इति ।

वन्दे कुन्देन्दुगौरं तरुणमरुणपाथोजपत्राभनेत्रं-
चक्रं शङ्खं गदाब्जे निजभुजपरिघैरायतैरादधानम् ।
दिव्यैर्भूषाङ्गरागैर्नवनलिनलसन्मालयाचप्रदीप्तं-
प्रोद्यत्पीताम्बराढ्यंमुनिभिरभिवृतंपद्मसंस्थं मुकुन्दम्१९

मुकुन्दंवन्दे कीदृशं कुन्दपुष्पंचन्द्रश्चतद्वत् शुक्लं तथा युवानं तथारक्तपद्मसदृशलोचनं तथा दीर्घैर्निजबाहुपरिघैर्मुद्गराकारस्वबाहुभिः शङ्खचक्रंगदां पद्मञ्चधारयन्तं तथा देवयोग्यालङ्काराङ्गरागैः नवा नियानिपद्मानितेषां लसन्तीदेदीप्यमाना या माला तयाचप्रदीप्तं तथा देदीप्यमानहरिद्राभवस्त्रयुक्तं तथा नारदादिभिर्वेष्टितं तथा पङ्कजासीनम् ॥ १९ ॥

एवमिति—

एवं ध्यात्वापुमांसं स्फुटहृदयसरोजनासीनमाद्यं-
सान्द्राभोजच्छविम्बा हुतकनकनिभं वा जपेदकलक्षम् ।
मन्त्रोरेकं हितारान्तरितमथहुनेदर्कसाहस्रमिद्धमैः ।
क्षीरद्रुत्थैः पयोक्तैः समधुघृतसितेनाऽथवा पायसेन२०॥

एवंविधं पूर्वोक्तं मुकुन्दंध्यात्वाप्रफुल्लहृदयपद्मासनोपविष्टं तथा

आद्यं प्रथमं सजलजलदश्यामं सान्द्राम्भोजच्छविमितिपाठे मसृणपद्मकान्तिं वा ध्यात्वा द्वितारान्तरगं प्रणवद्वयमध्यगतं मन्त्रोद्देशाद्वादशाक्षरयोरेकम् अर्कलक्षं द्वादशलक्षं जपेत् अथजपानन्तरम् अर्कसहस्रम् इध्मैः समिद्भिः क्षीरवृक्षैरश्वत्थोदुम्बरप्लक्षन्यग्रोधान्यतमसमुद्भवैः पयोक्तैः दुग्धप्लुतैः अथवाघृतमधुशर्करासहितेनपरमान्नेन जुहुयात् ॥ २० ॥

ततो लोकाध्यक्षं ध्रुवचिनिसदानन्दवपुषम्-
निजे हृत्पाथोजे भवतिमिरसंभेदमिहिरम् ॥
निजैक्येन ध्यायन्मनुममलचेताः प्रतिदिनं-
त्रिसाहस्रं जप्यात्प्रयजतु च सायाह्नविधिना ॥२१॥

ततस्तदनन्तरं लोकाध्यक्षंलोकस्वामिनम्

अविनाशिज्ञानं तत्सुखस्वरूपशरीरं संसारान्धकारविच्छेदसूर्यममुं कृष्णं निजहृदयपद्मे निजैक्येन स्वाभेदेन भावयन् अमलचेताः निर्मलान्तःकरणः प्रतिदिनं त्रिसहस्रंसहस्रत्रयं जुहुयात् तथा पूर्वोक्तसायाह्नपूजाप्रकारेणपूजयतु होममपिकरोतु ॥ २१ ॥

विधिमिति—

विधिं योऽमुं भक्त्या भजति नियतं सुस्थिरमति-
र्भवाम्भोधिं भीमं विषमविषयग्राहनिकरैः ॥
तरङ्गैरुत्तुङ्गैर्जनिमृतिसमाख्यैः प्रविततं-
समुत्तीर्याऽनन्तं व्रजति परमं धाम स हरेः ॥ २२ ॥

यः स्थिरमतिः पुमान् अमुंविधिं प्रकारं नियतं सततं भक्त्या भजतिसेवते स भवाम्भोधिं संसारसागरं समुत्तीर्य हरेः अनन्यं नविद्यते अन्योयस्मात्सर्वमयमुत्कृष्टं धामप्राप्नोतिकीदृशम् अम्भोधिरिवभयङ्करं कैर्विषमादुर्निवाराः येविषयाः शब्दादयः अथवास्त्रक्चन्दनवनिताद्याः त एव ग्राहरूपामकरकच्छपाद्यास्तेषां निकरैः समूहैः तथा जन्ममरणनामधेयैस्तरङ्गैरुत्तुङ्गैर्महद्भिर्विस्तीर्णम् ॥ २२ ॥

गृणंस्तस्येति ।

गृणंस्तस्य नामानि शृण्वंस्तदीयाः ।
कथाः संस्मरंस्तस्य रूपाणि नित्यम्
नमंस्तत्पदाम्भोरुहं भक्तिनम्रः ।
स पूज्यो बुधैर्नित्ययुक्तः स एव ॥ २३ ॥

सपुरुषः बुधैः प्राज्ञैः पूज्यः स एव च नित्ययुक्तः नित्ययोगभाक् किङ्कुर्वन्सन् अस्यश्रीकृष्णस्यनामानिगृणन् वदन् तदीयाः कथा आकलयन् तस्य श्रीकृष्णस्य रूपाणिमूर्तीः सर्वदाध्यायन् तत्पदाम्भोरुहं श्रीकृष्णपादपद्मं नमन् भक्तिनम्रः सेवाऽवनतः अधिकनम्रत्वख्यापनार्थेपौनरुक्त्यम् ॥ २३ ॥

इदानीं परममन्त्रद्वयं कथयति ।

वक्ष्य इति ।

वक्ष्ये मनुद्वयमथाऽतिरहस्यमन्यत् ।
संक्षेपतो भुवनमोहननामधेयम् ॥
ब्रह्मेन्द्रवामनयनेन्दुभिरादिमान्य-
स्तत्पूर्वको वियदृषीकयुतेशङेहृत् ॥ २४ ॥

अथाऽनन्तरमन्यत् मन्त्रद्वयमतिगोप्यं जगन्मोहनसंज्ञकंस्वल्पोक्त्यावक्ष्ये ब्रह्मककारः इन्द्रोलकारः वामनयनं दीर्घ ईकारः इन्दुरनुस्वारः एतैः संयुक्तः कामबीजरूपः प्रथमोमन्त्र उद्धृतः तत्पूर्वकः वियत् हकारः ऋषीक इति स्वरूपं ताभ्यां युक्तईशशब्दः हृषीकेश इति स्वरूपं ङे चतुर्थ्येकवचनं हृन्नमः क्लींहृषीकेशायनमः इति द्वितीयोमन्त्रः अत्रायं पुरुषोत्तममन्त्र इति भैरवाचार्यपाठिनः ॥ २४ ॥

ऋष्यादिकमाह—

मन्त्वोरिति ।

मन्त्वोस्तु संमोहननारदोमुनिः ।
छन्दस्तु गायत्रमुदीरितं बुधैः ॥

त्रैलोक्यसंमोहनविष्णुरेतयोः ।
स्याद्देवता वच्म्यधुना षडङ्गकम् ॥२५॥

अनयोर्मन्त्रयोः संमोहननारदो मुनिः छन्दः पुनर्गायत्रं मन्त्रैः कथितं त्रैलोक्यसंमोहनविष्णुर्देवतेति ॥ २५ ॥

अधुनाषडङ्गंवदामि—

अङ्गानीति ।

अङ्गानिदीर्घैः सलवैस्तदपि च कलासनाढ्यैः ।
उक्तं पूर्ववदासनविन्यासान्तं समाचरेदथ तु ॥ २६ ॥

ऋॠऌॡवर्जितषड्दीर्घस्वरैः विन्दुसहितैः कलेत्यक्षरद्वयसंवद्धैः क्लाँ क्लीं क्लूँ क्लैं क्लौं क्लः एभिस्तत् षडङ्गमुक्तम् अथानन्तरं पूर्ववद्दशाक्षरकथितपीठपूजापर्यन्तं कार्यम् ॥ २६ ॥

करयोरिति ।

करयोः शाखासु तले न्यस्य षडङ्गानि चाऽङ्गुलीषु शरान्।
मनुपुटितमातृकार्णैर्न्यस्याङ्गेऽङ्गानि विन्यसेच्च शरान्२७

करयोः शाखासु अङ्गुलीषु उभयकरतले च षडङ्गानिविन्यस्य पुनरङ्गुलीषु च कामवाणान् विन्यस्य आद्यन्तस्थितमन्त्रमातृकाक्षरैर्मातृकास्थानेषु विन्यस्य दीर्घयुक्तकामबीजैः षडङ्गानिस्वशरीरेविन्यस्य वाणन्यासं च कुर्यात् ॥ २७ ॥

वाणन्यासस्थानान्याह—

कास्येति ।

कास्यहृदयलिङ्गाङ्घ्रिषुकर-
शाखाभिर्नमोन्तकान्ङेऽन्तान् ॥
शोषणमोहनसंदीपनतापनमादनान् क्रमशः ॥ २८ ॥
पञ्चैते संप्रोक्ता ह्रांह्रींक्लींक्लूं सआदिकावाणाः ।
समोहनमथजगतां ध्यायेत् पुरुषोत्तमं समाहितधीः२९॥

शिरोवदनहृदयलिङ्गपादेषु अङ्गुलीभिः अङ्गुष्ठादिकनिष्ठिकान्ता-

भिः एकैकया अङ्गुल्या चतुर्थीनमःपदसहितान् वक्ष्यमाणान् पञ्च-बाणान् क्रमेणविन्यसेत् ।

बाणनामान्याह—

शोषणेति ।

ह्रां ह्रीं क्लीं ब्लूं सः एतानिपञ्चबीजानिएकैकानि आदौयेषां एवम् एते पञ्चबाणाःशोषणादयः प्रोक्ताः प्रयोगस्तु ह्रांशोषणायनमः इत्य-ङ्गुष्ठेन शिरसि ह्रींमोहनायनमः इति तर्जन्यामुखे इत्यादि अथानन्त-रम् संयतचित्तः त्रिभुवनवश्यकरं पुरुषोत्तमंचिन्तयेत् ॥ २८ ॥ २९ ॥

ध्यानमाह—

दिव्येति ।

दिव्यतरूद्यानोद्यद्रुचिरमहाकल्पपादपाधस्तात् ।
मणिमयभूतलविलसद्रत्नपयोजन्मपीठनिष्ठस्य ॥ ३० ॥
विश्वप्राणस्योद्यत्प्रद्योतनसमद्युतेः सुपर्णस्य ।
आसीनमुन्नतांसे विद्रुमभद्राङ्गमङ्गजोन्मथितम् ॥ ३१ ॥
चक्रदराङ्कुशपाशान्सुमनोबाणेक्षुचापकमलगदाः ।
दधतं स्वदोर्भिररुणायतविपुल-
विघूर्णिताक्षियुगनलिनम् ॥ ३२ ॥
मणिमयकिरीटकुण्डलहाराङ्गदकङ्कणोर्मिरसनाद्यैः ।
अरुणैर्माल्यविलेपैरादीप्तं पीतवस्त्रपरिधानम् ॥ ३३ ॥
निजवामोरुनिषण्णांश्लिष्यन्तींवामहस्तधृतनलिनाम् ।
क्लिद्यद्योनिकमलांमदनमदव्याकुलोज्ज्वलाङ्गलताम् ३४॥
सुरुचिरभूषणमाल्यानुलेपनांसुसितवसनपरिवीताम् ।
निजमुखकमलव्यापृतचटुला-
सितनयनमधुकरांतरुणीम् ॥ ३५ ॥
श्लिष्यन्तं वामभुजादण्डेन दृढं धृतेक्षुचापेन ।

तज्जनितपरमनिर्वृतिनिर्भरहृदयं चराचरैकगुरुम् ॥३६॥
सुरदितिजभुजगगुह्यकगन्धर्वाद्यङ्गनाजनसहस्रैः ।
मदमन्मथालसाङ्गैरभिवीतं दिव्यभूषणोल्लसितैः ॥३७॥
आत्माभेदतयेत्थं ध्यात्वैकाक्षरमथाऽष्टवर्णं वा ।
प्रजपेद्दिनकरलक्षांस्त्रिमधुरसिक्तैस्तु किंशुकप्रसवैः ॥३८॥

नवश्लोकानां कुलकम् ।

इत्थम् एवं वासुदेवं ध्यात्वा एकाक्षरकामबीजम् अथवाष्टाक्षरमन्त्रं दिनकरलक्षंद्वादशलक्षं जपेत् कीदृशं ध्यात्वा देवसंबन्धिवृक्षोद्याने कल्पवृक्षोद्याने उद्यन् वृद्धिंगच्छन् मनोहरो यः पारिजातवृक्षस्तस्य तले गरुडस्योन्नतांसे उपविष्टं कीदृशस्य गरुडस्य पद्मरागादिघटितभूभागशोभमानश्रेष्ठपद्मपीठोपविष्टस्य तथा सकलजीवभूतस्य परमेश्वरस्यांशत्वात् तथा उदितसूर्यसमकान्तेः कीदृशं वासुदेवं प्रवालसुन्दराङ्गं तथा कामव्याकुलितं स्वदोर्भिः स्वबाहुभिर्दक्षिणवामक्रमेण चक्रशङ्खाङ्कुशपाशपुष्पशरेक्षुचापपद्मगदाः बिभ्राणं तथा रक्तंदीर्घे बृहद्विघूर्णितंनेत्रद्वयरूपं पद्मं यस्य स तथातम् पद्मरागादिमणिघटिताशिरोलंकारकर्णभूषणमुक्ताहारबाहुभूषणकरमूलभूषणमुद्रिकाक्षुद्रघण्टिकाप्रभृतिभिः रक्तमाल्यगन्धैश्च देदीप्यमानं तथा पीते वाससी परिधानमाच्छादनं यस्य स तथातं तथा धृतेक्षुचापेन वामबाहुदण्डेन दृढं यथा स्यादेवं प्रियमालिङ्गन्तम् ।

कीदृशीं स्वीयवामोरुदेशे उपविष्टां तथा आलिङ्गन्तीं तथा वामहस्तगृहीतपद्मां तथासरसीभूतगुह्यां तथा कामेनव्याकुलीकृताअनायत्तीकृता अङ्गलता यस्यास्तां मनोहराणि अलङ्कारमालाचन्दनानियस्यास्तां तथा श्वेतवस्त्रपरिधानां तथा कृष्णमुखपद्मेऽर्पितं सम्यग्व्यापारयुक्तं चटुलंमनोहरं चञ्चलं वा असितंश्यामंयन्नेत्रं स एव मधुकरो भ्रमरः यस्यास्तां तथा तरुणीं युवतीं पुनः कीदृशं प्रियालिङ्गनजानितपरमसुखपूर्णहृदयं तथा जगद्गुरुं तथा देवदैत्यसर्पदेवयोनिदेवगायनविद्याधरस्त्रीसहस्रैर्मदतया कामेन च स्त-

म्भयुक्तम् अङ्गंपेषान्तैर्देवाहनभूषणदीसैर्वेष्टितं कथायुक्त्या आत्मैक्येनध्यात्वा ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

जुहुयात्तरणिसहस्रं विमलैः सलिलैश्च तर्पयेत्तावत्
विंशत्यर्णे प्रोक्तेपन्त्रेदिनशोऽमुमर्चयेत् भक्त्या ॥ ३९ ॥

ध्यानजपानन्तरं घृतमधुशर्करासहितैः पलाशपुष्पैर्द्वादशसहस्रं जुहुयात् होमानन्तरंनिर्मलैर्जलैर्द्वादशसहस्रंतर्पणंकुर्यात् ।

विंशत्यर्णेति ।

पूर्वोक्तविंशत्यक्षरोदितपीठविधानेनतन्मन्त्रोद्धृतयन्त्रे अमुं कृष्णंभक्त्याप्रतिदिनं पूजयेत् ॥ ३९ ॥

पूजाप्रकारमाह—

सार्द्ध चतुः श्लोकेनगरुडमन्त्रमाह—

पीठेति ।

पीठविधौपक्ष्यन्ते राजायशिरोऽमुनाऽभिपूज्याऽहिरिपुम्
हरिमावाह्यस्कन्धंतस्यार्घाद्यैः समर्च्य भूषान्तैः ॥ ४० ॥
अङ्गानि च बाणांश्च न्यासक्रमतः किरीटमपिशिरसि ॥
श्रवसोश्चकुण्डलेऽरिप्रमुखानि प्रहरणानि पाणिषु च ४१ ॥
श्रीवत्सकौस्तुभौ च स्तनयोरुर्द्ध्वंगले च वनमालाम् ।
पीतवसनं नितम्बेवामाङ्कंश्रियमपि स्वर्वजिन ॥ ४२ ॥
इष्ट्वाऽथ कर्णिकायामङ्गानिविदिग्दिशासुदिक्षुशरान् ।
कोणेषुपश्चमं पुनरग्न्यादिदलेषु शक्तयः पूज्याः ॥ ४३ ॥

पूजाविधौपक्षिशब्दान्ते राजायेति स्वरूपं शिरः स्वाहा अनेनप्रकारेणपीठमध्ये अहिरिपुंगरुडंसम्पूज्य तस्यगरुडस्य पृष्ठेश्रीकृष्णमावाह्याऽऽवाहनादियथावत् कृत्वाऽर्घाद्यैर्भूषान्तैरुपचारैश्च सम्पूज्य अङ्गानि च सम्पूज्यपञ्चबाणांश्च सम्पूज्य भूषणानि च सम्पूज्यदिग्दलेषुशक्तयः पूज्या इति अनेनान्वयः ।

एतदेवस्पष्टयति—

न्यासक्रमत इत्यादिना ।

यत्रपरमेश्वराङ्गे यस्य न्यासः तस्य पूजाबोद्धव्या तत्रशिरसिकिरीटं अपिपादपूरणे श्रोत्रयोः कुण्डले अरिमुखानि चक्रादीनि प्रहरणानि आयुधानिहस्तेषुस्तनयोऊर्द्ध्वेहृदि श्रीवत्सकौस्तुभौ गलेवनमालाम् आपादलम्बिनीपद्ममालां नितम्बेकट्यां हरिद्राभवस्त्रं वामाङ्कवामभागेलक्ष्मीं च स्वबीजेन श्रीबीजेन इष्ट्वासम्पूज्य कर्णिकायां दिग्विदिशासुकोणेषुदिक्षु च अङ्गानि पूर्ववत्सम्पूज्यदिक्षुशरान् अग्न्यादिकोणेषुचपञ्चमं वाणं पूजयेत् पुनरग्न्यादिदलेषु अष्टौशक्तयः पूज्याः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

शक्तिवर्णानाह—

लक्ष्मीरिति ।

लक्ष्मीः सरस्वती स्वर्णाभे अरुणतरे रतिप्रीत्यौ ।
कीर्तिः कान्तिश्च सिते तुष्टिः पुष्टिश्च मरकतप्रतिमे॥४४॥

स्वर्णाभेपीतवर्णे अरुणतरेअतिरक्ते सितेशुक्ले मरकतप्रतिमेहरिद्रावर्णे ॥ ४४ ॥

एताः शक्तयः किम्भूताः ।

दिव्याङ्गरागभूषा-
माल्यदुकूलैरलङ्कृताङ्गलताः ॥
स्मेराननाः स्मरार्त्ता-
धृतचामरचारुकरतला एताः ॥ ४५ ॥

देवयोग्यानुलेपनालङ्कारग्रन्थितपुष्पसूक्ष्मवस्त्रैर्भूषितदेहाः अङ्गलताशब्दः स्वरूपवाची तथा ईषद्धास्यवदना तथा कामवाणपीडिताः तथा गृहीतचामरमनोहरहस्ताः ॥ ४५ ॥

लोकेशा इति ।

लोकेशा बहिरर्च्याः-
कथितेत्यर्चा मनुद्वयोद्भूता ॥

प्रायः पुरुषोत्तमविधि-
रेवं हि स नोच्यतेऽत्रबहुलत्वात् ॥ ४६ ॥

तद्बहिरिन्द्रादयः वज्रादयश्चपूज्याः इत्येवंपूजा मन्त्रद्वयलम्भवा कथिता प्रायोबाहुल्येनपुरुषोत्तममन्त्रकथितप्रकारोऽप्येवम्परं स इह स्पष्टीकृत्य नोच्यते बहुवक्तव्यत्वात् प्रायः पुरुषोत्तमविधिरेवमि-हाऽन्यतोऽवगन्तव्यमिति टीकान्तरसम्मतं पाठान्तरम् ॥ ४६ ॥

संमोहनगायत्रीमाह—

त्रैलोक्येति ।

त्रैलोक्यमोहनाये-
त्युक्त्वा विद्महइति स्मरायेति ।
तत् धीमहीति तन्नो-
ऽन्तेविष्णुस्तदनुप्रचोदयात् ॥ ४७ ॥

त्रैलोक्यमोहनायेति स्वरूपमुक्त्वातदनन्तरं विद्महे इति स्मराये-ति तदनुधीमहीति तन्नोविष्णुः प्रचोदयादिति स्वरूपंवदेत् ॥ ४७ ॥

प्रभावमाह—

जप्यैषा हि जपादौ-
दुरितहरी श्रीकरी जपार्चनहवनैः ।
प्रोक्षयतु शुद्धिविधये-
ऽर्चायामनयात्मयागभूद्रव्याणि ॥ ४८ ॥

एषागायत्रीजपात् पूर्वं जपनीया स्वमन्त्रजपपूजाहोमैः पुनः पा-पनाशनी लक्ष्मीप्रदा च भवति अनयागायत्र्या च पूजायां शुद्ध्यर्थं आत्मयागभूद्रव्याणि आत्मानं यागभुवम् द्रव्याणि च प्रोक्षयतु ॥४८॥

मन्त्रद्वयसाधारणतर्पणमाह—

मन्त्वोरिति ।

मन्त्वोरेकेन शतं-
तर्पयेन्मोहनीप्रसूनयुतैर्यः ।

तोयैर्दिनशः प्रातः-

स तु लभते वाञ्छितानयत्नतः कामान् ॥ ४९ ॥

यः पूर्वोक्तमन्त्रयोः एकेनमोहिनीपुष्पमिश्रितैः शङ्खासवपद्मास-वपुष्पसहितैर्जलैः प्रति प्रत्यहं शतं तर्पयेत् स वाञ्छितान्कामान् अनायासेन आप्नोति ॥ ४९ ॥

मन्त्रद्वयसम्बन्धिप्रयोगान्तरमाह—,

हुत्वेति ।

हुत्वायुतं हुतशेष-

संपाताज्येन तावदभिजप्तेन ।

भोजयतु स्वाभीकं-

रमणीरमणोऽपि तां स्ववशतां नेतुम् ॥ ५० ॥

घृतेनवह्नावयुतंहुत्वा आहुतिशेषघृतेनमन्त्रजप्तेन रमणी स्वव-शतां नेतुं प्रापयितुम् आत्मीयंकामुकंभोजयतु कामुकः स्त्रियं भो-जयतु ॥ ५० ॥

अष्टादशार्णेति ।

अष्टादशार्णविहिता-

विधयः कार्या वश्यत आभ्याम् ।

मन्त्रोरनयोःसदृगन्यो वै-

न मनुस्त्रैलोक्यवश्यकर्मणि जगति ॥ ५१ ॥

अष्टादशाक्षरमन्त्रकथिता वश्यकारिणः प्रयोगा आभ्यां मन्त्राभ्यां कार्याः हि निश्चयेन जगति सकलजगदायत्तताकार्ये अनयोः समा-नोऽन्यो मन्त्रोनास्ति ॥ ५१ ॥

अत्रैकार्णेति ।

अत्रैकार्णजपाद्वा-

यथवा कृष्णः सवेणुगतिर्ध्येयः ॥

२९

अरुणरुचिराकृवेशः-
कन्दर्पो वा सपाशसृणिचापेषुः ॥ ५२ ॥

अत्र समनन्तरोक्तद्वयमध्ये एकाक्षरमन्त्रस्य जपपूजाहोमादौ कृष्णो भावनीयः कीदृक् सवेणुगीतिरिति वंशोत्थगानपरः तथा लोहितमनोहरशरीराभरणः अथवा अत्रैव मन्त्रजपादौ पाशाङ्कुशधनुर्बाणधरः कामदेवो ध्येयः मन्त्रस्यादिदेवात्मकत्वादिति भावः ॥५२॥

प्रकृतमुपसंहरति ।
यस्त्विति ।

यस्त्वेकतरं मनुमेतयो-
र्विमलधीः सदा भजति मन्त्री ॥
सोऽमुत्राऽपि च सिद्धिं ।
विपुलामिहातितरामोति ॥ ५३ ॥

योमन्त्री अनयोमन्त्रयोरेकं मन्त्रश्रेष्ठं सदा जपादिभिः सेवते स इहलोके ऽमुत्र च अत्यर्थं विपुलांसिद्धिं प्राप्नोति ॥ ५३ ॥

अथ रुक्मिणीवल्लभमन्त्रमुद्धरति ।
अथेति ।

अथ सत्यशौरिचतृतीयतुर्यकाः ।
शिखिवामनेत्रशशिखण्डमण्डिताः ॥
जयकृष्णयुग्मकनिरन्तरात्मभू-
शिखिशक्तिडास्यधृतसक्तवर्णकाः ॥ ५४ ॥
प्रनिमध्यतो मुदितचेतसे तत-
स्त्यपरुक्मदग्यगुरुमारुताक्षराः ॥
सचतुर्थिकृष्णपदमिक्षुकार्मुको-
दशवर्णकश्च मनुवर्यकस्त्वसौ ॥ ५५ ॥
सलवाधराचलसुतारमाक्षरैः ।
पुटितः क्रमोत्क्रमगतैः समुद्भवत् ॥

इति दन्तसूर्यवसुवर्ण उद्भुतः ।
कवितानुरञ्जनरमाकरोऽघहृत् ॥ ५६ ॥

सत्योदकारः शौरिर्नकारः च तृतीयतुर्येति ऊकारः ऋकारश्च एतेचत्वारोऽर्णाः प्रत्येकं शिखीरेफः वामनेत्रमीकारः शशिखण्डोबिन्दुः एतैः शोभनाः संवद्धाइत्यर्थः तथाच श्रीं श्रीं श्रीं श्रीं इति तदनु जय कृष्णेति त्रिपाठिगोविन्दमिश्रप्रभृतयः वस्तुतः जयकृष्णेति पदस्य युग्मं तदनु निरन्तरेति स्वरूपम् आत्मभूः ककारः शिखीरेफः शक्तिरीकारः तथा क्री स्वरूपं तदनु डस्वरूपं आस्यवृतमाकारः डास्वरूपं सक्त इति स्वरूपं प्रनिमध्यतः प्रनीति अक्षरयोर्मध्ये मुदितचेतसे इति ततो निशब्दान्ते त्येति स्वरूपं तदनु पस्वरूपं रक्तोरेफः इक् इकारः प्रथमाऽतिक्रमे कारणाभावात् ह्रस्व इकारो लभ्येत तथा च प्रिइति स्वरूपं ततो य इति स्वरूपं गुरुराकारः या इति स्वरूपं तदनु मारुतोयकारः तदनु सचतुर्थिकृष्णपदं कृष्णायेति स्वरूपं तदनु इक्षुकार्मुकः कामवीजं तदनु पूर्वोक्तदशाक्षरमन्त्रः तदनु लवोबिन्दुः तत्सहिता धरा ऐकारऐं इति स्वरूपम् अचलः पर्वतः तत्सुता पार्वती भुवनेश्वरीबीजमित्यर्थः रमाश्रीवीजम् एभिस्त्रिभिर्वीजैर्मन्त्रान्ते प्रतिलोमपठितैः ऐंह्रीं श्रीं अन्ते श्रींह्रींऐं इति समुद्गवत् सम्पुटवत् पुटितोऽयं द्विपञ्चाशदर्णो मन्त्रः सिद्धो भवति ।

मन्त्रवर्णसंख्यामाह—

इतीति ।

दन्त ३२ सूर्य १२ वसु ८ एभिर्मिलितैः संख्या द्विपञ्चाशद्वर्णात्मको मन्त्रो भवतीत्यर्थः कीदृशः कवितालोकानुरागलक्ष्मी सम्पादकः तथाऽघहत्यापहर्त्ता ॥ ५४ ॥ ५५ ॥ ५६ ॥

अस्य मन्त्रस्य ऋष्यादिकमाह—

मुखवृत्तेति ।

मुखवृत्तनन्दयुतनारदो मुनिः ।
छन्द उक्तमकृताद्रिकं विराद ॥

त्रिजगद्विमोहनसमाह्वयो हरिः ।
खलु देवताऽस्य मुनिभिः समीरिता ॥ ५७ ॥

मुखवृत्तमाकारः नन्देति स्वरूपम् आभ्यां युतो नारदः तथाच आनन्दनारदऋषिः अमृतादिकं विराट् छन्दस्त्रैलोक्यमोहनोहरि देवता नारदादिभिर्मुनिभिः कथिता ॥ ५७ ॥

अङ्गविधिंदर्शयति ।

वस्विमेति ।

वसुमित्रभूधरगजात्मदिङ्मयै-
र्मनुवर्णकैस्त्रिपुटसंस्थितैः पृथक् ॥
निजजातियुङ्निगदितं षडङ्गकम् ।
क्रिययैव तत्र खलु जनानुरञ्जनम् ॥ ५८ ॥

वसुः ८ मित्रः १२ भूधरः ७ गजः आत्मा १ दिक् १० एतत्सङ्ख्याकैर्मन्त्राक्षरैस्त्रिपुटसंस्थितैः तथाच ऐं ह्रीं श्रीं श्रीं श्रीं श्रीं श्रीं जयकृष्ण ऐं ह्रीं श्रीं हृदयानमः ऐं ह्रीं श्रीं जयकृष्ण-निरन्तरक्रीडासक्त ऐं ह्रीं श्रीं शिरसेस्वाहा इत्यादिक्रिययैव षडङ्गक्रिययैव सर्वजनानुरागं जनयति ॥ ५८ ॥

न्यासमाह—

अथेति ।

अथ संविशोध्य तनुमुक्तमार्गतः ।
विरचय्य पीठमपि च स्ववर्ष्मणा ॥
करयोर्दशाक्षरविधिक्रमान्न्यसेत् ।
स षडङ्गसायकमनङ्गपञ्चकम् ॥ ५९ ॥

अथानन्तरं तनुंशरीरम् उक्तमार्गतः पूर्वोक्तभूतशुद्ध्याप्रकारेण संशोध्याऽनन्तरं स्ववर्ष्मणा स्वशरीरेण पीठमारचय्य करयोः करयुगलेदशाक्षरोक्तप्रकारेण षडङ्गम् अङ्गषट्कं सायकान् च शोषणादीन् बाणान् अनङ्गपञ्चकं कामबीजमन्मथकन्दर्पमकरध्वज-मनोभूतसंज्ञकं कामपञ्चकं न्यसेत् ॥ ५९ ॥

इममेवार्थं विविच्य दर्शयति—

मनुनेति ।

मनुना त्रिशो न्यसतु सर्वतस्तनौ ।
स्मरसम्पुटैस्तदनु मातृकाक्षरैः ॥
दशतत्वकादिदशवर्णकीर्त्तितं-
त्वथ मूर्तिपञ्जरवसानमाचरेत् ॥ ६० ॥

मनुना मूलमन्त्रेण पूर्वं शरीरे त्रिव्यापकङ्कुर्यात् तदनन्तरं प्रतिवर्णं कामबीजपुटितैर्मातृकाक्षरैः त्रिशो न्यसतु दशवर्णकीर्तितं दशाक्षरोक्तदशतत्वादिकान् न्यसेत् तत्त्वन्यासादि मूर्त्ति-पञ्जरान्तं विन्यस्य ॥ ६० ॥

सृजतिस्थिती दशषडङ्गसायकान् ।
न्यसतात्ततोऽन्यदखिलं पुरोक्तवत् ॥
प्रविधाय सर्वभुवनैकसाक्षिणं-
स्मरतान्मुकुन्दमनवद्यधीरधीः ॥ ६१ ॥

सृष्टिस्थिती समाचरेत् दशाङ्गानि षडङ्गानि वाणांश्च देहे विन्य-सेत् तदनन्तरम् आत्मार्चनाद्यखिलं पूर्ववत् कृत्वा सकललोकद्रष्टा-रं श्रीकृष्णं स्मरतात् चिन्तयतु निर्मलास्थिराबुद्धिर्यस्य स तथा तादृशः साधकः ॥ ६१ ॥

ध्यानमाह—

अथेति ।

अथ भूधरोदधिपरिष्कृते महो-
न्नतशालगोपुरविशालवीथिके ॥
घनचुम्व्युदग्रसितसौधसङ्कुले ।
मणिहर्म्यविस्तृतकपाटवेदिके ॥ ६२ ॥

अथानन्तरं स्वकेपुरे मणिमण्डपे सुरपादपस्य कल्पवृक्षस्या ऽधो मणिमयभूतले परिस्फुरत् पृथुसिंहवक्त्रचरणाम्बुजासने स्थूलसिंह-

मुद्राकारपादान्वितपीठपद्मासने समुपविष्टमच्युतम् अभिचिन्तयेत्। कीदृशेपुरे भूधराः पर्वताः उदधिः समुद्रः एतैः परिष्कृतेवेष्टिते तथा महोन्नतः अत्युच्चः शालः प्रकारोगोपुरं बहिर्द्वारं च यत्र तस्मिन् तथा विशालामहती वीथिका पन्थाः यत्र तत्र कर्मधारयः तथा मेघस्पर्शिअतिशुद्धधवलगृहव्याप्ते तथा मणिमयगृहे विस्तीर्णाः कपाटाः तथा वेदिका परिष्कृतभूमिर्यत्र तत्र ॥ ६२ ॥

पुनः कीदृशेपुरे—

द्विजभूपविट्चरणजन्मनां गृहै-
र्विविधैश्च शिल्पिजनवेश्मभिस्तथा ॥
इभसप्त्युरभ्रखरधेनुसैरिभ-
च्छगलालयैश्च लसितैः सहस्रशः ॥ ६३ ॥

सहस्रशोलोकैर्ब्राह्मणक्षत्रियवैश्यशूद्राणां नानाप्रकारगृहैः तथा शिल्पिजनानां गृहैस्तथा हस्त्यश्वमेषगर्दभधेनुमहिषच्छगलानां गृहैः शोभिते ॥ ६३ ॥

पुनः कीदृशे—

विविधापणाश्रितमहाजनाहृत-
क्रयविक्रयद्रविणसञ्चयाञ्चिते ॥
जनमानसाहृतिविदग्धसुन्दरी-
जनमन्दिरैः सुरुचिरैश्च मण्डिते ॥ ६४ ॥

नानाप्रकारविपणिसमाश्रिते महाजनाहृतक्रयविक्रयद्रविणसंचयव्याप्ते

पुनः कीदृशे

जनानां चित्तापहरणेचतुराः येवेश्याजनास्तेषां गृहैः शोभमानैरलंकृते ॥ ६४ ॥

पुनः कीदृशेपुरे।

पृथुदीर्घिकेति।

पृथुदीर्घिकाविमलपाथसिस्फुर-
द्विकचारविन्दमकरन्दलम्पटैः ॥

वरहंससारसरथाङ्गनामभि-

र्विहगैर्विघुष्टककुभि स्वके पुरे ॥ ६५ ॥

स्थूलसरोवरनिर्म्मलोदके देदीप्यमानविकासितकमलमकरन्दा-स्वरसलोलुपैः श्रेष्ठहंससारसचक्रवाकसंज्ञकैः पक्षिभिर्ध्वनिता दिशो यस्मिन् ॥ ६५ ॥

पुनः कीदृशेमणिमण्डपे—

पुनः कीदृशे ।

सुरपादपैः सुरभिपुष्पलोलुप-

भ्रमराकुलैर्विविधकामदैर्नृणाम् ॥

शिवमन्दमारुतचलच्छिखैर्वृते-

मणिमण्डपे रविसहस्रसप्रभे ॥ ६६ ॥

कल्पवृक्षैः सुगन्धिपुष्पलुब्धभ्रमरव्याप्तैः मनुष्याणां विविधकामदैः शुभमन्दमारुतचलदग्रभागैः तैर्वेष्टिते ।

सूर्यसहस्रसमानप्रभे ॥ ६६ ॥

पुनः कीदृशे—

मणीति ।

मणिदीपिकानिकरदीपितान्तरे ।

तनुचित्रविस्तृतवितानशालिनि ॥

ललिते पिकस्वरविचित्रदामभिः ।

सुसुगन्धि गन्धसलिलोक्षितस्थले ॥ ६७ ॥

मणिरेवदीपिका तस्याः समूहैः प्रकाशितमध्यभागे ।

पुनः कीदृशे

सूक्ष्मविचित्रविस्तीर्णचन्द्रातपयुक्ते ।

पुनः कीदृशे

विकासितनानाप्रकारपुष्पमालाभिः शोभिते अतिसुरभिसलिलासिक्तस्थाने ॥ ६७ ॥

पुनः कीदृशे ॥

प्रमदेति—

प्रमदाशतैर्मदविघूर्णितेक्षणै-
र्मदजालसैः करविलोलचामरैः ॥
अभिसेविते स्खलितमञ्जुभाषितैः ।
स्तनभारभङ्गुरकृशावलग्नकैः ॥ ६८ ॥

स्त्रीशतैर्मदविघूर्णितनेत्रैर्मदजनिताऽलस्यसहितैः हस्तस्थितचञ्चलचामरैः ईषत्स्खलितमनोहरवचनैः स्तनभारनम्रसूक्ष्ममध्यप्रदेशैः परितः सेविते ॥ ६८ ॥

कथंभूतस्य सुरपादपस्य—

अविरामधारमणिवर्य्यवर्षिणः ।
अमहानिदामृतरसच्युतोऽप्यधः ॥
सुरपादपस्य मणिभूतलोल्लसत्-
पृथुसिंहवक्त्रचरणाम्बुजासने ॥ ६९ ॥

अविश्रान्तमणिश्रेष्ठधारावर्षिणः ।

पुनः कीदृशस्य ।

अमहानिकरामृतरसश्राविनः ॥ ६९ ॥

कीदृशमच्युतम्—

अभिचिन्तयेत्सुखनिविष्टमच्युतं-
नवनीलनीररुहकोमलच्छविम् ॥
कुटिलाग्रकुन्तललसत्किरीटकं-
स्मितपुष्परत्नरचितावतंसकम् ॥ ७० ॥

नूतननीलोत्पलरम्यकान्तिम् ।

पुनः कीदृशं—

कुटिलाग्रकेशेषुस्फुरत् किरीटंयस्यतम् ।

पुनः कीदृशं ।

स्मितम् ईषद्विकसितं पुष्पं रत्नानि च तैरचितोऽवतंसोयेनतम् ॥ ७० ॥

सुललाटसुन्नसमुदञ्चितभ्रुवं-
विपुलारुणायतविलोललोचनम् ॥
मणिकुण्डलांशुपरिदीप्तगण्डकं-
नवबन्धुजीवकुसुमारुणाधरम् ॥ ७१ ॥

तथा शोभमानललाटं—

तथा उन्नतनासिकम् उन्नतकुटिलभ्रूलताकं

तथा स्थूलारुणवर्णदीर्घचञ्चलनयनं तथा मणिमयकुण्डलकिरणपरिशोभितगण्डस्थलं तथा नूतनबन्धुजीवपुष्पसदृशाऽरुणाधरम् ॥ ७१ ॥

पुनः कीदृशं—

स्मितेति ।

स्मितचन्द्रिकोज्ज्वलितदिङ्मुखं स्फुर-
त्पुलकश्रमाम्बुकणमण्डिताननम् ॥
स्फुरदंशुरत्नगणदीप्तभूषणो-
त्तमहारदामभिरुपस्कृतांसकम् ॥ ७२ ॥

हासचन्द्रकिरणधवलीकृतदिङ्मुखं तथा स्फुरद्रोमाञ्चजन्यप्रस्वेदबिन्दुशोभितवदनम् ।

पुनः कीदृशं

स्फुरद्देदीप्यमानकिरणरत्नसमूहप्रकाशमानभूषणश्रेष्ठहारमालाभिःशोभितस्कन्धम् ॥ ७२ ॥

घनसारकुङ्कुमविलिप्तविग्रहं-
पृथुदीर्घवृत्तयभुजाविराजितम् ॥
तरुणाब्जचारुचरणाब्जमङ्गजो-
न्मथिताङ्गमङ्कगकराम्बुजद्वयम् ॥ ७३ ॥

पुनश्चन्दनकुङ्कुमाभ्यां परिलिप्तशरीरं पुनः स्थूलदीर्घद्वादश-

हस्तौ विराजितं तथा नूतनारुणवर्णपद्मसदृशचरणपद्मं पुनः कामपी-
डितदेहं पुनः स्वाङ्के आरोपितहस्तद्वयम् ॥ ७३ ॥

स्वाङ्कस्थभीष्मकसुतोरुयुगान्तरस्थम् ।
तां तप्तहेमरुचिमात्मभुजाम्बुजाभ्याम् ॥
श्लिष्यन्तमार्द्रजघनामुपगूहमाना-
मात्मानमायतलसत्करपल्लवाभ्याम् ॥ ७४ ॥

पुनः स्वाङ्के स्थितायाः रुक्मिण्या ऊरुद्वयाभ्यन्तरे विद्यमानं पुन-
स्तां रुक्मिणीं तप्तसुवर्णकान्तिं स्वीयहस्तपद्माभ्यामालिङ्गन्तं की-
दृशीं ताम् आर्द्रजघनां पुनरात्मानं श्रीकृष्णं दीर्घमनोहरपाणिपल्ल-
वाभ्याम् आलिङ्गन्तीम् ॥ ७४ ॥

आनन्दोद्रेकनिघ्नां मुकुलितनयनेन्दीवरां स्रस्तगात्रीं-
प्रोद्यद्रोमाञ्चसान्द्रश्रमजलकणिकामौक्तिकालंकृताङ्गीम्
आत्मन्यालीनबाह्यान्तरकरणगणामङ्गकैर्निस्तरङ्गै-
र्मज्जन्तीं लीननानामतिमतुलमहानन्दसन्दोहसिन्धौ ७५

पुनः स्वात्मानन्दोद्रेकव्याप्तां पुनः मुद्रितनयननीलोत्पलां पुनः
प्रोद्यत्तनुपुलकजन्यनिविडप्रस्वेदबिन्दुरूपमौक्तिकशोभितदेहां पुनः
आत्मनि श्रीकृष्णे सम्यग्विलीनबाह्याभ्यन्तरेन्द्रियसमूहां पुनर्व्या-
पाररहितैः शरीरावयवैरतिशयितमहानन्दसमूहसागरे निमग्नां पुनः
विगतचञ्चलमतिम् ॥ ७५ ॥

पुनः कीदृशं परमेश्वरम्—

सत्याजाम्बवतीभ्यां-
दिव्यदुकूलानुलेपनाभरणाभ्याम् ॥
मन्मथशरमथिताभ्यां-
मुखकमलचञ्चललोचनभ्रमराभ्याम् ॥ ७६ ॥

सत्यभामाजाम्बवतीभ्यामालिङ्गितं कथंभूताभ्याम् उत्कृष्टानि प-
ट्टवस्त्रानुलेपनाभरणानि ययोस्ताभ्यां पुनः कामशरपीडिताभ्यां पुनः

कृष्णमुखविषयकचञ्चलनेत्रभ्रमराभ्याम् ॥ ७६ ॥

भुजयुगलाश्लिष्टाभ्यां-
श्यामारुणललितकोमलाङ्गलताभ्याम् ॥
आश्लिष्टमात्मदक्षिण-
वामगताभ्यां करोल्लसत्कमलाभ्याम् ॥ ७७ ॥

पुनः परमेश्वरस्य भुजयुगलेनाऽऽलिङ्गिताभ्यां—

यथाक्रमनीलारुणवर्णमनोहरे कोमले चाऽङ्गलते ययोस्ताभ्यां पुनः परमेश्वरस्य दक्षिणवामगताभ्यां पुनः पाणिस्फुरितपद्माभ्याम् ॥ ७७ ॥

पुनः कीदृशम् ।

पृष्ठगया कलिन्दसुतया करकमलयुजा ।
सम्परिरब्धमञ्जनरुचा मदनमथितया ॥
पद्मगदारथाङ्गदरभृद्भुजयुगलं-
दोर्द्वयसक्तवंशविलसन्मुखसरसिरुहम् ॥ ७८ ॥

परमेश्वरपृष्ठदेशवर्त्तिन्या यमुनयाहस्तधृतकमलया समालिङ्गितं किम्भूतया श्यामया पुनः कामपीडितया ।

पुनः कीदृशं परमेश्वरं

पद्मगदाशङ्खचक्रयुक्तहस्तचतुष्टयं हस्तद्वयधृतवंशविलसन्मुखकमलम् ॥ ७८ ॥

दिक्ष्विति ।

दिक्षु बहिः सुरर्षिपतिभिः खचरपरिवृढै-
र्भक्तिभरावनम्रतनुभिःस्तुतिमुखरमुखैः ॥
सन्ततसेव्यमानममनोवचनविषयक-
मर्थचतुष्टयप्रदममुंत्रिभुवनजनकम् ॥ ७९ ॥

तृतीयपटलोक्तक्रमेणेत्यर्थः ।

पुनः बहिर्दिक्षु देवर्षियतिभिः खेचरमुख्यैर्भक्त्यातिशयनम्रदेहैः ।

परिवृढैः प्रधानैः स्तुतिभिः वाचालवदनैर्निरन्तरं सेवितं पुनः मनसो-वाचामगोचरं पुनर्धर्मार्थकाममोक्षफलचतुष्टयप्रदं पुनस्त्रैलोक्यजनकम् ॥ ७९ ॥

सान्द्रानन्दमहाब्धिमग्नममले धाम्नि स्वके ऽवस्थितम् ।
ध्यात्वैवं परमं पुमांसमनघात्संप्राप्य दीक्षां गुरोः ॥
लब्ध्वाऽमुं मनुमादरेण सितधीर्लक्षं जपेद्योषिताम् ।
वार्त्ताकर्णनदर्शनादिरहितो मन्त्री गुरूणामपि ॥८०॥

पुनः निविडानन्दमहासमुद्रमग्नम् ।

स्वीयेनिर्मलेतेजसितद्रूपेणाऽवस्थितम् एवमुक्तरूपं परमेश्वरं विचिन्त्य निष्पापात् गुरोर्दीक्षामन्त्रोपदेशविधिं प्राप्याऽमुंमन्त्रं लब्ध्वा तीक्ष्णबुद्धिः आदरात् लक्षमेकं जपेत् ।

कीदृशः साधकः स्त्रीणां वृद्धानामपि कथाश्रवणनिरीक्षणपराङ्मुखः ॥ ८० ॥

होमं सेवां चाऽऽह—

जुहुयादिति ।

जुहुयाच्च दशांशकं हुताशे ।
ससिताक्षौद्रघृतेन पायसेन ॥
प्रथमोदितपीठवर्यकेऽमुं-
प्रयजेन्नित्यमनित्यताविमुक्त्यै ॥ ८१ ॥

हुताशे वह्नौ दशांशकम् । अयुतमेकं शर्करामधुघृतयुक्तेन परमान्नेन जुहुयात् किञ्च पूर्वोक्तदशाष्टादशाक्षरकथिते पीठश्रेष्ठे नित्यममुं यजेत् किमर्थम् अनित्यः संसारस्तस्य परिहरणाय ॥ ८१ ॥

आरभ्याऽथ विभूतिन्यासक्रमतः शरान्तमभ्यर्च्य ।
मूर्त्यावङ्गान्तं चात्मानं विंशत्यर्णोदितमन्त्रवरे ॥८२॥
मध्येबीजं परितो वरुणेन्दुयमेन्द्रदिक्षु संलिख्य ॥
बीजचतुष्कं तदपि चत्वारिंशद्भिरक्षरैर्युग्मिकैः ॥८३॥

शिष्टैः प्रवेष्टय शिवहरि-
वस्वाग्निष्वथ क्रमाल्लिखेत् ॥
वाग्भायाश्रीमन्त्रास्तद्वद्रक्षोम्बुपानिलाग्निषु च॥८४॥
शेषं पूर्वोदितवद्विधाय पीठं यथा वदभ्यर्च्य ॥
सङ्कल्प्य मूर्त्तिमत्रा-
ऽऽवाह्याऽभ्यर्चयतु मध्यवीजे तम् ॥ ८५ ॥

आरभ्येत्यादि विभूति पञ्जरमारभ्य
न्यास क्रमेणवाणपर्यन्तं पूजयित्वा-
'मूर्त्तिन्यासमारभ्याऽङ्गन्यासपर्यन्तं चात्मरूपं सम्पूज्य पूर्वोक्तविंशत्यक्षरमन्त्रोक्तयन्त्रश्रेष्ठकर्णिकामध्यस्थितवह्निपुरयुगमध्ये मध्यमवीजमध्ये वीजमिति पाठस्वरसात् हृल्लेखावीजमिति रुद्रधरगोविन्दमिश्रप्रभृतयः परस्थमध्यमवीजमिति लगति मध्यमवीजंवाग्भवादिवीजत्रयमध्यस्थितंमारवीजमितिपाठेकामवीजं विलिख्य तत्परितश्च पश्चिमोत्तरपूर्वदक्षिणदिक्षु वीजचतुष्कं ह्रींश्रीं जीं श्रीं इति वीजचतुष्टयं विलिख्य तदपिवीजचतुष्टयं द्विचत्वारिंशत्जपादिस्वाहान्तैः शिष्टैर्मन्त्राक्षरैरुपरिवेष्टयेत् अनन्तरं शिवईशानः हरिरिन्द्रः पूर्वादिदिगित्यर्थः वसुरग्निः आग्नेयादिक एवं नैर्ऋतीवारुणीवायवीदिग् एतेषुकोणेषु क्रमेणवाग्भवभुवनेश्वरीश्रीवीजानि त्रिरावृत्य विलिखेत्

अवशिष्टं पीठविधानं पूर्ववत् समाप्यपीठं यथावत् पूजयित्वा-तत्रपीठेकर्णिकामध्यस्थितकामवीजे रुक्मिणीवल्लभमूर्त्तिं सङ्कल्प्य ध्यात्वातमावाह्य पूजयेत् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

मुखदक्षसव्यपृष्ठगवीजेष्वर्च्यास्तु शक्तयः क्रमशः॥
रुक्मिण्याद्याः षट्स्वथ-
कोणेष्वङ्गानि केशरेषु शरान् ॥ ८६ ॥

अनन्तरंदेवस्य सन्मुखदक्षिणवामपृष्ठप्रदेशगतेषु वीजचतुष्टयेषु रुक्मिण्याद्याः शक्तयः पूज्याः षट्कोणेषु अङ्गानि केशरेषु शरान् पूजयेत् ॥ ८६ ॥

लक्ष्म्याद्या दलमध्येष्वग्न्यादिषु तद्बहिर्ध्वजप्रमुखान्।
अग्रे केतुं श्यामं पृष्ठेविपमरुणममलरक्तरुची ॥८७॥
पार्श्वद्वये निधीशौ-
सन्ततधाराभिवृष्टघनपुञ्जौ ॥
हेरम्बशास्तृदुर्गाविष्वक्सेनान् विदिक्षु बहुधादि ॥८८॥
विद्रुममरकतदूर्वास्वर्णाभान् बहिरथेन्द्रवज्राद्यान्॥
यजनाविधानमितीरित-
मावृतिसप्तकयुतं मुकुन्दस्य ॥ ८९ ॥

अग्न्यादिपत्रमध्येषु लक्ष्म्याद्याः पूज्याः ।

यत्रबहिर्भागेष्वजप्रभृतीन् पूजयेत् अनन्तरं देवस्य सन्मुखे श्यामवर्णकेतुनामानंगणं पूजयेत्देवपृष्ठभागे अरुणवर्णं गरुडं पूजयेत् देवपार्श्वद्वयेनिर्मलरक्तरुचौनिधीश्वरौ पूज्यौ कहिशौनिरन्तरधाराभिवृष्टघनसमूहौ ।

बन्ह्यादिविदिक्षुहेरम्बादीन् प्रवालादिवर्णान् पूजयेत् अनन्तरं वाहिर्दिक्षु इन्द्रादिलोकपालान् तथा वज्राद्यायुधानि पूजयेत् इति पूर्वोक्तप्रकारेण मुकुन्दस्य श्रीकृष्णस्याऽऽवरणसप्तकं पूजाविधानं कथितम् इति ॥ ८७ ॥ ८८ ॥ ८९ ॥

इतीति—

इत्यर्चयन्नच्युतमादरेण ।
योऽमुं भजेन्मन्त्रवरं जितात्मा ॥
सोऽभ्यर्च्यते दिव्यजनैर्जनानां-
हृन्नेत्रपङ्केरुहतिग्मभानुः ॥ ९० ॥

इति अमुनाप्रकारेण यो जितेन्द्रियो अच्युतं कृष्णं भक्त्या पूजयन् अमुंमन्त्रश्रेष्ठं सेवते सपुरुषः सुरैरपि पूज्यते कीदृशः लोकानां हृदयपद्मलोचनपद्मयोः सूर्यः सर्वजनवशीकरणमन्त्रः समर्थइत्यपि पाठः ॥ ९० ॥

सितेति—

सितशर्करोत्तरपयःप्रतिपत्त्या ।
परितर्पयेद्दिनमुखे दिनशस्तम् ॥
सलिलैः शतं शतमखाश्रियमेष-
स्वाधिभूत्युदन्वति करोत्युदबिन्दुम् ॥ ९१ ॥

सितशर्कराप्रधानप्रतिपत्त्या दुग्धबुद्ध्या जलैरेव दिनमुखे प्रातःकाले प्रतिदिनं शतकृत्वस्तं तर्पयेत् अनन्तरं साधकः स्वाधिपत्यसमुद्रे इन्द्रस्य लक्ष्मीं जलबिन्दुवत् करोति ॥ ९१ ॥

विदलदिति—

विदलद्दलैः सुमनसः सुमनोभि-
र्घनसारचन्दनबहुद्रवमग्नैः ॥
मनुनाऽमुना हवनतोऽयुतसंख्यं-
त्रिजगत् प्रियः स मनुवित्कविराट् स्यात् ॥ ९२ ॥

अनेनमन्त्रेण सुमनसो जातीमालतीनामधेयस्य सुमनोभिः पुष्पैः विकसि ।
तैः कर्पूरयुक्तचन्दनस्य बहुद्रवव्याप्तैरयुतसंख्यं हवनतोऽयुतहोमेन सः मन्त्री त्रैलोक्यस्य प्रियः कविश्रेष्ठश्च भवति ॥ ९२ ॥

ध्यानेति—

ध्यानाद्देवाऽस्य सद्यस्त्रिदशमृगदृशोवश्यतांयान्त्यवश्यं-
कन्दर्पार्त्ताजपाद्यैः किमथ न सुलभं मन्त्रतोऽस्मान्नरस्य ॥
स्पर्द्धामुद्धूय चित्रं महदिदमपि नैसर्गिकींशश्वदेनं-
सेवेतेमन्त्रिमुख्यंसरसिजनिलयावाऽपिवाचामधीशा ॥ ९३

अस्यरुक्मिणीवल्लभस्य ध्यानात् शीघ्रंत्रिदशमृगदृशः देवाङ्गना अवश्यं वश्यतामायत्तां प्राप्नुवन्ति कथंभूताः कामपीडिता अथानन्तरं जपहोमादिना ऽस्मात् मन्त्रात् साधकस्य किं न सुलभम् अपितु सर्वमेवसुलभमित्यर्थः किञ्चेदमपि महच्चित्रं यत्सरसिज-

निलया लक्ष्मीः वाचामधीशा सरस्वती च स्वाभाविकीमसूयां त्यक्त्वा नित्यमेनं साधकश्रेष्ठं सेवेते ॥ ९३ ॥

आधीति—

आधिव्याधिजरापमृत्युदुरितैर्भूतैः समस्तैर्विषै-
र्दौर्भाग्येन दरिद्रतादिभिरसौ दूरं विमुक्तश्चिरम् ॥
सत्पुत्रैः सुसुतासुमित्रनिवहैर्जुष्टोखिलाभिः सदा ।
सम्पद्भिः परिजुष्ट इडितयशा जीवेदनेकाः समाः॥९४॥

किञ्च मनोदुःखरोगजरापमृत्युशोकशून्यः सकलप्राणिभिर्विषैः तथा दुरदृष्टेन तथा दरिद्रतादिभिरतिशयेन परित्यक्तो बहुकालं व्याप्यविशिष्टपुत्रसमेतः सत्पुत्रीमित्रसमूहेनसेवितः सदासमृद्धः ईडितयशाः स्तुतयशाः असौसाधकः अनेकाः समा हायनानि जीवेत् ॥ ९४ ॥

मन्त्रान्तरेभ्योऽस्याऽतिशयित्वमाह—

अखिलेति ।

अखिलमनुषु मन्त्रा वैष्णवा वीर्यवन्तो ।
महिततरफलाढ्यास्तेषु गोपालमन्त्राः ॥
प्रबलतर इहैषांऽमीषु संमोहनाख्यो-
मनुरनुपमसम्पत्कल्पनाकल्पशाखी ॥ ९५ ॥

सर्वेषुमन्त्रेषुवैष्णवमन्त्रा अतिशयेन सवीर्याः तेष्वपिवैष्णवमन्त्रेषुगोपालमन्त्रा अतिपूजितफलयुक्ताः तेष्वपिगोपालमन्त्रेषु एषसंमोहनाख्यमन्त्रः प्रबलतरः प्रकृष्टबलयुक्तः पुनः निरुपमैश्वर्यदानैककल्पवृक्षः ॥ ९५ ॥

मन्विति—

मनुमिममतिहृद्यं यो भजेद्भक्तिनम्रो-
जपहुतयजनाद्यैर्ध्यानवान्मन्त्रिमुख्यः ।
त्रुटितसकलकर्मग्रन्थिरुद्बुद्धचेताः ।
व्रजति स तु पदं तन्नित्यशुद्धं मुरारेः ॥ ९६ ॥

योमन्त्रिमुख्यः साधकश्रेष्ठः ध्यानयुक्तः भक्त्या आराध्यस्व-ह्ना मेव इमं मन्त्रं मनोहरं जपध्यानहोमादिभिर्भजेत् स मुरारेस्तत्प्र-सिद्धं पदं व्रजति प्राप्नोति मुरा अविद्या तस्यानाशकस्य पदं कीदृशं-पदम् अविनाशि सर्वकालुष्यरहितं स कीदृशः विनाशितसकलक-र्मबन्धनः पुनः कीदृशः उद्बुद्धचेता वस्तुग्रहणोन्मुखचित्तः ॥ ९६ ॥

अथ योगमाह—

अङ्गीकृत्येति ।

अङ्गीकृत्यैकमेषां मनुमथ जपहोमार्चनाद्यैर्मनूना-
मष्टाङ्गोत्सारितारिः प्रमुदितपरिशुद्धप्रसन्नान्तरात्मा ॥
योगीयुञ्जीतयोगान्समुचितविहृतिस्वप्नबोधाहृतिःस्यात्
प्रागास्यश्चासने स्वे सुमृदुनि ससुखं मीलिताक्षो नि-
विष्टः ॥ ९७ ॥

एषांमनूनां मन्त्राणां मध्ये एकं मनुं मन्त्रजपहोमादिभिःस्वी-कृत्यवशीकृत्य अष्टाङ्गेन यमनियमासनप्राणायामप्रत्याहारध्यान-धारणासमाधिलक्षणेन उत्सारितास्त्यक्ताः कामक्रोधादयोऽरयो येन स तथा हर्षितनिर्मलप्रसन्नचित्तो योगी प्राग्वदनः सन् योगान् चित्तवृत्तिनिरोधादीन् करोतु कीदृशोयोगी यथोचितविहारनिद्रा-प्रबोधाहारः पुनः स्वकीयेसुकोमले आसनेसमुपविष्टः पुनः की-दृशः सुखेनाऽनायासेनसंमीलितेमुद्रिते अक्षिणीयेनसः ॥ ९७ ॥

विश्वमिति ।

विश्वं भूतेन्द्रियान्तःकरणमय-
मिनेन्द्वग्निरूपं समस्तं-
वर्णात्मैतत् प्रधानेकल नयनमये बीजरूपे ध्रुवेण ॥
नीत्वातत्पुंसि बिन्द्वात्मनि तमपि-
परात्मन्यथो कालतत्वे ।
तं वै शक्तो चिदात्मन्यपि नयतु च तां-
केवले धाम्नि शान्ते ॥ ९८ ॥

एतद्वर्णात्मकंसमस्तं विश्वंभूतेन्द्रियान्तःकरणरूपं सूर्येन्द्वग्निरूपं प्रधानेप्रकृतिरूपे कलनयनरूपेकामबीजे प्रणवेन नीत्वा तत्र विलीनं विचिन्त्य तत्कामबीजं विन्द्वात्मनिप्रसिद्धेऽनुस्वाराख्ये तमपिविन्द्वात्मानं नादाख्येकालतत्वे परमात्मनि संहरेत् तमपिकालतत्वं चिद्रूपायां शक्तौ संहरेत्तामपि शक्तिं केवलेतेजोमयेस्वप्रकाशेधाम्नितेजसिशान्तेसर्वोपद्रवरहिते नयतु ॥ ९८ ॥

कीदृशे—

निर्द्वन्द्वे निर्विशेषे निरतिशय-
महानन्दसान्द्रेऽवसानाऽ-
पेतेऽर्थे कृष्णपूर्वामलरहितगिरां-
शाश्वते स्वात्मनीत्थं ॥
संहृत्याऽभ्यस्य बीजोत्तममथ-
शनकैर्लीननिश्वासचेताः ।
प्रक्षीणापुण्यपुण्यो निरुपमपर
संवित्स्वरूपः स भूयात् ॥ ९९ ॥

निर्द्वन्द्वेशीतोष्णादिद्वन्द्वविशेषरहिते विशेषोवैधर्म्यंतद्रहिते अत्यन्तानन्दघने अनन्तेकृष्णगोविन्दादिनिर्मलशब्दानां प्रतिपाद्ये आत्मस्वरूपे इत्थम् अमुना प्रकारेणसंहृत्य संहारं कृत्वा कामबीजं जपन् अथानन्तरं स्वयमेव निश्चलश्वासचित्तोभूत्वा प्रक्षीणपापपुण्यश्च भूत्वा स योगी निरूपमः परमसंविन्मयो भवति ॥ ९९ ॥

मूलेति—

मूलाधारे त्रिकोणे तरुणतरणिभा-
भास्वरे विभ्रमन्तं-
कामं बालार्ककालानलजठर-
कुरङ्गाङ्ककोटिप्रभाभम् ॥
विद्युन्मालासहस्रद्युतिरुचिर-
हसबन्धुजीवाभिरामं-

त्रैगुण्याक्रान्तबिन्दुं जगदुदय-
लयैकान्तहेतुं विचिन्त्य ॥ १०० ॥

त्रिकोणात्मके मूलाधारे उद्यदादित्यवत् प्रकाशमाने भ्रममाणं कामबीजं नूतनादित्यप्रलयकालीनवह्निचन्द्रकोटितुल्यकान्ति पुन स्तडिन्मालासहस्रकान्ति पुनः नूतनपुष्पितबन्धूकवन्मनोहरं सत्वादिगुणत्रयेण व्याप्तोऽनुस्वारसंज्ञको बिन्दुर्येन तं पुनः विश्वोत्पत्तिनाशैककारणम् ॥ १०० ॥

तस्येति—

तस्योर्द्ध्वे विस्फुरन्तीं स्फुटरुचिरतडित्पुञ्जभाभास्वराभा-
मुद्गच्छन्तीं सुषुम्णासरणिमनुशिखामाललाटेन्दुबिम्बम् ॥
चिन्मात्रां सूक्ष्मरूपां कलितसकलविश्वां कलां नादगम्यां-
मूलं या सर्वधाम्नां स्मरतु निरुपमां हुंकृतोदञ्चितेरः १०१

तस्य कामबीजस्यउपरि बिन्दुगतकुण्डलिनीं शक्तिं दीप्यमानां चिन्तयतु किंभूतां प्रव्यक्तमनोहरविद्युत्सहस्रवत् प्रकाशमानकान्ति पुनः ललाटचन्द्रबिम्बान्तं सुषुम्णारन्ध्रं यान्तीं पुनः अनु शनुगता बीजगतबिम्बात्मकेवह्निशिखाज्वालायस्यां सा तथातां पुनः किम्भूतां चित्स्वरूपां पुनः दुर्लक्षां पुनरात्तसकलविश्वां पुनः कलारूपां पुनर्नादानुमेयां पुनः सर्वतेजसां मूलभूतां कीदृशोऽधिकारी हुंकारेण उदञ्चित उर्द्ध्वमुत्पादित इरोवायुरपानाख्यो येनसतथा ॥ १०१ ॥

नीत्वेति—

नीत्वातां शनकैरधोमुखसहस्रारारुणाब्जोदर-
द्योतत्पूर्णशशाङ्कबिम्बममुतः पीयूषधारास्रुतिम् ॥
रक्तां मन्त्रमयीं निपीय च सुधानिस्यन्दरूपां विशे-
द्भूयोप्यात्मनिकेतनं पुनरपि प्रोत्थाप्यपीत्वा विशेत १०२॥

तां कुण्डलिनीं शक्तिं शनकैर्यथास्यादेवमधोमुखसहस्रदलारुणकमलमध्यद्योतमानपूर्णचन्द्रमण्डलं नीत्वा अस्माच्चन्द्रवि-

स्वात् अमृतधारावृष्टि रक्तवर्णां वर्णात्मिकाम् अमृतस्रवरूपां पाययित्वा आत्मनिकेतनं मूलाधारे प्रवेशयेत् भूयोऽनन्तरमपि तथैव तामुत्थाप्य तथा कृत्वा पुनस्तस्या निजस्थानं प्रापयेदिति ॥ १०२ ॥

एतादृशाभ्यासस्य फलमाह—

य इति ।

योऽभ्यस्यत्यनुदिनमेवमात्मनोऽन्तं-
बीजेशं दुरितजरापमृत्युरोगान् ॥
जित्वाऽसौ स्वयमिव मूर्त्तिमाननङ्गः ।
संजीवेच्चिरमलिनीलकेशपाशः ॥ १०३ ॥

यः प्रत्यहमनेन प्रकारेण शरीरमध्ये कामबीजमभ्यस्यति आत्मनोऽन्तं मनोलयान्तमिदमभ्यस्यतीति क्रियाविशेषणम् असौ साधकः दुरितजरापमृत्युरोगान् पराभूय स्वयमेव देहधारिकन्दर्पो भूत्वा चिरकालं जीवति कीदृशो भ्रमरवर्णवत् श्यामकेशसमूहः ॥ १०३ ॥

स्फुटेति—

स्फुटमधुरपदार्णश्रेणिरत्यद्भुतार्था ।
झटितिवदनपद्माद्विस्फुरत्यस्य वाणी ॥
अपि च सकलमन्त्रास्तस्य सिध्यन्ति मङ्क्षु ।
व्युपरमघनसौख्यैकास्पदं वर्तते सः ॥ १०४ ॥

अस्य साधकस्य मुखकमलाच्छीघ्रं सरस्वती प्रभवति किम्भूता प्रव्यक्तमनोहरपदवर्णसमूहात्मिका अत्याश्चर्यविषया किन्तु अस्य साधकस्य मङ्क्षु अन्येऽपि मन्त्राः सिध्यन्ति किञ्च स साधकः अविश्रान्तनिबिडसुखमात्रस्थानं भूत्वा तिष्ठति ॥ १०४ ॥

भ्राम्यदिति—

भ्राम्यन्मूर्त्तिर्मूलचक्रादनङ्ग-
स्वाभिर्भाभीरक्तपीयूषयुग्भिः ॥

विश्वाकाशं पूरयन्तं विचिन्त्य ।
प्रत्यावेश्यास्तत्र वश्याय साध्याः ॥ १०५ ॥
नार्यो नरो वा नगरी सभापि वा
प्रवेशितास्तत्र निशातचेतसा ॥
स्युः किङ्करास्तस्य झटित्यनारतं
चिराय तन्निघ्नधियो न संशयः ॥ १०६ ॥

मूलचक्रान्मूलाधारे अत्रसमन्वयर्थेपञ्चमी भ्रमणमूर्त्तिकामबीजं स्वकीयाभिर्दीप्तिभिर्लोहिताभूनयुक्ताभिर्ब्रह्माण्डमध्यप्रदेशं पूर्यमाणं ध्यात्वानिशातचेतसा तीक्ष्णमतिना तत्र नारीप्रभृतयः साध्या-वश्यार्थं प्रत्यावेश्याः प्रक्षेप्तव्या अनन्तरं तत्र प्रवेशिताः प्रवेशं प्रापिताः स्त्रीप्रभृतयस्तन्निमग्नाधियस्तेनहृतचित्ताः तस्यसाध-कस्यशीघ्रंचिरकालमाज्ञाकारिणो भवन्ति नाऽत्रसन्देहः ॥ १०५॥१०६॥

तरणीति—

तरणिदलसनाथे शक्रगोपारुणे यो-
रविशशिशिखिबिम्बप्रस्फुरच्चारुमध्ये ॥
हृदयसरसिजेऽमुं श्यामलं कोमलाङ्गं-
सुसुखमुपनिविष्टं तं स्मरेद्वासुदेवम् ॥ १०७ ॥

तत् द्वादशदलयुक्तेहृदयकमले इन्द्रगोपालाख्योरक्तकीटविशेषः तद्वदरुणे सूर्यवह्निचन्द्रमण्डलशोभितचारुमध्यप्रदेशे अमुंश्यामवर्णं कोमलाङ्गं सुकुमाराङ्गं सुखप्रकारेणोपविष्टं वासुदेवंचिन्तयेत् ॥१०७॥

पादाम्भोजेति—

पादाम्भोजद्वयेऽङ्गुल्यमलकिशलयेष्वावलौ सन्नखाना-
सत्कूर्मोदारकान्तौ प्रपदयुजि लसज्जङ्घिकादण्डयोश्च ॥
जान्वोरूर्वोः पिशङ्गे नववसनवरे मेखलादाम्निनाभौ ।
रोमावल्यामुदारोदरभुवि विपुले वक्षसि प्रौढहारे॥१०८॥

आदिपुंसः श्रीकृष्णस्य पादाम्भोजमारभ्यहसितान्तेषु स्थानेषु-वक्ष्यमाणेषुशनैर्यथा स्यात्तथा इति क्रमतः स्थानक्रमतः स्थानक्रमेण

स्वीयं मनः स्थापयतु तथा पादपद्मद्वये प्रथमं मनः स्थापयेत् तदनन्तरं पूर्वं पूर्वमपोह्याऽपरस्थानेषु मनो निदध्यात् अङ्गुल्य एवामलाकिशलया निर्मलपल्लवास्तेषु तदनु नखानां शोभमानपङ्क्तौ तदनु प्रपदयुजि पादद्वये कीदृशे कूर्मपृष्ठवदुपरिभागे उन्नते तदनु देदीप्यमानजङ्घाद्वये तदनु जानुद्वये ऊरुद्वये पीतवर्णे नूतनवस्त्रयोः श्रेष्ठ क्षुद्रघण्टिकामालायां नाभिप्रदेशतन्निष्ठरोमपङ्क्तौ च विपुलोदरस्थाने महाहारयुक्ते विस्तीर्णे वक्षसि ॥ १०८ ॥

श्रीवत्से कौस्तुभे च स्फुट कमललसद्वक्षहृद्दाम्नि बाहोर्मूले केयूरदीप्ते जगदवनपटौ दोर्द्वये कङ्कणाढ्ये ॥
पाणिद्वन्द्वाङ्गुलिस्थेऽतिमधुररवसंलीनविश्वे च वेणौ ।
कण्ठे सत्कुण्डलोस्त्रस्फुटरुचिरकपोलस्थलद्वन्द्वके च १०९

श्रीवत्से विप्रपादाघाततर्जन्योर्द्धरोमात्मके कौस्तुभे हृदयनिविष्टमणिविशेषे विकसितपद्ममालायां केयूरशोभितबाह्वोर्मूले संसाररक्षणदक्षे कङ्कणयुक्ते बाहुद्वये हस्तद्वयाङ्गुलिनिष्ठे अतिमधुरशब्देन मग्नं जगत्त्रयं येन एवंभूते वेणौ तदनु कण्ठे रम्यकुण्डलाकिरणप्रकाशितमनोहरकपोलस्थलयुगले ॥ १०९ ॥

कर्णद्वन्द्वे च घोणे नयननलिनयो र्भूविलासे ललाटे ।
केशेष्वालोलबर्हेष्वतिसुरभिमनोज्ञप्रसूनोज्ज्वलेषु ॥
शोणे विन्यस्तवर्णावधरकिशलये दन्तपङ्क्त्यां स्मिताख्ये ज्योत्स्नायामादिपुंसः क्रम इति च शनैः स्वं मनः संनिधत्ताम् ॥ ११० ॥

कर्णद्वये नासायुगले नेत्रपद्मद्वये भ्रूविक्षेपे ललाटे चञ्चलमयूरपुच्छयुक्तेषु अतिसुगन्धिमनोहरपुष्पोज्ज्वलेषु केशेषु शोणवर्णे आरोपितवर्णौ अधरपल्लवे दन्तपङ्क्त्यां स्मिताख्यज्योत्स्नायां स्मितमाख्यानाम यस्याः तस्यां ज्योत्स्नायां चन्द्रकान्तौ ज्योत्स्नातुल्यस्मिते ॥ ११० ॥

यावदिति ।

यावन्मनोविलयमेति हरेरुदार-

मन्दस्मितेऽभ्यसतु तावदनङ्गबीजम् ॥
अष्टादशार्णमथवाऽपि दशार्णकं वा ।
मन्त्री शनैरथ समाहितमातरिश्वा १११ ॥

हरेरुदारशोभमाने मन्दस्मिते मनो यावत् विलयं विशेषतो लयमेति तावदनङ्गबीजम् अष्टादशार्णं दशार्णं वा प्रजपतु किंभूतः समाहितमातरिश्वा प्रत्याहारीकृतप्राणवायुः ॥ १११ ॥

आरोप्येति ।

आरोप्यारोप्य मनः पदारविन्दादिमन्दहसितान्तम् ।
तत्र विलाप्यक्षीणे चेतसि सुखचित्सदात्मको भवति ११२

मनः पदारविन्दमारभ्य ईषद्धास्यपर्यन्तं समारोप्याऽनन्तरं तत्र विलाप्य लीनं कृत्वा क्षीणे शुद्धे चित्ते सति सुखज्ञानसदात्मको भवति साधकः ॥ ११२ ॥

न्यासेति ।

न्यासजपहोमपूजातर्पणमन्त्राभिषेकविनियोगानाम् ।
दीपिकयैव मयोद्भावितःक्रमःकृत्स्नमन्त्रगणकथि-
तानाम् ॥ ११३ ॥

कृष्णमन्त्रसमूहकथितानां न्यासजपादीनां क्रमदीपिकयैव क्रमः प्रकाशितः ॥ ११३ ॥

संशयेति ।

संशयतिमिरच्छिदुरा सैषा क्रमदीपिका करेण सद्भिः ।
करदीपिकेव धार्या सस्नेहमहर्निशं समस्तसुखाप्त्यै ११४

सैषा क्रमदीपिका साधुजनैःसस्नेहं यथा स्यात्तथाकरदीपिकेव धार्या किंभूता संशयरूपान्धकारच्छेदयित्री अन्यापि तैलादिस्नेहसहितं यथा स्यात्तथा धार्यते अन्धकारनाशिनी भवति किमर्थं धार्या समस्तसुखप्राप्त्यर्थम् ॥ ११४ ॥

जगदिदमनुविद्धं येन यस्मात्प्रसूते ।
यदनुततमजस्रं पाति चाऽधिष्ठिता यम् ॥

यदुरुमहदुदर्चिर्धे विधत्से च गोपी ।
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥ ११५॥

जगदिदमनुविद्धमनुस्यूतं येनज्योतिषा यस्मात्परमेश्वरात् इमं-जनलोकं संसाराख्यं प्रसूते प्रसूतिं प्राप्नोतीत्यर्थः यस्मिन्नित्यपि पाठः तथापरमेश्वरम् अधिष्ठातारमाश्रिता सती अनुततं विस्तृतं जगत् अजस्रं सर्वदा पातिरक्षति यस्य परमेश्वरस्य उरुविपुलं महःतेजः ततउदर्चिस्तत्तेजसाउदितदीप्तिः सती यं प्रतिबिम्बरूपेण धत्ते तमुक्तानन्दं स्वप्रकाशंनौमिस्तौमि ॥ ११५ ॥

यश्चक्रमिति—

यश्चक्रं निजकेलिसाधनमधिष्ठानस्थितोऽपि प्रभु-
र्दत्तं मन्मथशत्रुणाऽवनकृते व्यावृत्तलोकार्त्तिकम् ॥
धत्तेदीप्तनवेन शोभनमघापेतात्तमाद्यं ध्रुवं-
वन्देकायविमर्दनं वधकृतां भुञ्जद्दशुकं यादवम् ॥११६॥

इति श्रीमन्महामहोपाध्यायश्रीकेशवकाश्मीरिभट्ट-
गोस्वामिविरचितायां क्रमदीपिकायामष्टमः पटलः॥८॥

यः परमेश्वरः श्रीकृष्णः वक्ष्यमाणलक्षणं चक्रंधत्ते तं वन्देइत्यन्वयः कथंभूतं चक्रं निजकेलिसाधनं निजयुद्धक्रीडाकरणं कीदृशः परमेश्वरः अधिष्ठानस्थितोऽपि समाधिस्थितोऽपि यद्वा बाह्यस्थितोऽपि प्रभुः स्वामी पुनः कीदृशं चक्रं मन्मथशत्रुणामहादेवेन अवनेअवनकृतसर्वलोकरक्षार्थे दत्तं पुनः दूरीकृतातिवृष्ट्यनावृष्ट्याद्युपद्रवं पुनः दीप्तनवेन इवशोभनं देदीप्यमानं किंभूतं कृष्णं पापरहितं स्वीकृतमाद्यं पुनर्ध्रुवमविनाशिनं पुनर्वधकृतामुपद्रवकारिणांकायविमर्दनं शरीरनाशकं पुनः भुञ्जद्दशुकं भुञ्जत्स्वर्गलोकं पुनर्जात्यायादवमित्यर्थः अत्र पद्ये चक्रबन्धे ग्रन्थकर्तास्वनाम प्रक्षिप्तवानिति बोध्यम् ॥ ११६ ॥

इति श्रीगोविन्दविद्याविनोदभट्टाचार्यविरचिते क्रमदीपिकाविवरणेऽष्टमः पटलः समाप्तः ॥ ८ ॥

॥ श्रीः ॥

अथ ।

लघुस्तवराजस्तोत्रम् ।

श्रीवैष्णवाचार्य श्रीश्रीनिवासाचार्यविरचितम्-
श्रीहयग्रीवानुग्रहजीवितस्वभूदेवपदानन्याश्रित पुरुषोत्तमप्रसाद
वैष्णवविरचित गुरुभक्तिमन्दाकिन्याख्यव्याख्योपेतम् ।

श्रीकृष्णायनमः ।
श्रीगुरुचरणेभ्योनमः ।

वन्दे श्रीश्रीनिवासार्य्यं वेदान्ताम्बुजभास्करम ॥
प्रपन्नजनसन्त्राणलब्धदीक्षंजगद्गुरुम् ॥ १ ॥

इहखलु सकललोकस्य हितञ्चिकीर्षुर्भगवान्पाञ्चजन्यावतारो निरतिशयवात्सल्यकारुण्यादिगुणो निजाश्रितसंरक्षणलब्धदीक्षः श्रीश्रीनिवासाचार्याभिधो ब्रह्मरुद्रेन्द्रादिकिरीटैडितपादपीठवेदान्तकवैद्यपरब्रह्मादिशब्दाभिधेयश्रीपुरुषोत्तमाज्ञयाऽवनितलावतीर्णं जगदुद्दिधीर्षुं तदचिन्त्यानन्तशक्त्युपबृंहितानन्तशक्ति श्रीसुदर्शनावतारं नियमानन्दसमाख्यं ह्याद्याचार्यं निजगुरुं मिताक्षरेण स्तोत्रेण तुष्टाव. तस्य व्याख्यानं यथामति पदार्थमात्रेण निभाल्यते तत्प्रसादैकप्रयोजनेन,

जयजयेति-

जयजयेङ्गितज्ञाता नियमानन्द आत्मवान् ।
नियमेन वशे कुर्वन्भगवन्मार्गदर्शकः ॥ १ ॥

हेनियमानन्द त्वं जयजय स्वोत्कर्षमाविष्कुरु, आदरेवीप्सा, तत्र

शास्त्राचार्यसंस्कारशून्यान्कुतर्कनिष्ठान्नियमयति औपनिषद्मार्गेस्था-पयतीतिनियमः स्वाश्रितानानन्दयतीत्यानन्दः नियमश्चासावानन्द-श्चेतिनियमानन्दः यद्वा नियमेनदेशकालादिपरिच्छेदशून्येनानन्दो-यस्यसः सदासर्वत्रपरिपूर्णानन्दइत्यर्थः यद्वा चेतनाचेतनवस्तुजातं नियमयति स्वेस्वेकार्ये यथाधिकारं स्थापयतीतिनियमोविश्वान्तर्या-मीभगवाञ्छ्रीवासुदेवस्तस्मिन्नानन्दोयस्यसः श्रीपुरुषोत्तमस्वरूप-गुणादिविषयकानवच्छिन्ननिरतिशयानन्दाश्रयइत्यर्थः यद्वा निः शेषेणयमोनियमः निःशेषेणबुद्ध्यादीनामुपरमः समाधिः तेना-नन्दोयस्यसः सदासमाध्यानन्दपूर्णइत्यर्थः यद्वा निःशेषेणयमय-ति स्वाज्ञायां प्रवर्त्तयति जीवानितिनियमोवेदस्तस्यापिवेद-स्यानन्दोयस्मात्सथोक्तोनियमानन्दः वेदस्ययथार्थव्याख्यानंतत्प्रव-र्त्तनञ्चैवानन्दहेतुः तदर्थमेवास्यावतारत्वादित्यलं विस्तरेण तस्य संबोधनमेतत्, ।

तमेवविशिनष्टि ।

इङ्गितज्ञातेति ।

श्रीभगवत इङ्गितम् इदानीमेव तदाज्ञाकरणीयतया प्रवर्त्ततइति जानातीतिसः यद्वा जीवानामिङ्गितम् अनेनोपायेनाऽसौ कृतार्थः स्यात् असौ सकामः असौ निष्कामः असौ मायया मां भजति असौ श्रद्धाविश्वासार्जवादिना भजतीत्यादि तच्चेष्टितं जानातीति तथा चेष्टितस्य ज्ञातेति वा विग्रहः सर्वज्ञत्वात् ।

सर्वज्ञत्वेहेतुमाह —

आत्मवानिति ।

आत्माशब्दोऽत्र ब्रह्मवाचकः "तस्माद्वाएतस्मादात्मन आका-शः सम्भूत" इत्यादिश्रुतेः स प्रत्यक्षेणविद्यतेयस्यसः ब्रह्मज्ञएवस-र्वज्ञः "आत्मन्परेदृष्ट" इत्यादिश्रुतेः यद्वा आत्मानो जीवात्मानोऽन-वच्छिन्नानुभूतिविषयतया विद्यन्ते यस्य स तथोक्तः तच्चेष्टितज्ञा-नाभावेबोधकत्वासम्भवात् अतएव भगवन्मार्गदर्शकइति गु-रुर्वेदर्शकत्वनियमात् असौसद्योमोक्षाधिकारी असौचि-रकालेन साधनसंपत्त्या मोक्षभागी भविष्यति असौ भगवद्भागवत-द्वेष्टा नित्यसंसारी औपनिषदैरुपेक्षणीय इति ज्ञात्वैव तदनुसारेण तत्तत्साधनेषु स्थापयित्वा भगवदीयमार्गं दर्शयतीति तथा

"येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्या"मिति श्रुतेः किं कुर्वन् नियमेन वशीकुर्वन्निति नियमोऽत्र नियमनरूपसामर्थ्यविशेषः तेन तान् क्षेत्रज्ञान् वशीकुर्वन्वा ऽनुग्रहविषयीकुर्वन् यद्वा नियमेन शरीरवाङ्मनोव्यापाराणां देशकालादिपरिच्छेदशून्यतया भगवदाज्ञापालनात्मके परभक्तियोगे नियमनं नियमस्तेन श्रीहरिं वशीकुर्वन्नित्यर्थः भगवन्तं वशीकृत्वा तद्द्वारेण तेषां बुद्धिं प्रेरयित्वा भगवन्मार्गदर्शकस्तदुपदेष्टा भवतीति तात्पर्यार्थः अन्तःप्रेरणया विना तदन्तर्निष्ठाभावेनोपदेशमात्रस्य कार्यकारित्वायोगात् भगवन्मार्गोऽत्र साधनोपदेशक्रमस्तस्य दर्शकः यथाऽधिकारमुपदेष्टेतियावत् भगवन्मार्गोऽर्चिरादिमार्गो वा सन्वाऽध्यात्मसुधातरङ्गिण्यां विस्तृतः यद्वा मृग्यते शास्त्रविचारेण योगादिसाधनैश्च कृत्वा मुमुक्षुभिरिति मार्गस्तत्स्वरूपगुणरूपादिः "सोऽन्वेष्टव्य"इति श्रुतेः यद्वा नियमेनेति निग्रहानुग्रहरूपनियमनशक्तियोगेन सर्वानपि जीवात्मनो वशे कुर्वन् भगवन्मार्गे प्रवणीकारः तत्र स्वाश्रिताननुग्रहेण बहिर्मुखांश्च निग्रहेण ।

तथा च वक्ष्यते ॥

निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानतेति ।

भगवत्स्वरूपगुणादिविषयकसाक्षात्कारानुभूतिकारितेतियावत् तत्र स्वरूपं सर्वव्यापकःसर्वात्मा सर्वाधारो जगद्योनिः शास्त्रैकवेद्यो देशकालादिपरिच्छेदशून्यः सच्चिदानन्दोऽनन्त इति "सर्वव्यापी सर्वभूतान्तरात्मा यस्मिंल्लोकाः श्रिताः सर्वे" "यतो वा इमानि भूतानि जायन्ते" "सर्वे वेदा यत्पदमामनन्ति" "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"त्यादि श्रुतिभ्यः, गुणाश्च ज्ञानशक्तिबलैश्वर्यादयो वात्सल्यकारुण्यक्षमादयश्च स्वाभाविकाः कल्याणरूपा यावदात्मवृत्तिसंख्यादिपरिच्छेदशून्याः "परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच"-"यः सर्वज्ञः सर्ववित्" ।

समस्तकल्याणगुणात्मकोऽसौ तेजोबलैश्वर्यमहावबोधः ।

स्ववीर्यशक्त्यादिगुणैकराशिः ।

इत्यादिश्रुतिस्मृतिभ्यश्च ॥

आदिनासर्वमङ्गलविग्रहः "यदापश्यः पश्यतेरुक्मवर्णयदात्मको-

भगवान् तदात्मिकाऽव्यक्तिः" "हिरण्यकेशः हिरण्यश्मश्रुराप्रण-खात्सुवर्ण" इत्यादि श्रुतिभ्यः ।

तद्विस्तारश्च श्रुत्यन्तकल्पवल्ल्यां द्रष्टव्यः ।

अथ

यस्यदेवेपराभक्तिर्यथादेवे तथा गुरौ ।
तस्यैतेकथिताह्यर्थाः प्रकाशन्तेमहात्मनः ।

इत्यादिश्रुतिबोधितभगवद्भावप्रतिपादकोऽप्ययं श्लोको व्याख्यायते हे नियमानन्द इति ।

चेतनाचेतनात्मकं जगन्नियमयतीति नियमोविश्वान्तरात्मा भगवाञ्छ्रीपुरुषोत्तमः–"आत्मानमन्तरोयमयत्येषते आत्मान्तर्यामी" तिश्रुतेः, आनन्दयत्यानन्द आनन्दस्वरूपोवेति "एष आनन्दयाति" "विज्ञानमानन्दं ब्रह्म"त्यादिश्रुतेः, नियमश्चासावनन्दश्चेतितथोक्तः सर्वान्तरात्मानन्दरूपो भगवान्वासुदेव इत्यर्थः तस्य सम्बोधनमिदम् अत एव इङ्गितज्ञातेति, सर्वान्तरात्मत्वादेव सर्वस्येङ्गितस्य बाह्याभ्यन्तरचेष्टितस्य ज्ञाता तस्यार्जवकौटिल्यादिचेष्टितं तत्तदनुकूलप्रापणं तत्तद्भोगफलं च सर्वं साक्षात्पश्यतीति यावत्, एतेन श्रीभगवतो विश्वान्तरात्मत्वं तत्समानाधिकरणं स्वातन्त्र्यं सार्वज्ञं च प्रतिपादितं, तेनैव च व्यतिरेकमुखेन जीवात्मनां तदात्मीयत्वं तत्परतन्त्रत्वमल्पज्ञत्वं चापि फलितम् ।

अथ सिद्धान्तमपि समासतो दर्शयन् विशिनष्टि ।

आत्मवानिति ।

आत्मानस्त्रिविधा अपि नित्यमुक्तबद्धविशेषयुक्ताः क्षेत्रज्ञास्तदाधेयतत्तन्त्रतद्व्याप्यतदात्मकत्वादिभ्यस्तदात्मीया विद्यन्ते यस्य स आत्मवानिति विग्रहःतदाधेयत्वादिभिः स्वरूपेण भिन्नत्वमपि जगतस्तदात्मकत्वादिना तदपृथक्सिद्धत्वादभिन्नत्वं भिन्नाभिन्नत्वमित्यर्थः किञ्च प्रकृतिप्रत्यययोः प्रत्ययार्थस्यैव प्राधान्यात् प्रकृत्यर्थानां क्षेत्रज्ञानां परतन्त्रसत्तायोगः "यदासीत्तदधीनमासी"दित्यादि श्रुतेः, प्रत्ययार्थस्य च श्रीमाधवस्य भगवतः कृष्णस्य स्वतन्त्रसत्तायोगो मुख्यवृत्त्यैवसिद्धः "आत्माहिपरमः स्वतन्त्रोऽधिगुणः" "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिश्रुतेः ।

प्रत्यग्ब्रह्मणोः संबन्धसिद्धान्तं निरूप्य तत्प्राप्तिसाधनमपि स्व-

यमेवेत्याह—

भगवन्मार्गदेशक इति ।

भगवतः स्वस्य वेदमुखोक्तस्वप्राप्तिमार्गं वैदिकसम्प्रदायनिष्ठसदाचारनिष्ठसदाचार्याभिगमनादिप्रभृतिस्वप्राप्तिपर्यन्तसाधनक्रमतदनुष्ठानादिरूपं मार्गं दर्शयतीति तथोक्तः वात्सल्यकारुण्यदयातितिक्षादिस्वाभाविकानन्तकल्याणगुणगणालयत्वात् स्वयमेव जन्मसमये कृपार्द्रकटाक्षेणावलोक्य सात्विकश्रद्धाविशिष्टं कृत्वा वेदान्तसम्प्रदायाचार्येणाऽऽत्माऽपरमूर्त्तिना वहिर्यामिणा ऽभिसङ्गम्य तदुक्तसाधनसंतति*माचारयित्वा स्वात्मानं प्रापयतीति भावेनाह ।

नियमेनवशेकुर्वन्निति ।

तत्तत्साधनाचरणाद्यनुकूलानुग्रहगर्भिनान्तःप्रेरणात्मकेन स्वासाधरणधर्मेणवशेकुर्वन् स्वानुकूलत्व स्थापयन्नित्यर्थः“यमेवैषवृणुते तेन-लभ्यः तमक्रतुं पश्यतिवीतशोकोधातुः प्रसादान्महिमानमात्मन”इत्यादिश्रुतेः, यद्वानियमोत्र नियमनं निग्रहणरूपासाधारणैश्वर्ययोग इति “भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम” इति श्रुतेः, तेन दुराचारान्वेदानिषिद्धार्थनिष्ठान् निग्रहाधिकारणे निग्रहेण वशे कुर्वन्नित्यर्थः तथा च दुष्कृतां निग्रहेण वेदोक्तधर्मप्रवृत्तिविरोधं परिहरन्साधूनां वदोक्तधर्मानुगामिनां चानुगृह्णन् तेभ्यो भगवन्मार्गं पूर्वोक्तं मार्गं वेदोक्तसाधनसन्ततिं भगवद्गीताद्युपदेशरीत्या वाऽर्चिरादिरूपं स्वप्राप्तिमार्गं वा दर्शयतीति वाक्यार्थः एतदर्थमेव भगवतोऽवतारत्वात् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।
इति भगवदुक्तेः ॥

एवं भूतैश्वर्याद्याश्रयस्त्वं स्वोत्कर्षमाविष्कुरु इति संबन्धः ॥१॥

एतेन श्लोकेनोत्कर्षप्रादुर्भावार्थं प्रार्थना उक्ता तत्प्रार्थनया तुष्टेन स्वबुद्धौ प्रादुर्भावितमुत्कर्षं ज्ञात्वा तदेव वर्णयति ।

---

* आचारयित्वेति पाठ प्रामादिकः ।

स्वरूपगुणकर्मादिभिरुत्तमत्वमेवोत्कर्षस्तस्यैववर्णनार्थमुपक्रमते ।

पाखण्डद्रुमषण्डानां दाहकः पावकोपमः ॥
गर्वपर्वतदम्भोलिः काम्यकर्माहिपक्षिराट् ॥ २ ॥

पाखण्डाएवद्रुमास्तेषां षण्डाः समूहास्तेषां दाहक इति, वृक्षाणां छेदेपि अङ्कुरादिना पुनरपि रोहदर्शनात्तथा दण्डादिभिया पाखण्डत्यागेपि वासनया दुस्त्यजत्वात् तद्दुर्निवृत्तत्वात् द्रुमत्वोक्तिः, दवाग्निना वनदाहेपि क्वचित्कचित्तन्मूलावशेषदर्शनात्पुनस्तद्रोहदर्शनाच्च तथापि पाषण्डानां दाहे तन्मूलावशेषात्कदाचिद् भूयः प्ररोहो भविष्यतीत्याह, पावकोत्तम इति, सांवर्तकाग्नितुल्यः समूलवस्तुदाहकत्वाच्च भूयः प्रादुर्भावसम्भावनेत्यर्थः ।

किंच,

गर्वपर्वतदम्भोलिरिति ।

गर्वा एव दुरुच्छेद्यत्वात्पर्वतास्तेषांछेदने दम्भोलिर्वज्रः वज्रतुल्यइत्यर्थः स्वाश्रितानां गर्वस्यात्मप्राप्तौ मुख्यप्रतिबन्धकस्य स्वानुग्रहेण सद्योनाशकइत्यर्थः यद्वा शास्त्रमार्गबहिर्मुखानां गर्वपर्वतान् निजैश्वर्ययोगात् तन्निग्रहेण सद्योनाशयतीति तात्कालिकनाशकत्वद्योतनाय दम्भोलिशब्दप्रयोगः ।

किञ्च,

काम्यकर्माहिपक्षिराडिति ।

"स्वर्गकामो यजेत" "पशुकामोयजेत" इत्यादिकाम्यस्वर्गादिविषयोद्देशेनतत्साधनतया विधीयमानानि काम्यकर्माणि तदनादिवासनाख्याऽहिस्थानानि यथाहि दष्टस्य परमज्ञाक्यापत्त्या ज्ञानसामान्याभावः तद्दंशनस्यैव तेषामपि श्रेयोज्ञानाभावासाधारणहेतुत्वात् तन्नाशे पक्षिराडिव, यथा पक्षिराड्वैनतेयस्य नामात्मकमन्त्रोच्चारणाद्दष्टयो भुजगाः पलायन्ते तद्दंशजन्यविषमपि सद्योनश्यति किं पुनस्तत्साक्षात्कारेण, एवं तस्य सामान्यदृष्ट्यापि काम्यकर्मणां सवासनानां निवृत्तिः किं पुनस्तद्विशेषसंबन्धजन्यतदनुग्रहया दृष्ट्या तन्निवृत्तिरिति कैमुत्यन्यायदर्शनार्थमिदमुपमानमित्यर्थः, अत्र काम्यपदप्रयोगेन नित्यनैमित्तिकयोः परम्परया मोक्षोपयोगित्वात्कर्तव्यतासूचिता, अस्य वि-

दोषनिर्णयश्च वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्विस्तृतः अत्रोपरम्यते ॥ २ ॥

किञ्च मत्तवादगजेन्द्राणां पञ्चाननमहोज्वल इति ।

मत्तवादिगजेन्द्राणां पञ्चाननमहोज्ज्वलः ॥

कामादिविषयाब्धीनां शोषकः कुम्भसम्भवः ॥ ३ ॥

अनेककुतर्ककुशलानां स्वकपोलकल्पिता वादा एव गजेन्द्राः मत्ताश्चते वादगजेन्द्राश्चेति विग्रहः, मत्तवादीतिपाठे वादिनो देहेन्द्रियमनोबुद्धिप्राणाद्यात्मवादिनः भूतसङ्घातकारणवादिनो नास्तिकाः, कर्मकालपरमाणुप्रकृत्यादिकारणवादिनो मीमांसकतार्किकाद्यश्च, अध्यासवादिनो मायावादिनश्च, तएव गजेन्द्राः मत्ताश्चतेवादिगजेन्द्राश्चेति पूर्ववद्विग्रहः उत्कर्षमन्यानाम् उत्कृष्टताख्यापने गजेन्द्रोपमानं तेषां पराभवे पञ्चाननमहोज्ज्वलः साक्षाच्छ्रीनृसिंहोपमः, यथा सामान्यनृसिंहस्य नाममात्रमपि श्रुत्वा गजेन्द्रा दूरतः पलायन्ते किं पुनः श्रीनृसिंहस्य, तथा तस्यवाग्विलासमात्रश्रवणेनैव सर्वे वादिन आत्माभिभवं निश्चिन्वाना दिशो द्रवन्तीति तात्पर्यार्थः ।

किञ्च,

कामादिविषयाब्धीनां शोषकः कुम्भसम्भव इति ।

आदिशब्दः क्रोधलोभमोहमदमात्सर्यविषादशोकादिसङ्ग्रहार्थः कामादिविषया एवाब्धयः वासनाबाहुल्येनाऽगाधत्वात् दुस्तरत्वाच्चोपमानम्, एकैकस्यापि तथात्वाद्बहुवचनं, तेषां शोषकः, तत्रोपमानं कुम्भसम्भव इति, सद्योऽप्रयासेन शोषणमात्रे एवोपमा, यथा श्रीदाशरथिना रावणोहतः, श्रीभगवता वासुदेवेन रुद्रेन्द्राद्यः पराजिता इत्यादिस्तुतिः, संकल्पमात्रेण निमिषार्द्धेप्यनन्तकोटिब्रह्माण्डोत्पादनादि कर्त्तुं समर्थस्य कियदेततत्स्तवनं, तथा प्रकृतेऽपि बोध्यम्, क्षमया पृथिवी सम इत्याद्युपमानवत् ।

वस्तुतस्तु कामादिनिवारणं कुम्भसम्भवस्यापि दुष्करं बहुकोटिस्वात्मारब्धपरतन्त्रत्वाच्च, भवतस्तु न किञ्चिदपि दुर्लभं साक्षाद्भगवत्करस्थसुदर्शनावतारत्वात् ॥ ३ ॥

किञ्च ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतल इति ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतलः ॥
संप्रदायप्रबोधाय दीपको ध्वान्तनाशकः ॥ ४ ॥

यथा प्राणिनां यवव्रीह्याद्यौषधयो जीवनहेतवः तथाश्रेयस्कामानां हरिभक्तिरेव जीवनौषधिरिति तात्पर्येणौषधिरूपणं, भक्तिरेवौषधिस्तस्य लतानां पोषकश्चन्द्रवत् शीतलः सदाविर्भूतस्व स्वरूपपरस्वरूपानन्दाश्रयत्वात्, "सदापश्यन्ति सूरय" इति श्रुतेः,

किञ्च,

सम्प्रदायप्रबोधायेति ।

सम्प्रदायविषयकप्रबोधाय ज्ञानाय सम्प्रदायानुगामिभ्यस्तद्विषयकज्ञानप्रकाशनार्थं तन्निरूपितसिद्धान्तविषयकज्ञानप्रतिबन्धकावरणनाशार्थं दीपकः, तत्र हेतुः ध्वान्तनाशकः, दीपकस्य तमोनाशकत्वं स्वभावत एव सिद्धमित्यर्थः, "येनाक्षरं परमं वेद सत्यं प्रोवाचतां तत्वतो ब्रह्मविद्याम्" ।

सुदर्शनमहाबाहो सूर्यकोटिसमप्रभ ।
अज्ञानतिमिरान्धानां विष्णोर्मार्गं प्रदर्शय ।
इत्यादिश्रुतिस्मृतिभ्यः ॥ ४ ॥

किञ्च ।

संसारकूपमग्नानांकरावलम्बनदायक इति ।

संसारकूपमग्नानां करालम्बनदायकः ॥
सुशीतलमना नित्यं माधुर्येण विराजते ॥ ५ ॥

संसारएव कूपवदुद्धरणाशक्यत्वात्कूपस्तत्र मग्नानां जीवानां करावलम्बोभागवतधर्म उद्धरणहेतुत्वात्तस्य दायकः तदुपदेष्टृत्वात्-

तथाचशान्तिपर्वणिभीष्मः ।
गजेन कश्चित्पुरुषः कानने समभिद्रुतः ।
जिघांसाभयसंत्रस्तः प्रविवेश महद्वनम् ।
अथ पश्यति तत्रस्थं सिंहयूथमवस्थितम् ।
तं दृष्ट्वा स निवर्त्तेत दिशमन्यामधावत ।
तत्राऽपश्यत् खड्गहस्तां भीमकन्याञ्च दारुणाम् ।

आधावन्तीमभिमुखं तिष्ठतिष्ठेति चाऽब्रवीत् ।
तां दृष्ट्वा स निवर्त्तित्वा दिशमन्यामधावत ।
तस्यामपश्यत्तत्रस्थं प्रदीप्तवनमग्निना ।
स तत्र चिन्तयामास अहोकष्टमवस्थितम् ।
इतो गज इतः सिंह इतः कन्यान्वितो दवः ।
निराशां जीविते प्राप्तस्तत्र कूपमपश्यत ।
कक्षायतनमत्यन्तमन्धकारमनन्तकम् ।
स तत्र कूपे पुरुषः पपात भयपीडितः ।
अथाऽलोकयत त्रस्तः सर्पं कूपतले स्थितम् ।
विजृम्भमाणं घोरास्यं श्वसन्तं लेलिहाननम् ।
वल्लीमादाय राजेन्द्र तलेऽतिष्ठदधोमुखः ।
अलाबुरिव तत्रासौ तस्यां वल्ल्यां प्रलम्बितः ।
तस्या वल्ल्यास्तु मूलानि व्यच्छिनत्तत्र मूषकः ।
उपद्रवास्तु तत्रान्ये दंशका मत्कुणादयः ।
तत्राप्यन्यद्रसोत्पन्नं क्षौद्रं मधुकराक्षतम् ।
तन्नं तच्चाल्यमानं तु घृष्यमाणमभिद्रुतम् ।
अपिबन्मधु तत्रस्थः पतितं तस्य मूर्द्धनि ।
पतितं मस्तके तस्य मधु तन्मुखमाविशत् ।
पतितं मस्तके सर्वमपिबत् स पिपासितः ।
यथा स पुरुषो वत्स घोरे वर्त्तति सङ्कटे ।
तथा शरीरिणः सर्वे घोरे वर्त्तन्ति संशये ।
अस्य विवरणम् ।
योऽसौ गजो महावीचिर्विद्धि देहि हिताहितम् ।
सिंहान् रोगान्विजानीहि विहाराहारसम्भवान् ।
असिहस्ता तु या कन्या सा जरा दुरतिक्रमा ।
यो दवाग्निः स शोको वै लोभमोहभयाश्रयः ।
कूपस्तु मानुषो लोकः कालो जगदुपद्रवः ।
आयुर्वल्ली तथा प्रोक्ता मूषको मृत्युरुच्यते ।
योऽसौ कूपतले सर्पः समयः काल उच्यते ।
कामं मधुरसं विद्धि संशयो नाऽत्र विद्यते ।
मधुनश्चापि यत्स्वाद्यं कामस्वादो हि स स्मृतः ।

२

एवं श्रुतगुणो वत्स धर्मोत्कृष्टमतिर्भव ।
संशयेनाऽजितात्मा त्वं मोक्षं यासि यथाक्रमम् ।
एवं संसारकूपस्य धर्म एव परा गतिरिति ।

एवं भूते संसारकूपे मग्नानां करावलम्बं भागवतधर्मं कृत्वा तदुद्धारको भवानिति वाक्यार्थः ।

किञ्च सुशीतलमना इति ।

सुष्ठु शीतलं कामादिजन्यतापास्पृष्टमाहात्म्यकं मनो यस्य सः नित्यमुक्तत्वात् तत्कारणकर्मप्रयुक्तप्रकृतिसंबन्धाभावात् ।

अत एव माधुर्येण गुणेन मधुरालापादिना नित्यम् एकरसं यथास्यात् तथा विराजते विशेषेण प्रकाशते ॥ ५ ॥

किञ्च सुखदातेति ।

सुखदाता भवच्छेत्ता तापत्रयविनाशकः ॥
श्रीकृष्णपूजनानन्दी सर्वदा शुद्धवेषवान् ॥ ६ ॥

सुखस्य परमानन्दभगवद्भावापत्तिलक्षणमोक्षाख्यस्य,तत्र द्वारमाह-भवच्छेत्तेति

भवस्य प्रकृतिसंबन्धनिरूपितजन्ममरणादिचक्रभ्रमणरूपस्य छेत्ता ध्वंसक इति,

अत एवतापत्रयविनाशकइति,

तापा आध्यात्मिकाधिभौतिकादिस्त्रिविधाः, आद्यंद्विविधं शारीरं मानसञ्चेति, शिरोरोगज्वरातिसारामयाक्षिपीडादिकं शारीरं, कामक्रोध द्वेषलोभमोहशोकासूयावमानेर्ष्यादिजन्यं मानसं, मृगपक्षिमनुष्यराक्षससर्पादिजातमाधिभौतिकं, शीतोष्णवातवर्षाजलविद्युदादिसमुद्भवम् आधिदैविकमिति विवेकः,

किञ्च श्रीकृष्णपूजनानन्दीति,

श्रीकृष्णस्य पूजनेनानन्दोयस्यास्तीति, तथा पूजाचात्र सर्वदेशकालाद्युचिततत्तत्सङ्कल्पानुकूलाचार इति परमभक्तिरिति यावत्।

किञ्च सर्वदाशुद्धवेषवानिति ।

सर्वस्मिन्कालेपरमधामावस्थानेवाऽवतारावस्थायां वा शुद्धोऽप्राकृतोवेषोयस्यसः नित्यमुक्तत्वेनप्रकृतिसम्बन्धशून्यत्वात् ॥ ६ ॥

अथ प्रेमभक्तिमत्त्वं वर्णयन्नाह—
आनन्दाश्रुकलापूर्ण इति ।

आनन्दाश्रुकलापूर्णः सानुरागसुधान्वितः ॥
अहंममेति दौर्जन्यनाशको बुद्धिदः स्वयम् ॥ ७ ॥

यतः सानुरागसुधान्वितः अनुरागेणसहिता सानुरागा भगवत्स्वरूपगुणादिविषयकाप्रीतिः सैवसुधा तयाऽन्वितः सम्पन्नः उक्तलक्षणनिरातिशयप्रतीतेरेकाश्रय इत्यर्थः ।

स्वाश्रितसर्वदोषसमूलहारित्वमनुसंदधदाह ।

अहंममेतिदौर्जन्यनाशक इति ।

देहादावहमिति पुत्रवित्तादौममेति दौर्जन्यंदुर्जनानांरिपूणांभावोवैरिभावमिति यावत् आत्मनैवात्मनाशकत्वं, यद्वा अहमिति आत्मनिस्वतन्त्रसत्तावच्छिन्नाहंत्वनिश्चयः, वस्तुतः आत्मनांतदात्मकतयापुरुषोत्तमस्यैवाहंप्रत्ययस्य प्रधानविषयत्वात्, तथैव देहादौममेति "यस्मिन्निन्द्रोवरुणोमित्रोदेवा ओकांसि चक्रिरे" इत्यादिभ्यः, तथाभूतां व्यवसायात्मिकां बुद्धिं स्वयमेवदत्वोक्तसंसरणहेतोर्दौर्जन्यदाम्भिकत्वाद्यात्मारिपोर्विपरीतज्ञानान्मोचयतीति वाक्यार्थः,

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति—
श्रीमुखोक्तेः ।

अत्र बुद्धिप्रदानं बहिर्यामिशास्त्राचार्यमुखेन तदुक्तानुभावनं तद्विपरीतभावनाशनं चाऽन्तर्यामिरूपेणविदद्बुद्धिनियन्त्रतिविवेकः॥७॥

स्वाश्रितदोषनाशकत्वं निरूप्य तेषां पोषकोऽपि सएवेत्याह—
स्वस्य लावण्यमाधुर्यपोषकश्चाऽनुवर्तिनामिति ।

स्वस्य लावण्यमाधुर्यपोषकश्चानुवर्त्तिनाम् ॥
नितरां शाठ्यहर्त्ता च धाता सर्वभयापहः ॥ ८ ॥

अनुवर्त्तिनां स्वाश्रितानन्यभक्तानां तदाज्ञानुवृत्त्येकजीवनानां

स्वस्य लावण्यमाधुर्याभ्यां पोषकोभरणपोषक इति योगक्षेमकर्त्तेतियावत्, अप्राप्तप्रापणंयोगः प्राप्तस्य पालनं क्षेमइति विवेकः अप्राप्तानां श्रेयोऽसाधारणहेतूनां ज्ञानभक्तिविरागादीनां प्रापकत्वात् प्राप्तानां च तेषां तद्विरोधिभ्यः कामक्रोधादिनिरयासाधारणहेतुभ्यस्तद्रिपुभ्योरक्षकत्वात् योगक्षेमकर्त्तृत्वासिद्धिरित्यर्थः।

तत्प्रकारमाह-

स्वस्येति।

नित्याश्रिताभ्यां स्वाभाविकयावदात्मवृत्तिभ्यां सद्गुणाभ्यां लावण्यमाधुर्याभ्यां तत्र लावण्यं वाचः सौन्दर्यं माधुर्यं मधुरभाषया मनोहारित्वमिति विवेकः यद्वा रूपवृत्तिसौन्दर्यमाधुर्याभ्यां मनोनयनाह्लादजनकतयास्वाश्रितानां पोषक इति।

योगक्षेमवाहकत्वमेवाह विशेषणाभ्याम्—

धातेति।

मातृपितृवत् धारणपोषणकर्त्ता सर्वसम्बन्धविषयत्वात् एतेनयोगकर्त्तृत्वमुक्तं धारणसामग्रीप्रापणयोगत्वात्।

सर्वभयापह इति।

मोक्षसामग्रीदैवीसम्पद्धारिणाम् आसुरीसम्पदाख्यरिपूणां दस्युभूतानां कामादीनां सर्वभयमपहन्तीति तथा सः नितरामपदस्य सर्वैरपिप्रथमान्तपदैरन्वयोबोध्यः, अत एव शाठ्यहर्त्तेति शठस्य भावः शाठ्यं परवञ्चकत्वचौर्यादिदोषास्तेषां हर्त्तेत्यनेनक्षेमकरणत्वमुक्तम्।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति।

श्रीमुखोक्तेः ॥ ८ ॥

अथ गुणान्तरदर्शनेनस्तौति—

अमानीति।

अमानी मानदो मन्यो भावको भावधारकः ॥
सर्वसंशयभेत्ता च सर्वागमविशारदः ॥ ९ ॥

मानोऽभिमानः देहादावात्मत्वाभिमानः सविद्यतेऽस्येतिमानीनमानी अमानी नित्यं स्वपरविषयकपरोक्षानुभूतिमत्त्वात्

तत्कारणप्रकृतिसम्बन्धशून्यत्वाच्च "सदापश्यन्तिसूरय" इति श्रुतेः ।

अत एवमानद इति, ।

स्वाश्रितानामुक्तलक्षणं मानमभिमानं द्यतिखण्डयतीति तथोक्तः, यद्वामानं प्रमाणं श्रीपुरुषोत्तमस्वरूपगुणादिविषयकप्रमाकरणं वेदान्तलक्षणं स्वचरणप्रपन्नेभ्यो ददातीतिसः, यद्वा मीयते हिंस्यतेऽनेनेतिमानम् अनादिपुण्यापुण्यरूपंसंसरणमूलभूतं कर्म द्यतिखण्डयतीतिसः, स्वजनकर्मात्मिकाविद्यानाशकइत्यर्थः,

अत एव मान्यइति,

श्रेयोर्थिभिः साधुभिर्नितरांपूज्यः आश्रयणीय इत्यर्थः,

किञ्च भावक इति,

स्वभक्तान् भावयति ज्ञानवैराग्यादिसम्पत्त्या वर्द्धयतीति भावकः,

किञ्च भावधारक इति,

भावं भगवद्विषयकं प्रेम धारयतीति तथा,

असाधारणमाचार्यलक्षणं निरूपयन्स्तौति,

सर्वसंशयभेत्ताचेति,

सर्वेषां संशयान् सर्वान्संशयान्वा भिनत्तीतिसः, संशयास्तावद्विविधा आत्मपरमात्मसाधनफलादिविषयभेदात्, तथा हि भगवन्कोऽहं देहेन्द्रियमनोबुद्धिप्राणादिष्वेकतमस्तदन्योवेति स्वाश्रितेन पृष्टेउत्तरम् त्वंदेहो न भवासिजडत्वात् उच्छित्तिधर्मत्वात् मृतेचैतन्यादर्शनाच्च देहस्य घटादिवत्, नापीन्द्रियसंघातः करणत्वात् भौतिकत्वात् स्वप्नेलयदर्शनाच्च स्थूलदेहवत् दण्डचक्रादिवद्वा, अत एव नमनोबुद्धिश्च करणत्वाविशेषात् सुषुप्त्यादिष्वननुगतत्वाच्चेन्द्रियादिवत्, प्राणोपिन वायुत्वात् जन्यत्वाच्च व्यजनजन्यवायुवदिति, तस्माद्देहेन्द्रियमनोबुद्ध्यादिजडवर्गविलक्षणो जाग्रदाद्यवस्थातीतस्तत्तदवस्थाप्रकाशको ज्ञाताहमर्थाभिन्नश्चेतनस्वरूपो ब्रह्मात्मकस्तदधीनस्वरूपस्थितिप्रवृत्तिकोऽणुपरिमाणकः प्रतिदेहं भिन्नो बन्धमोक्षार्हः प्रत्यगात्मा त्वमसीतिसङ्क्षेपः, विशेषस्तु वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्निरूपितः, किञ्च किं वा जगत्कारणं परमाणवोवा कर्मवा कालोवा प्रकृतिर्वा परब्रह्मवेति संशये परमाण्वादीनां जडत्वात्स्वतन्त्रत्वेनकार्योत्पादनत्वासम्भवात्, ब्रह्मैवजगत्कारणं सर्वज्ञत्वेसति चेतनत्वात् श्रुति-

प्रमाणकत्वाच्च, "तदैक्षत बहु स्यां प्रजायेय नामरूपे व्याकरवाणि स्वयमात्मानमकुरुत सच्च त्यच्चाऽभवदि"त्यादि श्रुतेः, उक्तलक्षणसङ्कल्पेक्षणादीनामचेतनेष्वसम्भवादित्यर्थः, तत्कारणं सर्वविशेषशून्यं सर्वप्रमाणागोचरं ब्रह्म वा उपहितं वा अध्यासवद्वा सर्वज्ञसर्वाचिन्त्यानन्तस्वाभाविकयावदात्मवृत्तिगुणशक्तिको वेदान्तैकवेद्यः श्रीपुरुषोत्तमो वेति संशये निर्विशेषस्य प्रमाणाभावेनैवासिद्धत्वात् निर्विशेषं वस्तु मिथ्या सर्वप्रमाणाविषयत्वात् शशशृङ्गादिवदित्यनुमानात् उक्तेक्षणादीनां निर्धर्मके वस्तुन्यसम्भवाच्च निर्विशेषमजगत्कारणं ईक्षणादिधर्मानाश्रयत्वात्प्रकृत्यादिवदित्यनुमानाच्च, नाप्युपहितं निर्धर्मकत्वसाम्यात् धर्मवत्त्वाभ्युपगमे तटस्थ्यहानिप्रसङ्गात्, नापि तृतीयं ज्ञानेऽज्ञानाध्यासासम्भवात् इतरेतरात्यन्ताविरोधित्वाच्च सूर्येऽन्धतमोऽयोगवत्, तस्माच्चरम एव वेदान्तवेद्यो मुक्तोपसृप्यो योगिध्येयो ब्रह्मरुद्रेन्द्रादिसुरर्षिगणेड्यमानोऽचिन्त्यानन्तस्वाभाविकस्वरूपगुणशक्तिकोऽस्पृष्टदोषमहात्म्यो भगवान्वासुदेवः परब्रह्मभूतः श्रीकृष्ण एव जगदभिन्ननिमित्तोपादानकारणमिति, "यः सर्वज्ञः सर्ववित्" "स्वाभाविकी ज्ञानबलक्रिया च" "सत्यं ज्ञानमनन्तं ब्रह्म" "यतो वा इमानि भूतानि जायन्ते" "सर्वे वेदा यत्पदमामनन्ति" "ब्रह्मविदाप्नोति परं" "यं सर्वे देवा नमन्ति" "मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादिश्रुतिभ्यः, अथ किं वा मोक्षसाधनं कर्मैव वा कर्मज्ञानसमुच्चयो वा निर्विशेषप्रमाणातीतज्ञानं वा सर्वज्ञसर्वशक्तिपरमेश्वरविषयकं ज्ञानं वेति, नाद्यः कर्मणः कर्मलक्षणाज्ञानविरोधित्वाभावात् "प्लवा ह्येते अदृढा यज्ञरूपा" इति श्रुतेः, तस्य परम्परया ज्ञानोत्पादनद्वारा श्रेयःपरत्वाभ्युपगमे इष्टापत्तिः, नापि द्वितीयः उभयोर्विरोधिनोरेकत्र समुच्चयानर्हत्वात् ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेतथे-ति,

श्री *मुखोक्तेः* ।

नापि तृतीयः तस्याज्ञानसाधकत्वाभ्युपगमात्, तस्मादुक्तलक्षणपरब्रह्मस्वरूपादिविषयकमेवज्ञानं मोक्षासाधारणं कारणं "जुष्टं यदा पश्यत्यन्यमीशं तन्महिमानामिति वीतशोकः" "तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती"त्यादिश्रुति-

भ्यः, अथ किंवा फलं स्वर्गाद्यभ्युदयरूपं वा मोक्षो वा किंतावत्प्राप्तम् अभ्युदयमेवेति, "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृत"मित्यादिश्रुतिभ्यो अक्षयत्वादिविधानादिति राद्धान्तः, मोक्ष एव फलं स्वार्थत्वात् निरतिशयत्वाच्च "न च पुनरावर्त्तते" अनावृत्ति शब्दात् ।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।

इत्यादिश्रुतिस्मृतिसूत्रेभ्यः ।

न स्वर्गादीनां श्रेयस्त्वं क्षयिष्णुत्वात् "यथेह कर्मजि(चि)तो लोकः क्षीयते एवमेवामुत्र पुण्याजि(चि)तो लोकः क्षीयते" इत्यादिश्रुतेः, आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुनेति—

स्मृतेश्च ।

ननु द्वयोरपि वाक्ययोः श्रौतत्वेन प्रामाण्यसाम्यात् अक्षयबोधकश्रुतेरेव प्राबल्यम् किं न स्यादिति चेन्न, अक्षयत्वबोधकश्रुतेस्तर्कसहकृतत्वात् प्राबल्यम्, स्वर्गादिलोकाः क्षयिष्णवः कर्मजन्यत्वात् कृष्यादिवदिति प्रयोगात्, स्यादेतत् मोक्ष एव फलं तथापि किं तस्य स्वरूपं तार्किकाणामेकविंशतिप्रकारदुःखात्यन्ताभावो वा जैमिन्याचार्याभ्युपगतसार्वज्ञ्यादिब्राह्मधर्मापत्तिर्वा औडुलोम्यभिमतचिन्मात्रापत्तिर्वा सर्वाविरुद्धश्रीबादरायणाभ्युपगतभगवद्भावापत्तिर्वेति, नाद्यः अवैदिकत्वात् सुषुप्तावतिव्याप्तेश्च, न द्वितीयः चित्प्राप्तिविधायकवाक्यविरोधात्, नापि तृतीयः "सर्वं ह पश्यः पश्यती"त्यादिसार्वज्ञ्यविधायकश्रुतिव्याकोपात्, तस्मादुभयश्रुत्यविरुद्धश्चरमपक्ष एव श्रेयान् "एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण" इति निर्णयसूत्रात्, अस्यार्थः एवं चोपन्यासात्पूर्वभावात् पूर्वोक्तब्रह्मभावात सार्वज्ञ्यादिविषयकापरिच्छिन्नानुभवात् ब्रह्मभावापत्तिः अपहतपाप्मत्वादिसंपन्नविज्ञानघनीभूतस्वस्वरूपाविर्भावाच्चाऽविरोधं मोक्षस्वरूपं भगवान्बादरायणो मन्यते इत्यक्षरार्थः, एवं सर्वश्रुतीनां स्वार्थ एव प्रामाण्यात् नैकतमयापि श्रुत्या विरोधः, "निरञ्जनः परमं साम्यमुपैति" "स स्वराड्भवती"त्यादिश्रुत्या सार्वज्ञ्यसाम्याविधानात्, सर्वज्ञसादृश्यस्यापि तत्र सत्वात् सर्वज्ञकल्पत्वमप्यविरुद्धम्, "सर्वं ह पश्यः पश्यती"ति श्रुतेः, सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, तथा च "मुक्तस्य जगद्व्यापारवर्ज"मिति शास्त्रात् स्वत-

न्मस्वरूपस्थितस्याद्वेत्वेन तद्भिन्नत्वे सति सार्वज्ञादीनामपहत-पाप्मत्वादीनां च भूयसां ब्रह्मधर्माणां तत्र योगात् परमसाम्यलक्षणसमन्वयः, स्वराड्साम्यात्स्वाराज्ययोगो ऽप्यविरुद्धइतिसंक्षेपः, किंच कोवा शास्त्रविषयः कर्मवा ब्रह्म वा किंतावत्प्राप्तं कर्मैव सर्वज्ञेन भगवता जैमिनिना तत्त्वविधानात् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना" मित्यादिसूत्रात्, नन्वेव मपि "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" "यः सर्वज्ञः सर्ववि" दित्यादिषु क्रियासंबन्धलेशस्यादर्शनात् कथमिव क्रियापरत्वं, न चातदर्थानामानर्थक्यस्य उक्तत्वात्कथंभूयोविकल्पाकाशइतिवाच्यं, तेषामपिश्रुतित्वाविशेषेणधाध्ययोगादध्ययनविधिविषयत्वाच्च, अन्यथाऽवैदिकत्वापत्तेर्दुवारत्वादिति चेन्न, तेषां क्रत्वङ्गकर्तृस्तवनपरत्वात्, अङ्गपरस्य वाक्यस्यान्ततोऽङ्गिन्येव पर्यवसानान्नबाधशङ्कावकाशइति प्राप्ते ब्रूमः, ब्रह्मण्येवशास्त्रस्यसमन्वयो न कर्मणितस्य जन्यत्वजडत्वपरतन्त्रत्वादियोगात्, न शास्त्रविषयं, प्रत्युततद्भावापत्तिलक्षणमोक्षोपायभूतज्ञानोत्पादने एव कर्मण उपयोगश्रवणात्, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" त्यादिभिः,

सर्वंकर्माऽखिलं पार्थज्ञानेपरिसमाप्यते,

इति स्मरणाच्च,

एतेन पूर्वबाधशङ्कापिदूरतोनिरस्ता, विशेषस्तु आकरे द्रष्टव्यः, स्यादेतत्, अखिलस्यापिशास्त्रस्य ब्रह्मण्येवसमन्वयः, तस्यचतद्विषयत्वं, तथाऽपि कीदृशं ब्रह्म वेदान्तस्य विषयः, औपाधिकभेदाश्रयं वा, कल्पितभेदाश्रयं वा, केवलभेदाश्रयं वा, चिदचिद्विशिष्टं वा, स्वाभाविकभेदाभेदाश्रयंवेति, नाद्यः अनुपपन्नत्वात्, तथा हि सार्वज्ञादिस्वाभाविकधर्माश्रयस्य परब्रह्मण उपाधिना जीवभावापत्तिस्तत्वमस्यादिवाक्योपदेशजन्याभेदज्ञानात्तन्निवृत्याचमोक्षइति तस्य राद्धान्तः, अत्र प्रष्टव्यः, उपाधिना ब्रह्मणः सार्वज्ञादिधर्मा आवृताः, स्वरूपं वा, नाद्यः असम्भवात् तथा हि सार्वज्ञादयो धर्माः स्वाभाविका औपाधिकावा नान्त्यः, औपाधिकत्वे उपाधेस्सत्वमसत्वं वा, सत्यत्वेऽपि ब्रह्मभिन्नत्वमभिन्नत्वं वा, भिन्नत्वेस्वप्रयुक्तोऽन्यप्रयुक्तो वा, ब्रह्मप्रयुक्तो वा, नाद्यो वक्तुं शक्यः, आत्माश्र-

वात्, नापि ब्रह्मप्रयुक्तो ऽन्योन्याश्रयात्, नाप्यन्यप्रयुक्तोऽनवस्थानात्, अभिन्नत्वेचौपाधिकभेदासिद्धान्तभङ्गात् उपाधिरेव ब्रह्मेति प्रतीत्यापत्तेश्च, नाप्यसत्यः परमतप्रवेशात् अनभ्युपगमाच्च, स्वाभाविकत्वपक्षे तेषां स्वरूपभिन्नत्वमभिन्नत्वं वा भिन्नाभिन्नत्वं वा, अत्यन्तभेदे शास्त्रविरोधः, "एवं गुणान् पृथक् पश्यन्" इत्यादिनिषेधश्रवणात्, नाऽप्यभिन्नत्वम् ब्रह्मणा तेषां सामानाधिकरण्यापत्त्या "आनन्दं ब्रह्मणोविद्वा" निति व्यधिकरणश्रुतिव्याकोपात् नापि चरमः स्वाभाविकभिन्नाभिन्नानामावरणासम्भवात्, अस्मन्मतप्रवेशाच्च, अन्यथा स्वरूपस्याप्यावरणापत्तेः, स्वरूपावरणाभ्युपगमपक्षे सार्वज्ञादिहानेः, किञ्चोपाधेरपि सत्वनित्यत्वाभ्यामनिवृत्तिप्रसङ्गात्, तस्माद् दुरुपपादोऽयमौपाधिकभेदाभेदः, नापि कल्पितभेदवादः सम्भवति महादोषयोगात्, तथा हि ब्रह्मणि भेदकल्पनायां कोवाप्रयोजकः ब्रह्मवा उपाधिर्वा अन्यद्वा,नाद्यः शुद्धबुद्धनित्यमुक्तविशेषशून्ये वस्तुनि प्रयोजकत्वाभ्युपगमे निर्विशेषत्वशुद्धत्वादिनाशात् मुक्तस्यापिभूयोऽज्ञानयोगापत्तेदुर्वारत्वात् किं च प्रयोजकस्य ब्रह्मणोनित्यत्वेन प्रयोज्यस्यापि नित्यत्वादनिवृत्त्यानिर्मोक्षप्रसङ्गात् द्वितीये आत्माश्रयापत्तेः द्वितीयाद्युपाध्यङ्गीकारे अन्योन्याश्रयादियोगात् नापि तृतीयः अन्यस्य जीवस्य तत्कार्यत्वेनोत्तरभावित्वात् तस्मात्प्रयोजकाभावात्कल्पनासिद्धाभेदस्य कल्पितत्वासम्भवात् अविद्यादेर्भिन्नं ब्रह्म देहादेर्भिन्नं चेतनमित्यादौ भेदस्य त्वयाऽपि सत्वाभ्युपगमात् अन्यथा अविद्यादिभ्यो ब्रह्मणो देहादिभ्यश्चेतनस्य चापरत्वासिद्धेरिति संक्षेपः, नापि केवलभेदाश्रयत्वं ब्रह्मण इति समीचीनं श्रुतिशतविरोधात् तद्व्याकोपात् "सर्वं तं परादा"दित्यादिभेदनिन्दाश्रवणाच्च, किञ्चाऽभेदोऽपि सदेव ब्रह्मणि, गुणगुणिनोर्देहदेहिनोश्चाभेदस्य त्वयापि याथात्म्याङ्गीकारात्, अलंविस्तरेण, नापि चिदचिद्विशिष्टं ब्रह्म वेदान्तविषय इति पक्षो रमणीयः चिदचितोर्विशेषणत्वासम्भवात्, तथाहि व्यावर्त्तकत्वं ताव्द्विशेषणत्वमिति सर्वतन्त्रसम्मतलक्षणं तस्य चानयोरनन्वयात् विशेषणत्वासिद्धेश्च व्यावृत्तव्यावर्त्यसिद्धिसापेक्षत्वाद्विशेषणस्य तथा च व्यावृत्तस्य ब्रह्मणश्चिदचितोर्व्यावर्त्तकत्वाभ्युपगम्यमानेऽपि कस्मा-

व्यावृत्तमिति व्यावर्त्यौर्विवेचनीयः चेतनाचेतनयोर्विशेषणत्वाभ्युपगमेन व्यावर्त्तकत्वात् पदार्थान्तरस्याभ्युपगमाच्च, किञ्च चेतनाचेतने सार्वज्ञादिविशिष्टस्य विशेषणे भवतः केवलस्य वा, नाद्यः विशिष्टवैशिष्ट्यापत्त्या विशिष्टसिद्धान्तभङ्गात् न द्वितीयः केवलत्वानभ्युपगमात्, अभ्युपगमे च सार्वज्ञादिविशिष्टंब्रह्म भिन्नं चेतनाचेतनविशिष्टं च भिन्नमिति विशिष्टद्वयसिद्धौ सत्यां विशिष्टाद्वैतभङ्गात्, चेतनाचेतनविशिष्टदेशस्य सार्वज्ञादिहीनापत्तेश्च निर्विशेषवादप्रवेशप्रसङ्गाच्च, अलंविस्तरेण, तस्मात्स्वाभाविकभेदाभेदाश्रयभूतमेव परब्रह्म श्रीपुरुषोत्तमो वेदान्तविषय इति सिद्धम्, "एकः सन् बहुधा विचचार" "एको देवो बहुधा सन्निविष्टः" "त्वमेको सि बहुधा बहून्प्रविष्ट" इत्यादिश्रुतिभ्यः, ।

एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ॥
केचिद्बहुत्वेन वदन्ति देव-
मेकात्मना केचिदिमं पुरातनम् ॥
वेदान्तसंस्थापितसत्वयुक्तम् ।
द्रष्टुं तमीशं वयमुद्यताः स्म ॥
इत्यादिस्मृतेः ।

"अंशोनानाव्यपदेशा""दन्यथा चापिदासकितवादित्वमधीयते" "एक उभयव्यपदेशात्त्वहिकुण्डलवदित्यादिसूत्राच्च । ननु भेदप्रयुक्तो ऽभेदस्तत्प्रयुक्तश्च भेद इति स्वाभाविकभेदाभेदपक्षस्याप्यन्योन्याश्रयदोषग्रस्तत्वात् अवच्छेदकाभावाच्च कथं निर्दोषत्वमिति चेन्न, न तावद्भेदाभेदनिरूपणे भेदाभेदयोः प्रयोज्य प्रयोजकत्वं येनोक्तदोषप्रसङ्गः, स्यात् अपि तु स्वतन्त्रपरतन्त्र सत्वनिर्णयोपयिकयोर्नियन्तृत्वनियम्यत्वयोः सत्त्वात्रोक्तदोषसंसर्गावकाशः, आत्मा हि परमस्वतन्त्रोऽधिगुणः, "सर्वस्य वशीसर्वस्येशानः" "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" "भीषास्माद्वातः पवते भीषोदेति सूर्यः" "अज्ञोजन्तुरनीशश्च आत्मनः सुखदुःखयोः" "ईश्वरप्रेरितोगच्छेत्स्वर्गं वाश्वभ्रमेव वे"त्यादिश्रुतिभ्यः, नाप्यनुगतावच्छेदकाभावः, अखण्डोपाधिरूपानुगतावच्छेदकस्य सत्वा-

त्, ननु स्वाभाविकभेदाभेदवादेपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एवेति चेन्न, स्वरूपतो जीवेशयोरभेदानभ्युपगमात्, तथा हि ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेणाऽभेदाभावः इतरेतरात्यन्तविलक्षणत्वात् "अस्थूलमनणु" इत्यादिश्रुतेः, तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम् अचेतनस्य स्थूलत्वेन ब्रह्मणश्च तयोर्विलक्षणत्वेनेतिविवेकः, एवमेव तस्य तयोश्चसर्वात्मत्वसर्वानियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्त्वसर्वाधारत्वादियोगेन ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रसत्त्वपराधेयत्वादियोगेन चाभेद इतिसिद्धान्तजाह्नव्यां श्रीदेवाचार्यपादैर्दत्तोत्तरत्वात्, विशेषश्च तत्रैव द्रष्टव्यः, ननु भेदाभेदयोरितरेतरविरुद्धत्वात्कथंसामानाधिकरण्यमिति चेन्न, श्रुतिगम्यत्वात् न तर्केण परास्तुं शक्यः, अन्यथा "ऽणोरणीयान्महतोमहीया" नित्यश्रुदिपरस्परविरुद्धत्वाद्वेयमेव भवाद्भिर्वैदिकैः, न च तेषां श्रुतिप्राप्तत्वाद्व्यवस्थयैव भाव्यमन्यथाश्रुतिबाध इति वाच्यम्, प्रकृतेपि तुल्यत्वात् इत्यलं विस्तरेण, विशेषस्तु श्रुत्यन्तकल्पवल्ल्यामुक्तः, एतेषां संशयानां नाशक इत्यर्थः, चकारो विपर्ययादिसमुच्चयार्थः । भिन्नाभिन्ने स्वाभाविकाचिन्त्यानन्तकल्याणगुणाब्धौ ब्रह्मणि औपाधिकभेदाश्रयत्वकल्पितभेदाश्रयत्वकेवलभेदाश्रयत्वविशिष्टाद्वैतत्वादिपक्षेष्वेकतमस्य कल्पनं निर्गुणत्वमायाकल्पितगुणवत्त्वं वा विपर्ययज्ञानं श्रुतिविरुद्धत्वादनुपपन्नत्वाच्च, एवमन्यदप्यनुसन्धेयं, तथाभूतविपर्ययान् भिनत्तीति विपर्ययभेत्तेति चकारार्थः, ।

तत्रहेतुमाह—

सर्वागमविशारद इति ।

सर्वेष्वपि आगमेषु शास्त्रेषु विशारदो निपुणः नित्यमुक्तत्वेनापरिच्छिन्नज्ञानत्वात् "सदा पश्यन्ति सूरय" इतिश्रुतेः, पदवाक्यप्रमाणनिर्णयविषयककौशल्यासाधारणाश्रयः, अन्यथा संशयभेत्तृत्वासम्भवात्, हेतुहेतुमद्भावो वाऽत्र विवक्षितः' सर्वसंशयभेत्तृत्वात्सर्वागमविशारदः, सर्वागमविशारदत्वाद्वा सर्वसंशयभेत्तेत्यर्थः "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठ"मितिश्रुत्युक्तलक्षणं वाऽत्र विवक्षितं, तथा च श्रोत्रियपदस्य सर्वाग-

मविशारद इति व्याख्यानम्, ब्रह्मनिष्ठमिति पदस्य सर्वसंशयभे-त्तेतिबोध्यम्, उभयविधानावच्छिन्नानुभूत्यसाधारणाश्रयत्वादाचा-र्यपादानामिति संक्षेपः, ॥ ९ ॥

कालादिसम्बन्धाभावंदर्शयन् नित्यमुक्तत्वंदर्शयति—
कालकर्मगुणातीतइति ।

कालकर्मगुणातीतः सर्वदाचारतत्परः ॥
श्रीकृष्णस्यकृपापात्रं प्रेमसंपुटपुष्कलः ॥ १० ॥

कालः भूतभविष्यद्वर्त्तमानचिरक्षिप्रादिप्रत्ययासाधारणहेतुः प्राकृतद्रव्यादेः तत्सम्बद्धचेतनस्वभावावेज्ञानसङ्कोचादेश्च परिण-मनादिहेतुश्च, कर्माणि सञ्चितक्रियमाणप्रारब्धरूपाणि पुण्यापु-ण्यलक्षणानि, गुणाः सत्वरजस्तमांसि, उपलक्षणं चैतत् क्लेशता-पविकारादीनां, तत्र क्लेशः पञ्चधा, "अविद्यास्मितारागद्वेषाभिनि-वेशाः" "तापस्त्रिधा, अध्यात्मिकाधिदैविकाधिभौतिकभेदात्, वि-कारःषड्विधः, जन्मास्तित्ववृद्धिपरिणामापक्षयनाशभेदात् , तत्प्र-योजकप्रकृतिसम्बन्धश्च, एभ्योतिक्रान्तः, सर्वदेति अत्रान्वेतव्यः, एतेन नित्यमुक्तलक्षणमप्युक्तं भवति, त्रैकालिकसंसारदुःखविषय-कसामान्यज्ञानानाश्रयत्वे सति सदैव स्वभावतो भगवदनुभा-विततत्स्वरूपगुणादिविषयकानुभववत्त्वं तत्त्वम्, अस्य च तत्र स-मन्वयात् तथात्वमित्यनवद्यम् ,

किञ्च सर्वदाचारतत्परइति ॥

सर्वस्मिन्नपि काले भगवच्छास्त्रोक्ताचारपरायणः यद्वा सर्वदश्चा-सावाचारतत्परश्चेतिविग्रहः, सर्वेभ्यो भक्तेभ्यो वाञ्छितं ददातीति स-र्वदः, यद्वा सर्वं पुरुषार्थं ददातीति तथोक्तः, यद्वा सर्वमनाचारतन्मू-लदोषं सदाचारप्रतिबन्धकं द्यतिखण्डयतीति तथा, यद्वा सर्वा-नपि स्वाश्रितान् तद्बुद्धींश्च स्वानुग्रहेण दायति शोधयतीति तथोक्तः सर्वदः, आचारः शास्त्रोक्तभागवतधर्माचरणरूपः स एव परः प्रधानं यस्य स चासौ सचेत्यर्थः,

अत एव श्रीकृष्णस्य कृपापात्रम इति ।
सर्वदेशकालादिषु तदनुकूलाचारपरत्वादेव तस्य प्रेष्ठः ।
किञ्च प्रेमसम्पुटपुष्कल इति ।

प्रेम्णो भगवदीयगुणादिविषयकस्य सम्पुटः स चासौ पुष्कलश्चेति विग्रहः सदैवाविर्भूतभगवद्विषयकानुभूतित्वात् ॥ १० ॥

निर्विकारत्वं दर्शयन्नाह

तारुण्यमित्यादिना ।

तारुण्यं वयसा प्राप्तो न विकारमनाः क्वचित् ।
एतत्सुमहिमा कोऽपि विरलो दृश्यते भुवि ॥११॥

वयसातारुण्यं प्राप्तोऽपि काले विकारमना न भवति भवानिति संबन्धः विकारहेतोः प्रकृतिसंबन्धादेरभावात् ब्रह्मवत् ।

तथाभूतस्यात्यन्तदौर्लभ्यं दर्शयन्नन्यानपि अवतारविशेषान् सूचयन्नाह ।

एतत्सुमहिमेति ।

एष सुष्ठु महिमा यस्य स तथा भूतो भवादृशो भुवि विरलो दृश्यते न बहव इति यावत्, "एष महिमा ब्राह्मणस्य न कर्मणा वर्द्धतेनोकनीया"निति श्रुतेः ॥ ११ ॥

अथ स्वभक्तानां साधनाभावेऽपि पुरुषार्थसाधकत्वं श्रीभगवत आचार्यस्य व्यञ्जयन्स्तौति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनामिति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनाम् ।
असिद्धमपि सिद्धं स्यात्तत्कृपापाङ्गवीक्षणैः ॥१२॥

कृष्णस्य मार्गोऽत्रा ऽऽचार्योपदिष्टसम्प्रदायाश्रयणम्,

तदनुवर्त्तिनां दुरापादनं दुःसाध्यं किं न किमपि दुःसाध्यमित्यर्थः, कुत इत्यत्राह असिद्धमपि सिद्धं स्यादिति, अनेकैरप्युपायैरप्यकृतात्मभिः सत्सम्प्रदायशास्त्राचार्यपराङ्मुखैरसिद्धमप्राप्यमपि तेषां तत्साधनाभावेऽपि सिद्धं स्यादिति । यावैसाधनसम्पत्तिः पुरुषार्थचतुष्टये ।

तया विना तदाप्नोति नरोनारायणाश्रयः ।

इत्यादिस्मृतेः ।

ननु साधनं विना फलं सिद्धिः कथमसम्भवात् अन्यथा

सर्वेषामपि तदापत्तिर्दुर्वारा साधनाभावाविशेषादित्याशङ्कानिरासार्थमाह,

तत्कृपापाङ्गवीक्षणैरिति ।

तस्य कृपया सह अपाङ्गः कटाक्षस्तेन वीक्षणानि तत्कृपापाङ्गवीक्षणानि तैः तस्य कृपार्द्रकटाक्षावलोकनैरित्यर्थः, "यमेवैष वृणुते तेन लभ्य" इति श्रुतेः,

तत्प्रसादादवाप्नोषि शाश्वतं पदमव्ययम् ।

तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।

इति श्रीमुखोक्तेः ॥ १२ ॥

अथ गुणान्तरमाह—

त्यक्तसर्वदुराचार इति ।

त्यक्तसर्वदुराचारः कृष्णचर्यापरिग्रहः ।
भावनाशुद्धसर्वत्रः पक्षपातविवर्जितः ॥१३॥

त्यक्तस्त्याजितः सर्वेषां स्वाश्रितानां दुराचारो येन सः सदाचारोपदेष्टृत्वात्, यद्वा लोकदृष्ट्यैषोक्तिः, सर्वोऽपि दुष्टो विपर्यय आचारो यस्य स सर्वदुराचारो बाह्यान्तःकरणवर्गो बुद्धीन्द्रियादिगणः "पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्म" न्निति श्रुतेः, त्यक्तः सर्वदुराचारः पराङ्दृष्ट्यसाधारणहेतुः करणवर्गो येन सः संयमितबाह्यान्तःकरण इत्यर्थः, यद्वा सर्वैर्दुराचारैस्त्यक्त इति त्यक्तसर्वदुराचारः सुदर्शनावतारत्वेनाऽसह्यतेजस्त्वात् तत्सकाशात्सर्वे दुराचाराः स्वयमेव पलायिताः, यथा प्रदीप्ताग्नेर्वनस्थस्वापमृगादिर्दिशोदिशो धावन्ति तद्वदित्यर्थः,

किञ्च कृष्णचर्यापरिग्रह इति ।

कृष्णचर्या एव परिग्रहः परिकरो यस्य सः नैष्ठिकत्वात् संग्रहान्तरशून्य इत्यर्थः, यद्वा कृष्णाचर्यायै एव परिग्रहः संग्रहो यस्य न स्वार्थे परार्थे वेति, यद्वा कृष्णचर्यायै तत्प्रवृत्त्यर्थमेव परिग्रहोऽवतारो यस्य सः ।

किञ्च भावनाशुद्धसर्वत्र इति ।

भावनया श्रीबोधिधीर्षालक्षणया शुद्धो भावनाशुद्धःसर्वज्ञः स-श्चासौ सर्वेति विग्रहः, यद्वा भावनयास्वोद्दिष्टश्रीकृष्णध्यानसन्तत्या कृत्वा शुद्धान् विगतरागादिदोषान्सर्वानपि स्वाश्रितांजानातीति त-थोक्तः, विसर्गाभावपाठेसम्बोधनं तद्भावेच विशेषणमिति द्विवि-धोपिपाठः समञ्जसः समानार्थश्च बोध्यः ।

गुणान्तरमाह—

पक्षपातविवर्जित इति ।

असौशत्रुरसौमित्रमितिपक्षपातः पशुतुल्यानांदेहात्माभिमानिनां यथा भवति तेनशून्यः रागादिविषयरहित इत्यर्थः, ननु तर्हि कथमाचार्यत्वाधिकारनिर्वाहस्तस्यानुग्रहनिग्रहादिसाध्यत्वात् त-द्योगे च वैषम्यादेरवश्यम्भावित्वात्कथं पक्षपातशून्यत्वमिति चे-त्सत्यम् भगवदवतारवत् सर्वस्यापि सामञ्जस्यात् तद्धितार्थे तेषां निग्रहो न वैषम्यावहः अन्यथाश्रीपुरुषोत्तमेऽपि तत्प्रसङ्गस्य दुर्वा-रत्वादिति सङ्क्षेपः ॥ १३ ॥

अथ गुणविशेषान्दर्शयन्नाह—

सत्यवागिति ।

सत्यवाक् सत्यसङ्कल्पः कृतसिद्धान्तनिर्णयः ।
वृद्धसेवी वृद्धिकर्त्ता भर्त्ता सर्वस्य पालकः ॥ १४ ॥

सत्यावाचो यस्य सः यथार्थवक्तेतियावत् अनेन तस्याप्तत्वमुक्तं भवति नित्यमुक्तत्वेन बुद्धिमान्द्यदुराग्रहादिभिरातत्वप्रतिभटैः स-दैवास्पृष्टमाहात्म्यत्वात् ।

अत एव सत्यसङ्कल्प इति ।

अथ पूर्वोक्तसर्वशास्त्रविशारदत्वं व्यञ्जयन्नाह-

कृतसिद्धान्तनिर्णय इति ।

कृतोवेदानां सिद्धान्तनिर्णयो येन सः, यद्वा कृतीछेदने इत्यस्य-धातोः प्रयोगः कृत्तः छिन्नः सिद्धान्तविरोधिनां निर्णयोयेनसः,

किञ्च वृद्धसेवीति ।

वृद्धाः ज्ञानादिवृद्धाः श्रीनारदादयस्तान् सेवनशीलः, यद्वा

वृद्धो गुणशक्त्यादिभिर्बृहत्तमो भगवान्वासुदेवः परब्रह्मशब्दाभिधेयः, "बृहन्तो गुणा अस्मि"न्निति श्रुतेः तं सेवनशीलः,

किञ्च बुद्धिकर्त्तेति ।

स्वाश्रितानां बुद्धिं बृहद्ज्ञानप्रकाशरूपां करोतीति तथा

किञ्च भर्त्तेति ।

ज्ञानभक्त्यादिना भक्तान् बिभर्त्तीति ।

तत्रहेतुः सर्वस्यपालक इति ।

"सर्वे श्रेयांसिपश्यन्तु" इत्यादिशास्त्रोकसर्वविषयकश्रेयःसङ्कल्पपूर्वकोपदेशप्रभावेन सर्वस्य जगतो भाविश्रेयस्कस्य पालक इति भावः ॥ १४ ॥

किञ्च मन्दानां शाठ्यनिर्वृत्त्या सर्वसौभाग्यदायक इति—

मन्दानां शाठ्यनिर्वृत्त्यासर्वसौभाग्यदायकः ।
आचारवैरिणो हन्ता कार्यसिद्धिप्रदायकः ॥ १५ ॥

मन्दा अल्पबुद्धयस्तेषां शाठ्यं शठस्य भावो वञ्चकता तस्यनिर्वृत्त्यानिवारणेन सुष्ठुभगः षाड्गुण्यं यस्य स सुभगः भगवान् श्रीकृष्णः

ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भगइतीङ्गना ।

इति श्रीपराशरोक्तेः ।

सुभगस्य भगवतो भावः सौभाग्यं परं श्रेयः मोक्षः सर्वस्मै तस्यदायकः ।

किञ्च आचारवैरिणोहन्तेति ।

आचारः शास्त्रोक्तसदाचारः भागवतधर्मस्तस्य वैरिणो बाह्यास्तान्त्रिकावा राक्षसावा तान् हन्तीतितथासः ।

किंच कार्यसिद्धिप्रदायक इति ।

क्रियते इति कार्याणि अनुष्ठेयानि पुरुषार्थसाधनानि कर्मज्ञानादीनि तेषां सिद्धिस्तत्प्रतिबन्धकनिरासेन स्वरूपसंपत्तिस्तांप्रकर्षेणददातीति तथासः ॥ १५ ॥

किं च आचारभ्रष्टजीवानां शनैर्युक्त्याप्रबोधयन्निति ।

आचारभ्रष्टजीवानां शनैर्युक्त्या प्रबोधयन् ॥
भगवन्मार्गशुद्ध्या च कृतार्थीकृतभूतलः ॥ १६ ॥

आचारः संप्रदायशास्त्रोक्तधर्मानुष्ठानं तस्माद्भ्रष्टाश्च्युतास्तद्धीना इति यावत् ते च ते जीवाश्च तेषामनादिकालाद्धर्महीनानां शनैस्तत्तदधिकारानुसारेण तत्तद्बुद्ध्यनुसारेण च क्रमशः यथामन्दोऽपि जानीयात्तथा भूतया युक्त्या भगवत्प्राप्तिसाधनपरम्परोपदेशेनेत्यर्थः अकृतार्थम् कृतार्थं क्रियते इति कृतार्थीकृतं भूतलं येनसः ॥ १६ ॥

संप्रदायविमुखान् शोचन्नाह—

हतलोकोयमिति ।

हतलोकोऽयमज्ञः स्याद्वर्तमाने विभावसोः ॥
आचार्यरूपिणः सम्यक् जाड्यशीतेन दाह्यते ॥ १७ ॥

वर्त्तमानेसमये आचार्यरूपिणो विभावसोः शरणं विनाऽयं हतलोकः स्यादित्यध्याहृत्यान्वेतव्यं,"पृथक् विनानाने"ति सूत्रात्पञ्चमी, अयं जीवसंघातः हता नष्टा लोका यस्य सः यद्वा हतोलोकः प्रकाशोज्ञानं यस्य सः तथाभूतः सन्नज्ञः स्यात्, सम्भावनायां लिङ् ।

अज्ञत्वेहेतुमाह—

जाड्यशीतेन दाह्यते इति ।

जडस्य भावो जाड्यं तदेव शीतं तेन दाह्यते जडीकृत्य नाश्यते इत्यर्थः ।

तथा च मोक्षधर्मजनकः ।

नविनागुरुसंबन्धं ज्ञानस्याधिगमः कुतः ॥

गुरुः पारयिता तस्य ज्ञानं प्लवमिहोच्यते इति ॥ १७ ॥

सर्वानप्युपदिश्य वात्सल्याद्यसाधारणगुणयोगात्तद्धितश्रुत्युक्तासाधारणश्रेयःसाधनमुपदिशन्नाह—

सत्यवाक्यं च शृणुतेति ।

सत्यवाक्यं च शृणुत त्यक्त्वा तर्कवितर्कताम् ॥
आचार्यशरणं यात कलौ निस्तारहेतवे ॥ १८ ॥

हे जना इति सम्बोधनमध्याहर्त्तव्यं, हे जनाः भवतां हितोप-

देष्टुरुहिर्धीर्षोमेम सत्यं यथार्थमबोधितविषयकं वाक्यं शृणुत ।

किं तद्वाक्यम्, अस्माकं हितं चेतर्हि कथ्यतामित्यत्राह—

तर्कवितर्कतां त्यक्त्वा आचार्यशरणं यातेति ।

तत्र वाक्यर्थाङ्गीकारे श्रेयोऽस्माकं स्याद्वानवेत्यादि सङ्कल्पविकल्पादिकं संशयं विपर्ययादिरूपमयथार्थत्वं वा त्यक्त्वा, "संशयात्माविनश्यति" "नायंलोकोस्ति न परो न सुखं संशयात्मन" इत्यादिशास्त्रात्, "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "आचार्यदेवोभवे"त्यादिश्रुतेः, "आचार्योपासनं शौच"मिति भगवदुक्तेश्च, ।

तत्प्रयोजनमाह—

कलौनिस्तारहेतव इति ।

संसारादिति शेषः, संसारभ्रमणदुःखनाशार्थमिति यावत् कलिशब्दप्रयोगादस्मिन्युगे आचार्याश्रयणस्य मुख्यत्वं द्योतितम् ॥१८॥

वात्सल्यादिगुणान् दर्शयन्नाह ।

भक्तानुग्रहकर्त्तेति ॥

भक्तानुग्रहकर्ता च सर्वसौख्यप्रदः शुभः ॥
बालबोधी कृपादृष्टिर्निर्वृत्तरहितः परः ॥ १९ ॥

भक्तेभ्यः आत्मानन्यभजनशीलेभ्योऽनुग्रहकर्त्ता, अनुग्रहोनामस्वात्मीयतयानुग्रहणमात्मसात्करणम् आत्मसात्कर्त्तेत्यर्थः—

अनुग्रहफलमाह ।

सर्वसौख्यप्रद इति ।

सर्वं सौख्यं मोक्षलक्षणं ददातीति तथा, यद्वा सर्वेभ्यः सौख्यं प्रददातीति तथा,

अतः शुभ इति, सर्वमङ्गलमूर्तित्वात् स्वयं कल्याणरूपः ।

किञ्च बालबोधीति, बाला अज्ञाः शास्त्रसंस्कारवर्जितास्तान् बोधनशीलः ।

किञ्च कृपादृष्टिरिति, सौम्यदृष्टिरित्यर्थः ।

किञ्च निर्वृत्तरहित इति, नितरांवर्त्तते इति निर्वृत्तः प्रकृतिसंबन्धस्तद्रहितः नित्यमुक्तत्वात्, अत एव परः पूर्णः श्रेष्ठो वा, ॥१९॥

किञ्च आकारोभक्तिमार्गस्येति ।

आकारो भक्तिमार्गस्य भेदरत्नसमन्वितः ॥
अनन्तभावभक्तिश्च लभ्यतेऽत्र समाहितः ॥ २० ॥

निगमनस्थानं भक्त्युत्पत्तिस्थानमित्यर्थः ॥
किञ्चभेदरत्नसमन्वित इति ।
भिद्यतेऽनेनेति भेदः साक्षात्काररूपानुभवः संशयविपर्ययकोश-हृदयग्रन्थिभेदकत्वात् ।
भिद्यतेहृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्यकर्माणि तस्मिन्दृष्टेपरावरे ॥
इति श्रुतेः ।
स एव रत्नरूपस्तेन समन्वितो भूषित इति ॥
किञ्च अनन्तभावभक्तिश्चलभ्यतेऽत्रेति ।
अत्र भगवति श्रीमदाचार्ये भगवद्रूपे अनन्तभावभक्तिर्लभ्यते अनन्तोऽपरिच्छिन्नो भावः स्वभावो यस्याः सा अनवच्छिन्नस्वभावा भक्तिरित्यर्थः यद्वा त्वत्तः सकाशात् अत्र भगवति रमानिवासे श्रीकृष्णे विषयेऽनन्तभावभक्तिस्त्वद्दीयमाना त्वदनन्यभक्तैर्लभ्यते प्राप्यत इति योजना ।
तत्र हेतुमाह—
समाहित इति ।
भवान्सर्वेष्वपि कालेषु स्वाश्रितानां परभक्तिदाने समाहितः सावधानः एतदर्थकावतारत्वाद्भवत इत्यर्थः ॥ २० ॥

किञ्च स्वार्थहीन इति ।

स्वार्थहीनः परार्थी च महोदारदयानिधिः ॥
यौवनैश्वर्यसामग्री येन विष्णौ निवेदिता ॥ २१ ॥

स्वस्मै अर्थ्यन्ते इष्यन्ते इति स्वार्थाः शब्दादयो विषयास्तैर्हीनस्तत्संकल्पशून्यः स्वभावतोऽस्पृष्टवासनासंस्कारत्वात् ।
अत एव परार्थी चेति ।
परेभ्योऽर्थः परार्थः संसारदुःखनिवारणरूपः स विद्यतेऽस्येति

परार्थी संसारचक्रभ्रमणदुःखपीडितजनसोद्धरणार्थवान् अगतुहि-धीर्षुरित्यर्थः, यद्वा परस्मैभगवतेऽर्थः परार्थः तदाज्ञाप्रवर्तनरूपोऽस्य विद्यते स परार्थी भगवदाज्ञारूपभागवतधर्मोपदेष्टेत्यर्थः, परार्थित्वादेव महोदारदयानिधिः, अतिमन्देभ्योऽपि स्वप्रपन्नेभ्यो भगवत्स्वरूपादिविषयकज्ञानदानशीलत्वान्महोदारः "योवाएतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति सकृपण"इतिश्रुत्युक्तकार्पण्यहर्तृत्वात्।

कार्पण्यहरणोत्सुक इति वक्ष्यते च।

कथमेवंविधस्वभावः, यतोदयानिधिः, निर्हेतुकपरदुःखदुःखित्वे सति तन्निराचिकीर्षा दया, तस्या निधिः दयासमुद्र इत्यर्थः महोदारश्चासौ दयानिधिश्चेति तथासः, दयागुणाश्रयत्वात्प्रपत्तिमात्रेणापि तत्तदभीष्टं ददातीति भावः, ननु सर्वोऽपि जनः स्वप्रपन्नाय यथाशक्ति ज्ञानादि ददात्येव दयानिधेः कथं प्रपत्तेरपेक्षा तथात्वे वैषम्यापत्तेर्दुर्वारत्वादिति चेन्न, अप्रार्थितोनगोपाये"दित्यादिशास्त्रात्प्रपत्तिरपेक्षितैव अन्यथा सर्वमोक्षप्रसङ्गात् वैषम्यस्य तु पक्षपातविवर्जित इत्यस्मिन्पदेव्याख्यायामेवपरिहृतत्वादलंविस्तरेण,।

इदानीं—

या वै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥
तया विना तदाप्नोति नरो नारायणाश्रयः।

इत्यादिशास्त्रात्, साधनेषु प्रपत्तेरेव प्राधान्यं दर्शयन् तदेव संप्रदायनिष्ठान् शिक्षयंश्च आचार्यकृतां तामेव प्रपत्तिं दर्शयति।

यौवनैश्वर्यसामग्री येन विष्णौ निवेदितेति।

येनभगवताऽऽचार्येण यौवनैश्वर्यसामग्री विष्णौ सर्वेश्वरे श्रीकृष्णे निवेदिता सोऽस्मदादीनामुद्धर्तेत्यध्याहृत्य योजनीयं, "ममोद्धर्त्ताभवार्णवा"दितिवक्ष्यति, यौवनं चैश्वर्यं चानयोः समाहारः यौवनैश्वर्यं, तच्च भुक्तिमुक्त्योरुपायत्वात्सामग्रीत्युक्तम् , तत्र यौवनं यूनो भावः कर्म वा विग्रहबलचेष्टादिकम्, ऐश्वर्यम् निग्रहादिसामर्थ्यं—

निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता।

इत्यनन्तरमेव वक्ष्यते।

तत्सर्वं भगवति निवेदितम्।

त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् , ॥

इत्यादिशास्त्रात्, तदनुवृत्त्यर्थकावतारत्वात् तस्योपलक्षणं चैतदात्मनोऽपि, तथा च आत्मात्मीयं सर्वं भगवदर्थमेव, आत्मात्मीयभरन्यासो भगवति कुत इत्यर्थः ॥ २१ ॥

अथ श्रीमदाचार्ये भगवद्भावं ख्यापयन्नाह—

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णय इति ।

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णयः ॥
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता ॥ २२ ॥

आचार्यः साक्षाद्विष्णुरूप एव तथात्वे च सर्वैः सदोपास्य इत्यर्थः ।

तत्र प्रमाणमाह—

पुराणेष्विति ।

तथापाद्मे—

देवहूतिस्तुतौ ।

भक्तिर्यथा हरौ मे ऽस्ति तद्वद्दिष्टा गुरौ यदि ॥
समास्थितेन सत्येन स्वं दर्शयतु मे हरिरिति ।

विष्णुधर्मे च ।

देवतायां च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य विष्णुः प्रसीदति ।

यद्वा पुरातनत्वात् पुराणशब्दो वेदवाचक इत्युक्तार्थः, वेदेषु-निर्णयोनामनिर्णीतोर्थः,

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
"आचार्यदेवोभव" त्यादिश्रुतेः,

यस्माद्देवो जगन्नाथः कृत्वा मर्त्यमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥
तस्माद्भक्तिर्गुरौ कार्या संसारभयभीरुणेति—

जगदाख्यानसंहितायाम् ॥

पञ्चरात्रे ।

वैष्णवज्ञानवक्तारं यो विद्याद्विष्णुवद्गुरुम् ॥

पूजयेद्वाङ्मनःकायैः स शास्त्रज्ञः स पण्डितः ।
श्लोकपादस्य वक्तापि यतः पूज्यः सदैव हि ।
किंपुनर्भगवद्विष्णोः स्वरूपं वितनोति यः ॥
यावदायुस्त्रयः पूज्याः सिद्धान्तो गुरुरीश्वरः ।
पूर्वं ज्ञानाय पश्चात्तु कृतघ्नत्वापनुत्तये ॥
इति ।
तत्रैवान्यत्रव्यतिरेके ॥
येषां गुरौ च जप्ये च विष्णौ च परमात्मनि ।
नास्ति भक्तिः सदा तेषां वचनं परिवर्जयेदिति ॥
एवमन्यान्यपि वाक्यान्यनुसन्धेयानि, ।
ऐश्वर्यासाधारणगुणौ दर्शयन्नाह—
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समाननेति ।

यथा श्रीकृष्णः कंसमिथ्यावासुदेवादीनां निग्रहाधिकारिणां निगृहीतवान् पाण्डवोद्धवादीनामनुग्रहाधिकारिणां चानुगृहीतवान् तथैवायमपि भगवत्पराङ्मुखानां शास्त्रबाह्यानां निग्रहं कृत्वा स्वपादभाजां सदाचारवतां ह्यनुग्रहं करोतीति तत्साम्ये दृष्टान्तः, ।

"यस्य देवे पराभक्ति"रित्यादिना अतिदेशवाक्येन तत्साम्यभक्तिः करणीयतया निरूपिता, विशेषशङ्कातु यथाश्रीभगवदुपासनस्य स्वातन्त्र्येण कर्त्तव्यता श्रुतिशतैर्विधीयते, न तथा ऽऽचार्योपासनेस्येति, न च "समुद्रमेवाभिगच्छे"दित्यादेः सत्वाप्रोक्तदोषयोग इति वाच्यम्, तस्य विधिवाक्यस्य पराङ्गत्वेन स्वतन्त्रविधित्वाभावादिति समाधानं तूक्तवाक्यस्य पराङ्गविधानपरत्वेपि गुरोः परमेश्वरत्वश्रवणात्तदैक्यवाक्यतार्थं स्वातन्त्र्यमप्यविरुद्धम्, ।

तथोक्तंश्रीनारदपञ्चरात्रे ।
गुरुरेव परं ब्रह्म गुरुरेव परं धानम् ।
गुरुरेव परः कामो गुरुरेवपरायणम् ॥
गुरुरेव परा विद्या गुरुरेव परा गतिः ।
अर्चनीयश्च वन्द्यश्च कीर्त्तनीयश्च सर्वदा ।
ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्थयेन्मुदा ।
उपायोपेयभावेन तमेव शरणं व्रजेत् ।

शरीरं चासुविज्ञानं वासः कर्मगुणान्वसून् ।
गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृत इति ।
अन्यत्रापि ।
गुरुपादाम्बुजं ध्यायेद् गुरोर्नाम सदा जपेत् ।
श्रीगुरोर्वार्त्ताकथां चैव गुरोरन्यन्न भावयेत् ।
इत्यादिना च गुरूपासनस्य स्वातन्त्र्यविधानादिति संक्षेपः॥२२॥
पूर्वश्लोकेन गुरोः श्रीभगवतासाम्यं निरूपितम्-
शास्त्रमुखेनेदानीं ततोऽप्याधिक्यमाविष्कुर्वन् श्रीगुरुंस्तौति ।
हरौरुष्टइति ।

हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ॥
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनाम् ॥ २३ ॥

यद्यपि हरेरप्यसाधारणवात्सल्यादियोगादिना रोषो न भवति तथापि महदपराधादिना तज्ज्ञापनार्थं रोषादिसम्भावना क्रियते जीवादृष्टोपाधिनेतिबोध्यं सचगुरुप्रार्थनया निवर्त्तत इत्याह ।

गुरुस्त्रातेति ।
श्रीगुरौ रुष्टे तु न कोपि त्राणहेतुरित्याह—
गुरौरुष्टेनकश्चनेति ।
वहिर्यामिणि भगवति गुरुरूपे रुष्टे सति साक्षाद्भगवानपि त्राता न भवति कुतोऽन्य इत्यर्थः ।
नारायणोऽपयाति गुरोः प्रच्युतस्य दुर्बुद्धेः ।
कमलं जलादपेतं शोषयति रविर्नतोषयति ॥
इति जयदाख्यानसंहितावचनात् ।
ततः किं कार्यमित्यत आह—
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनामिति ।
तस्मादन्यगत्यभावात्सर्वदेहिनामिति सर्वैर्देहिभिरित्यर्थः, सर्वप्रयत्नेन येन केन प्रकारेण गुरुरेव प्रसाद्यः प्रसादनीय इत्यर्थः तत एव श्रेय इति भावः ।
हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥

इति पुराणोक्तार्थसङ्ग्रहरूपोऽयं श्लोकः ॥ २३ ॥

तस्माच्छ्रीगुरुर्मर्त्यबुद्ध्या कदापि नाऽवमाननीय इत्यात्मोद्देशेन विश्वं शिक्षयन्नाह—

आचार्ये मानुषी बुद्धिर्न कर्त्तव्या कदाचनेति ।

आचार्ये मानुषी बुद्धिर्नकर्त्तव्या कदाचन ॥
अस्माभिः श्रेय इच्छद्भिर्यतः स्थानं हि श्रेयसाम्॥२४॥

अस्माभिः आचार्ये श्रीभगवन्मनुजावतारे मानुषीबुद्धिः अस्मदादिवदसावपि मनुष्य एवेति साम्यबुद्धिरध्यवसायः न कर्त्तव्य इति निषेधवाक्यसङ्ग्रहार्थः ।

यो विष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा ।
यो गुरौ मानुषं भावमुभौ नरकपातिनौ ॥

इत्यादिनिषेधशास्त्रात् ।

तत्राधिकारिस्वरूपं दर्शयति ॥

श्रेय इच्छद्भिरिति ।

श्रेयोविमुखानां कामचारिणां व्यावृत्त्यर्थमिदं विशेषणं तत्र हेतुमाह—

यतः स्थानं हि श्रेयसामिति ।

यतः श्रीगुरोः प्रसादाच्छ्रेयसां सर्वमङ्गलानां स्थानं वैष्णवपदं वैकुण्ठाख्यं परमात्मविषयकानुग्रहो वा लभ्यत इति शेषः, यद्वा यतो यस्माद्धेतोः श्रीगुरोः तदुपासनं वा श्रेयसां स्थानं तस्मान्मानुषीबुद्धिस्तत्र कदापि न कर्त्तव्येति योजना "सहिविद्यां जनयति तच्छ्रेष्ठं जन्म तस्मै द्रुह्येन्न कर्हिचि"दितिश्रुतिः, ।

एकाक्षरप्रदातारमाचार्यं योऽवमन्यते ॥
श्वानयोनिशतं प्राप्य चाण्डालेष्वभिजायते ।

इत्यादिस्मृतेश्च" ॥ २४ ॥

इदानीं श्रीमदाचार्याणामनन्तगुणत्वात्तदनुग्रहस्य देशकालादिनिरपेक्षत्वं सर्वसिद्धिहेतुत्वं च निरूपयन्स्तौति ।

यस्मिन्नहनियर्ह्येवेति ।

यस्मिन्नहनि यर्ह्येव करोति कृपयाऽऽत्मसात् ॥
तर्ह्येव सर्वसिद्धिः स्यान्न काङ्क्षा तिथिवारयोः ॥ २५ ॥

यस्मिन्निति ।

सामान्यपदप्रयोगः उत्तमदिवसादिव्यावृत्त्यर्थः, कस्मिंश्चिदपि दिवसे इत्यर्थः,

यर्ह्येवेति,

यस्मिन्नपि मुहूर्तादौ नक्षत्रतिथ्यादौ न तत्र नक्षत्रतिथ्यादिविचारापेक्षेति अन्ययोगव्यवच्छेदरूपावधारणार्थः, यस्मिन्कस्मिंश्चिदपि दिवसे नक्षत्रमुहूर्तादौ वा करोति कृपयाऽऽत्मसात्जीवमित्यध्याहरणीयं कृपयात्मसात्करोति तर्ह्येव सर्वसिद्धिः स्यात् तस्मिन्नेव क्षणे सर्वसिद्धिः स्यादितिवाक्यार्थः, एवकारो ऽन्ययोगव्यवच्छेदार्थक इति स्वयमेव व्यवच्छेद्यं दर्शयति, नकाङ्क्षातिथिवारयोरितिस्पष्टार्थः, नक्षत्रादीनामप्युपलक्षणं बोध्यं, ननु यदि सिद्धिहेतूनां पुष्यादिनक्षत्राणां सिद्धादियोगानां तथैवोत्तमवारतिथ्यादीनामभावस्तर्हि कार्यसिद्धिरपि दुर्निरूप्या कारणाभावे कार्याभावस्य नियतत्वादित्याशङ्क्यात्यन्तायोगव्यवच्छेदार्थकेन तत्र प्राप्तेनैवकारेण परिहरति स्यादेवेति नस्यादिति न अपितुस्यादेवेत्यर्थः,

ननु कारणाभावे कथंसिद्धिरितिचेत्तत्राह–

कृपयेति ।

भवतः श्रीमत आचार्यस्य कृपाकामधेनुरूपायाः प्रधानबीजभूतायाः सत्वान्न कारणाभावशङ्कावकाशइत्यर्थः,

यावै साधनसंपत्तिः पुरुषार्थचतुष्टये ।
तया विना तदाप्नोति नरो नारायणाश्रयः ॥

इतिस्मृतेः ।

"यमेवैष वृणुते तेन लभ्य" इतिश्रुतेः ॥ २५ ॥

अथसंस्कारदातृत्वेन स्तुवन्नाह ।

पञ्चसंस्कारदायीचेति ।

पञ्चसंस्कारदायी च ममोद्धर्त्ता भवार्णवात्
तेषां प्रत्युपकारार्हो न कोपि जगतीतले ॥ २६ ॥

संस्कारो नाम कार्यान्तरयोग्यतापादनं, यथा ब्राह्मणाद् ब्राह्मण्यां जातेऽपि उपनयनं विनाऽध्ययनयोग्यता नास्ति, तेन चाध्ययन-योग्यतापादनं तथैव तापादिसंस्कारेण भगवत्परिचर्यादियोग्यता-पादनं वैष्णवत्वं संस्कारः,

स च पञ्चविधः ।

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ॥

अमी हि पञ्च संस्काराः परमैकान्तहेतवः ।

इतिनारदपञ्चरात्रोक्तेः ॥

तत्र तापो नाम श्रीविष्णोरायुधशङ्खचक्रादिधारणम् ।

तथासामवेदे ।

"पवित्रमग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः नेमिना तप्त-तनुर्ब्राह्मणः सायुज्यसालोक्यमाप्नोतीति" "सहोवाच याज्ञवल्क्यः तस्मात्पुमानात्महिताय प्रेम्णा हरिं भजेद्यत्सुश्लोकमौलेर्ध-र्माण्यग्निना संधत्ते तस्माद्धामैव ब्रह्मविदाप्नोतिपरमिति" ,,पवित्रं ते विततं ब्राह्मणस्य ते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनु नैतद्धामाऽश्नुते शृतास इद्वहन्तस्तत् समास" इति "एभिर्वयमुरुक्र-मस्य चिह्नैरङ्किता लोके सुभगा भवेम तद्विष्णोः परमं पदं येऽभि-गच्छन्ति लाञ्छिता"इत्यादि श्रुतिभ्यः ।

तद्धारणनियमस्थानानि चत्वारि ज्ञेयानि ॥

नैमिषे मथुरायां च द्वारवत्यां तथैव च ।

सुदर्शनाश्रमे चैव संस्कुर्याद्देशिकः सदा ॥

तत्रैश्चक्रादिभिर्विष्णोः शिष्यस्वाराज्यलब्धये ।

एषु स्थलेषु चक्रादेराविर्भावः सदा हरेः ॥

इत्यभियुक्तोक्तेः ।

विशेषस्तु गुरुनतिवैजयन्त्यामुक्तः ॥

अन्यत्र स्थलेषु कश्चित्कालं शीतलमुद्रामेव धारयेदितिभावः ॥

विस्तृतश्च पूर्वाचार्यैस्तत्प्रकारविशेषः श्रीसदाचारप्रकाशे ॥ १ ॥

अथपुण्ड्रम् ।

धृतोर्ध्वपुण्ड्रः परमेशितारं—
नारायणं सांख्ययोगाभिगम्यम् ।
ज्ञात्वा विमुच्यते नरः समस्तैः ॥
संसारपाशैरिह चैव विष्णुम् ।
इति महोपनिषदि ।
धृतोर्ध्वपुण्ड्रः श्रितचक्रधारी ।
स्वरेण मन्त्रेण सदा हृदि स्थितम् ॥
परात्परं यो महतो महान्तम् ॥
इति कमठशाखायाम् ।
तिलकस्वरूपं च यजुर्वेदे हिरण्यकेशिशाखायाम् ॥

"हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्ध्वपुण्ड्रं यो धारयति स पुण्यभाग्भवति स मुक्तिभाग्भवती"त्यादिश्रुतिभ्यः ।

तिलकद्रव्यं च प्रधानं गोपीचन्दनमेव श्रौतत्वात् ।

"सहोवाच भगवान्वासुदेवो वैकुण्ठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद् गोपीचन्दनमाख्यातं मदङ्गलेपनं पुण्यं चक्रतीर्थादिसंस्थितं शङ्खचक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति ।

इत्यादिश्रुतिभ्यः ।

तदभावे गङ्गातीर्थाद्युद्भवं तुलसीमूलस्थितं वा द्रव्यमपि ग्राह्यमेवेतिसंक्षेपः ॥ २ ॥

नामेति ।

वैष्णवी समाख्येति यावत्, "अङ्कयेच्छङ्खचक्राभ्यां नाम कुर्याच्च वैष्णवम्" इत्यादिश्रुतेः, तच्च श्रीहरिगुरुतत्क्षेत्रादिसम्बन्धवदेव धार्यं नान्यत्तत्सम्बन्धशून्यं तदन्यसम्बन्धवद्वेतिविवेकः ॥ ३ ॥

मन्त्रस्तुवैष्णवः स्वसम्प्रदायपरंपराप्राप्त एव ग्राह्यो देयश्च, "अमुं पञ्चपदं मनुमावर्त्तयेद्यः स यात्यनायासतः केवलं तत्पदंतत्" इति श्रुतेः, यच्च श्रीरामकृष्णादिमन्त्रा न मुक्तिहेतवस्तदुपासकानां फलविशेषमात्रदायका अपितु नारायणादिमन्त्र एव मोक्षहेतुरिति केषांचित्स्वबुद्ध्युत्प्रेक्षित उद्घोषः स तुच्छ एवानुपपन्नत्वात्, तथाहि श्रीकृष्णादिमन्त्राणां मोक्षहेतुत्वं प्रमाणाभावाद्वा बाधकसत्त्वाद्वेति विवेचनीयं, नाद्यः "अमुं पञ्चपदं मनु"

मित्यादिश्रुतीनां विद्यमानत्वात्, नापिद्वितीयः अप्रसिद्धत्वात्, यदि स्वानुभव एव प्रमाणं तर्हि तद्विपरीतस्यापि वक्तुं शक्यत्वात्, किञ्च श्रीकृष्णमन्त्रस्य मुक्तिसाधकत्वं भवतामनिष्टं तर्हि तच्चरमोपदेशश्लोकस्यापि तद्विषयकत्वेन तुल्ययोगक्षेमात्तस्यानुष्ठानमपि व्यर्थमेव, किमर्थं नित्यजाप्यतया तस्य स्थापनं मन्त्ररहस्येषु संग्रहश्च, किञ्च श्रीनारायणात् श्रीकृष्णादिलीलावताराणां भिन्नत्वमभिन्नत्वं वा भवतामभिप्रेतं, भेदपक्षेऽपि स्वरूपभेदो गुणशक्त्यादितारतम्यं वा, नाद्य· परमेश्वरस्यानेकत्वापत्तेः, ब्रह्मैक्यप्रतिपादकं सर्वमपि वेदान्तशास्त्रं दत्ततिलाञ्जलि स्यात्, गुणशक्त्यादितारतम्याङ्गीकारेऽपि—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ॥
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।
इत्यादिश्रीमुखोक्तयः—
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
इत्यारभ्य—
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥

इत्यन्तं श्रीपार्थोक्तयः अथ निरवधिकातिशयकल्याणैकतानानन्तज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयज्ञानशक्तिबलैश्वर्यधैर्यतेजःप्रभृत्यसंख्येयकल्याणगुणमहोदधिरित्यारभ्य परब्रह्मभूतः पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तनिखिलजगत्स्रष्टा स्वरूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानार्चनाद्यगोचरोऽपारकारुण्यसौशील्यौदार्यमहोदधिः स्वमेव रूपं तत्तत्सजातीयसंस्थानं स्वस्वभावमजहदेव तेषु लोकेष्ववतीर्य तैस्तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षफलं प्रापयन् भूभारावतारणापदेशेनास्मदादीनामपि संसारदुःखशमनाय सकलमनुष्यनयनविषयतां गत इत्यादिभाष्यारम्भः "मत्तः परतरं नान्य"दित्यस्यापि यथा सर्वत्रापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्यापि शेषित्वेन कारणतया शेषितया चाहमेव परतरस्तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परः मत्तो व्यति·

रिक्तं सर्वज्ञत्वज्ञानबलादिगुणयोगि परतरं नास्तीति भवतामाचार्यभाष्यम् परं ब्रह्म परं धाम इत्यस्य श्लोकस्य भाष्ये उदाहृतानि श्रौतवाक्यानि "यतोवाइमानि भूतानि जायन्ते"इत्यारभ्य "परंज्योतीरूपं सम्पद्ये"त्यन्तानि—

"आहुस्त्वामृषयः सर्वे" इत्यस्य भाष्ये चोक्तानि—

एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः ॥
नागपर्यङ्कमुत्सृज्येहागतो मथुरां पुरीम् ।
पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः ॥
साक्षाद्देवः पुराणोऽसौ स हि धर्मः सनातनः ।
ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ॥
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ।
पवित्राणां हि गोविन्दः पवित्रं परमुच्यते ॥
पुण्यानामपि पुण्यो ऽसौ मङ्गलानां च मङ्गलम् ।
त्रैलोक्यं पुण्डरीकाक्षो देवदेवः सनातनः ॥
आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ।
यत्र नारायणो देवः परमात्मा सनातनः ॥
तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ।
तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् ॥
तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः ।
आदिदेवो महायोगी यत्रास्ते मधुसूदनः ॥
पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ।
कृष्ण एव हि लोकानामुत्पत्तिरपि चाव्ययः ॥
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ।

इत्यादीन्यार्षवाक्यानि दत्ततिलाञ्जलिकानि स्युः, किञ्च गुणशक्त्यादितारतम्याङ्गीकारेऽनीश्वरत्वप्रसङ्गः स्यात् लीलावतारोऽनीश्वरः ऐश्वर्यतारतम्ययोगात् ब्रह्मरुद्रादिवदित्यनुमानात्,

"न तत्समश्चाभ्यधिकश्च दृश्यते ।
नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ॥
इत्यादिश्रुतिस्मृतिव्याकोपाच्च ।

अपिच युष्मत्संप्रदायप्रवर्त्तकस्य भाष्यकारस्य भाष्यानङ्गी-

करणे भवतामेवाचार्यविमुखत्वापत्तिर्दुर्वारेति द्वितीये भवतांप्रतिज्ञाभङ्गात् अस्माकमिष्टापत्तेश्च ।

तस्मात्सर्वेषामपि वैष्णवमन्त्राणां मोक्षहेतुत्वमेव, सकामाधिकारिणां च कामपूर्त्तये ह्युपासनात्तेषां मोक्षाभावो निर्विवादः, नारायणमन्त्रेपि तस्य तुल्यत्वादित्यलंविस्तरेण ॥ ४ ॥

यागश्चेति—

यागो नाम श्रीविष्णोरर्चावतारः श्रीशालग्रामादिः "यज्ञोवैविष्णु"रिति श्रुतेः, तदर्चननियमः पञ्चमसंस्कार इति सङ्क्षेपः, पञ्चमशब्दः अधिकसंख्याव्यावृत्त्यर्थः, एषां संस्काराणां इति यावत् चकारात् तदनुष्ठानप्रकारोपदेष्टापि बोध्यम् ।

अथ स्वस्मिन् श्रीगुरुकृतोपकारान् स्मरन्नाह—

ममोद्धर्ताभवार्णवादिति ।

यद्यपि नित्यमुक्तत्वात् प्रत्युत संसारिजनतोद्दिधीर्षयावतीर्णत्वाच्च न तत्र क्लेशादिसंसारिकधर्मयोगसंभावनाद्यवकाशशङ्कापि, तथापि लोकसंग्रहार्थं तथोक्ति र्न विरोधावहा, यथा श्रीनारदस्य भगवदवतारत्वेपि अज्ञजनान् गुरूपसत्तिप्रकारं संजिग्राहयिषया श्रीसनत्कुमारस्याग्रे स्वशोकादिसंसारधर्माणामाविष्कारः "सोहंभगवः शोचामी"त्यादिश्रुतिमुखोक्त्या, यथावा श्रीपुरुषोत्तमस्यावतारचरिते लोकवल्लीलानुकरणत्वान्ननिर्दोषादिविरोधस्तद्वदत्राप्यनुसन्धेयम्, एवमेव पूर्वोत्तर उक्तवक्ष्यमाणवाक्येष्वपि विवेको ज्ञेयः,अन्यथा "शङ्खावतारः पुरुषोत्तमस्येत्यादिविश्वाचार्यवाक्यविरोधो दुर्वार इति संक्षेपः ।

एवं चेत् तर्हि त्वया तत्प्रत्युपकारार्थमवश्यं प्रयतितव्यमित्याशङ्क्याह—

तेषां प्रत्युपकारार्हो न कोपि जगतीतल इति ।

तेषां श्रीमदाचार्यकृतोपकाराणां प्रत्युपकर्त्तुं योग्यः प्रत्युपकारसमर्थ इति यावत् न कोपीति, जगतीतले भूतले न जातो न जनिष्यति न वर्त्तते मनुष्यमात्र इत्यर्थः, जगतीत्युपलक्षणार्थं स्वर्गादीनां तत्रत्यैर्देवैरप्यशक्यमित्यर्थः ।

ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते ।

प्रतिप्रदानमथवा दद्याच्छक्तित आदरात् ।

इति स्मृतेः ।

यद्वा न कोपीति धरातले उपायो लोके वेदे च नास्तीति, अदृश्यत्वादित्यर्थः ॥ २६ ॥

अथ स्वदैन्यमाविष्कुर्वन् प्रार्थयते ।

कश्मलक्रोधग्रस्तोऽहम् इति ।

कश्मलक्रोधग्रस्तोऽहमविद्याग्रन्थिपीडितः
मामुद्धर जगन्नाथ चिरकालस्य दुःखिनम् ॥ २७ ॥

कश्मलक्रोधाभ्यां ग्रस्तो वशीकृतः ।

तत्र हेतुमाह—

अविद्याग्रन्थिपीडित इति ।

सर्वदोषभूतानादिकर्मात्मिकाविद्याग्रन्थिना पीडितः यन्त्रितः हे जगन्नाथ चिरकालस्यानादिकालस्य दुःखिनं तं पूर्वोक्तकश्मलादिनुन्नं मामसाधारणकारुण्यादियोगेनोद्धर ।

जगन्नाथेति संबोधनं स्वोद्धरणहेतुद्योतकम् ।

यस्मात्त्वं जगदुद्धारकः ममापि जगदन्तःपातित्वाविशेषादवश्योद्धरणीयत्वमिति भावः ॥ २७ ॥

ननु अन्येपि समुद्धरणहेतव उपायाः शास्त्रेषु प्रसिद्धास्ताननुष्ठाय कृतार्थो भविष्यसीति चेत्तत्राह—

किं करोमीति ।

किंकरोमि क्वगच्छामि त्वत्तो ऽन्यन्न हि दैवतम्
सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ॥ २८ ॥

न किंचिदुपायानुष्ठानं कर्तुं शक्तोस्मीति,उपायानां तदनुष्ठातॄणां च स्वातन्त्र्याभावात्, अनुष्ठानेपि अनुग्रहसहायं विना अकिंचित्करत्वाच्च, "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन शृण्वन्तोपि बहवो न विद्यु"रित्यादिना साधनानां व्यभिचारश्रवणात्

तस्मात्त्वमेव शरण्यत्वेन मया वरणीय इत्याह ।

क्वगच्छामीति ॥

तत्रहेतुमाह ।

इति ॥

स्पष्टार्थः ।

ननु अनुग्रहकर्त्तारोऽप्यनेके ब्रह्मादयः उपास्यत्वेन प्रसिद्धास्त-दाश्रितो भूत्वा कृतकृत्यो भव किं मच्छरणेनेत्याशङ्क्याह ।

सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ।

इति ।

सर्वेपि ब्रह्मरुद्रेन्द्रादयो देवाः जगतीतले लोकत्रयेपि स्वार्थपरि-भ्रष्टाः स्वार्थो भगवत्स्वरूपादिविषयकानुभूतिविशेषः स्मृतिसंता-नरूपो वा तस्मात्परिभ्रष्टास्तद्रहिता इत्यर्थः दृश्यन्ते इत्यत्र शास्त्रे-ष्विति योजनीये, तथाच ।

प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै ।
तौ हि मां न विजानीतो मम मायाविमोहितौ ॥
इत्यादिवाक्यात् ।
ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ॥
विष्णुमायामहावर्त्तमोहान्धतमसा वृताः ।
आराध्यं त्वामभीप्सन्ते कामानात्मविशुद्धये ॥
इति वैष्णवे अदितिवचनं च ।

ते परजन्यत्वात् परोपशिक्षितत्वात् परदत्तपरिच्छिन्नैश्वर्यव-त्त्वात् कर्मतन्त्रत्वाच्च नाश्रयणीया इति यावत्, स्वस्य त्राणएवा-शक्ताः परत्राणृत्वस्य तु का वार्त्तेति भावः. अस्य विस्तरस्तु "नान्या गतिः कृष्णपदारविन्दा"दित्यस्य विवरणे श्रीपुरुषोत्तमा-चार्यचरणैर्विशदीकृतत्वादत्रोपरम्यते "अथ ये ऽन्यथा ऽतो वि-दुरन्ये राजानस्तेक्षय्यलोका भवन्ती"ति श्रुतेः, व्याख्याताचेयं श्रीपुरुषोत्तमाचार्यपादैः, भूमोपासनस्य सार्वज्ञाद्यनवच्छिन्नफलं निरूप्य,

अथोक्तोपासनदाढ्यार्थं परिच्छिन्नोपास्यविषयकपरिच्छिन्नफल-कान्यदेवाद्युपासनपरान् मूढान्निन्दति भगवतीश्रुतिः ।

अथेति पक्षान्तरे, अत उपदिष्टसिद्धान्ताद्विपर्ययं देवान्तरमुपा-स्यत्वेन निश्चितवन्तः कथमिव जानन्तीत्यपेक्षायां ज्ञानस्यानु-करणमाह—

अन्येराजान इति ।

अन्ये ब्रह्मरुद्रादयोऽपि राजानः उपासिताः सन्तो मोक्षदातारः स्वतन्त्रा मोक्षार्थिनोपासनीया इति ते क्षय्यलोका भवन्ति स्वर्गपशुपुत्रादयो जन्मादिलक्षणहेतवो लोकाः फलानि भवन्ति ।

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ॥

इति भगवदुक्तेः ।

किञ्च तेषां क्षेत्रज्ञत्वाविशेषेण मोक्षदातृत्वाऽपरिच्छिन्नैश्वर्यावियोगाभावात् मोक्षदानानर्हत्वं शिवेनैवोक्तं स्वानुभूतं चाह घण्टाकर्णो हरिवंशे ।

अहं कैलासनिलयमासाद्य वृषभध्वजम् ।
आराध्य तं महादेवमस्तुवं सततं शिवम् ॥
ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः ।
ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ ॥
मुक्तिम्प्रार्थयमानं मा पुनराह त्रिलोचनः ।
मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः ॥
तस्माद्गत्वा बदरीं तत्राराध्य जनार्दनम् ।
मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रमे ॥

इत्यादिना ।

भारते कर्मपारतन्त्र्यमपि स्फुटमेव ॥

युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः ।
पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः ॥

इति ।

महादेवः सर्वमेधे महात्मा ॥
हुत्वात्मानं देवदेवो बभूव ।
विश्वाँ ल्लोकान् व्याप्यविष्टभ्यकीर्त्या ।
विराजते द्युतिमान् कृत्तिवासाः ।

इति ।

कालपरिच्छेदोपि श्रूयते ।

एको ह वै नारायण आसीन्नब्रह्मानेशान इत्यादि ।

किञ्च "योन्यांदेवतामुपास्ते अन्यो ऽसावन्योऽहमस्मिन् स वेद यथा पशु"रित्यादिना तदुपासकानां पशुत्वश्रवणाच्च, यद्वा

स्वार्थपरिग्रहत्वं नाम स्वार्थपरत्वेन परेषां धर्महानिकर्तृत्वं तत्र सकामानां स्वर्गादिसाधनतपोयोगादिभ्रंशकत्वं कन्दुविश्वामित्रादिचरिते प्रसिद्धं, निष्कामानां साधनभ्रंशे तु तेषां सामर्थ्यमेव नास्तीतिविवेकः, "तस्य ह न देवा नाभूत्या ईशत" इति श्रुतेः, हनेत्यव्ययपदम् अप्यर्थे, देवा ब्रह्मरुद्रादयोऽप्यस्य निष्कामानन्यभक्तस्य विदुषः अभूत्यै पराभवाय न ईशते समर्था न भवन्तीत्यर्थः, तथापि विघ्नाचरणं तेषां स्वभाव एव परश्रेयोऽसहिष्णुत्वात् "यदेतद्ब्रह्म मनुष्या विदुस्तदेषां देवानामप्रिय"मिति श्रुतेः ॥ २८ ॥

किञ्च अनन्यशरणत्रातेति ।

अनन्यशरणत्राता रक्षकः शारसंमतः ॥
निरयक्लेशसन्त्रस्त आगतोऽस्मि तवान्तिके ॥ २९ ॥

नान्यः शरणमुपायादिश्रेयोहेतुर्येषां ते ऽनन्यशरणाः स्वपादमूलैकसाधनकास्तेषां त्राता रक्षकः सर्वेषां भक्तानामितिशेषः ।

किञ्चशारसम्मत इति ॥

स्वात्मना शरति ब्रह्मणो निःशरतीति शारो वेदः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इति श्रुतेः, तस्य सम्मतस्तत्तुल्यः यथा मात्रादेरपि वत्सलतरो वेदो जीवानां पुरुषार्थबोधनेन तद्रक्षकस्तद्वत्, यद्वा शरति निश्शरत्यस्माद्विश्वमिति शारः श्रीभगवान् पुरुषोत्तमस्तत्सम्मतस्तत्तुल्यः तदनुकूलो वेति, तत्र त्राता रक्षक इत्यनयोः सामान्यविषयपरत्वेन पुनरुक्तिर्निरसनीया, तत्र त्रातृत्वं बुद्ध्यादीनां कामादिविषयेभ्यो विमुखीकर्तृत्वं, रक्षकत्वं च बहिःकरणानां शब्दादिभ्यो रक्षणमिति विवेकः,

उक्तलक्षणस्य त्रातुस्तव अन्तिके च चरणयोः छायायामागतोऽस्मि प्राप्तोऽस्मि कुत इत्यपेक्षायां हेतुमाह—

निरयक्लेशसंत्रस्त इति ।

निरये रौरवादौ ये क्लेशा यमकिङ्करयातनोद्भवास्तेभ्यो ऽति-

शयेन भ्रासमापन्नः, उपलक्षणं चैतत् जन्ममरणादिलक्षणसंसारचक्रस्य, संसारचक्रभ्रमणाच्च संत्रस्त इति ॥ २९ ॥

वेदनां गर्भसम्बन्धं नाऽश्नामि त्वदनुग्रहात् ॥
तथा साधय मां देव पाहिपाहि कृपानिधे ॥ ३० ॥

हे देव त्वदनुग्रहात् तव कारुण्यादिगुणयोगजन्मप्रसादतः गर्भसंबन्धं जन्मादिजन्यदुःखं वेदनां मरणाद्यवस्थाजन्यं च दुःखं यथा नाश्नामि नानुभवामि तथा मां पाहि पाहि संसारादिति शेषः, अत्यादरे वीप्सा,

कथं रक्षणीयइत्यपेक्षायां तत्प्रकारं प्रार्थयते ।

तथा मां साधयेति ॥

शिक्षयेत्यर्थः ।

रक्षणेहेतुमाह—

कृपानिधे इति ।

स्वाभाविकयावदात्मवृत्तिपरिपूर्णकृपादिसद्गुणानां निधिरनपायिनिवासस्थानं, निधीयतेऽस्मिन्निति निधिरित्यधिकरणव्युत्पत्तिर्बोध्या, तस्य सम्बोधनमेतत्, ननु कृपादिगुणयोगे सत्यपि सामर्थ्याभावे कथं रक्षामीति चेत्तत्रोक्तम्—

देवेति ।

सर्वज्ञाद्यखिलसामर्थ्यसम्पन्नस्त्वमसीति भावद्योतनार्थमिदं द्वितीयं सम्बोधनम् ॥ ३० ॥

ननु "ऋतेज्ञानान्नमुक्तिः" "तमेवविदित्वातिमृत्युमेती"त्यन्वयव्यतिरेकश्रुतेः, यद्वा "भक्तिरेवैनं दर्शयती"त्यादिश्रुतेः, परया भक्त्यैव श्रेयः प्राप्तिरिति, ते च ज्ञानभक्ती बुद्धिशुद्धिसापेक्षे, बुद्धिशुद्धिश्च स्ववर्णाश्रमोचितधर्मानुष्ठानेन, धर्मानुष्ठानं शास्त्रोक्तविध्यपेक्षितमिति वैदिकानां प्रक्रिया, तथा च विधिनिर्णीतस्ववर्णाद्यनुकूलधर्मानुष्ठानेनान्तःशुद्धिं सम्पाद्य ज्ञानभक्त्येकतरेण मुक्तः स्याः किं मच्छरणेनेति चेत्तत्राह—

विध्यविधी न जानामीति ।

विध्यविधी न जानामि न जानामि त्वदर्चनम् ॥
स्वीयानुग्रहभावेन मनःकामं प्रपूरय ॥ ३१ ॥

अयं विधिस्तेनायं धर्मो विधेयः अयमविधिर्निषेधस्तेनायमधर्मो निषिद्ध इत्येतदहं न जानामि तथाभूतं ज्ञानं नास्तीत्यर्थः, यदि तद्विषयकज्ञानमेव नास्ति, तर्हि तदनुष्ठानस्य का वार्तेति भावः, ननु कर्मणो दुर्ज्ञेयत्वात् "गहना कर्मणो गति"रिति भगवद्वचनात्, तथापि अर्चनादेः सौकर्यात्तदेवानुष्ठेयं, तस्यापि श्रेयोमूलत्वादिति चेत्तत्राह,

नजानामि ।

त्वदर्चनविषयकज्ञानस्यैवाभावस्तदनुष्ठानस्य तु को वा प्रसङ्ग इत्यर्थः, ननु साधनाभावे कथमिव फलसिद्धिरित्याशङ्क्याह—

स्वीयानुग्रहभावेन मनःकामं प्रपूरयेति ।

स्वीयश्चासावनुग्रहश्च स्वीयेष्वनन्यभक्तेषु वाऽनुग्रहस्तस्य भावो विषयता तेन स्वीयानुग्रहविषयीकरणेनेति यावत्, मनःकामं काम्यते मुमुक्षुभिरिति कामः श्रीभगवद्भावापत्तिलक्षणो मोक्षः मनःकामशब्दाभिधेयस्तं सर्वेषां साधनानां तवानुग्रहकिंकरत्वात् तेनैव सर्वसिद्धिः सुलभेति तात्पर्यार्थः, "यमेवैष वृणुते तेन लभ्यः" "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मन" इत्यादिश्रुतेः, ननु साधनान्तराभावे ऽनुग्रहमात्रेण सिद्ध्यङ्गीकारे नैर्घृण्यादिदोषप्रसङ्गात्साधनविषयकशास्त्रव्याकोपाच्चेति चेत्सत्यं, त्वदनुग्रहयोगात् तत्क्षणमेव सर्वसाधनसम्पत्तेः सम्भवात् उभयोरपि साधनसाध्ययोस्त्वदनुग्रहप्रयुक्तत्वादिति ब्रूमः, यथा स्तनन्धयबालस्य रोगापत्तौ औषधभक्षणानर्हत्वेन तन्मात्रौषधभक्षणादेवौषधभक्षणरोगनाशौ तत् स्तनपानेनैव भवतः, तथा सर्वसाधनानुष्ठानानर्हस्यापि मम त्वदनुग्रहेणैव साधनसाध्ययोः सिद्धिः सम्भवत्येवेति भावः ३१ ॥

सर्वसाधनहीनत्वं दर्शयन् प्रार्थयतेद्वाभ्यां—

नियताचारहीनोहमिति ।

नियताचारहीनोऽहं कामुको लोभलम्पटः ॥
नियमानन्ददासोऽयमित्याकर्ण्य गिरां प्रभो ॥ ३२ ॥
यथा न लज्जसे धीमन् तथा सम्पादय क्रमात् ॥
तवावतारो भूतानां लोकद्वयविधायकः ॥ ३३ ॥

"अहरहः संध्यामुपासीत" "यावज्जीवमग्निहोत्रं जुहोती" इत्यादिविधिना विहितो धर्मो नियताचारस्तेन हीनो ऽस्मि ।

नियतस्य तु सन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ।
सन्ध्याहीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
इत्यादिनिषेधस्य विषयोऽस्मीतिभावः ।

अत एव कामुको लोभलम्पटइति ।

शुद्धिहेतुभूतधर्मयोगाभावात् प्रत्युत तत्प्रतिभटकामलोभादियोगात् सर्वपापिष्ठाधिराजो नरकनिष्ठार्होस्मीति भावः, ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।
इतिभगवदुक्तेः ।

ननु यद्येवंभूतोऽसि तर्हि—

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

इत्यादिशास्त्रात्स्वकृतं त्वया ऽवश्यं भोक्तव्यमेव कथं मया ऽनुग्रहणीय इत्याशङ्क्य स्वस्य लज्जानिवारणार्थमित्याह ।

नियमानन्ददासोऽयमिति ।

अयममुको नियमानन्दस्य सर्वज्ञसर्वशक्तिविष्णुरूपस्य दासो भूत्वा कामादिदोषग्रस्तस्त्वाधरकं प्राप्स्यते इति या लोकानां गिरा

राज्ञि चामात्यदोषाः स्युः पत्नीदोषाश्च भर्त्तरि ।
तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम् ।

इति शास्त्रीया च या गिरा तामाकर्ण्य श्रुत्वा त्वं यथा न लज्जसे लज्जां न गच्छसि तथा मां क्रमात्सम्पादय, आ-

क्रियमाणादिभिः पूरणीयोऽहं भवता, हे प्रभो हे धीमन् इति सम्बोधनाभ्यां सर्वसामर्थ्यसार्वज्ञादिपराभ्यां समर्थानां सर्वज्ञानां स्वाकीर्त्तिगिराश्रवणमतिदुःसहमिति सूचयति, अस्माकं तु न दोषावहं निरयप्राप्तिश्रवणवत् दुःखहेतुत्वं नास्ति नुकूलयसङ्कल्पादिषडङ्गान् सम्पा(१)दयित्वा स्वात्मसात्कृत्वा परम· परं तु भवतोऽकीर्त्तिश्रवणमस्माकमपि दुःसहमेव, अतो ममान-ङ्गीकारे उभयत्राऽनिष्टतमो दोषयोगः, अङ्गीकारे च उभयत इष्ट-योगः इतिविचार्य स्वकीर्त्तिलाभाय चाहमवश्यमनुग्रहणीय इतिभावः, यद्वा ननु स्यादेतद्यदि तथाभूताधमोद्धरणे मम शक्तिः स्यान्न तु साऽस्ति तस्मादकीर्त्तिश्रवणोद्भवं दुःखं मयाऽवश्यं सोढव्य-मित्याशङ्कामुक्ताभ्यां सम्बोधनाभ्यां निराकरोति हे प्रभो सर्वसा-मर्थ्याश्रय हे धीमन् सर्वज्ञानाश्रय तव किञ्चिदप्यशक्यं नास्तीतिभावः।

ननु सर्वशक्त्यादियोगेऽपि किमिति आत्मसात्करणीयोऽसि हे-त्वभावादित्याशङ्क्याह ।

तवाऽवतारो भूतानां लोकद्वयविधायक इति ।

लोकद्वयविधानं चात्र निःश्रेयसाभिकाङ्क्षिणां साधनसाध्यरूप-योगक्षेमवहनमेव बोध्यम् ॥ ३२ ॥ ३३ ॥

एवं प्रार्थितेन श्रीमदाचार्येणाऽऽत्मसात्कृतमात्मानमाकलय्य· स्वभाग्यमभिनन्दन्नाह—

धन्योस्मीत्यादिना ।

धन्योऽस्म्यनुगृहीतोऽस्मि विष्णुना प्रभविष्णुना ॥
यच्छिरसि स्थितं नाम नियमानन्द इत्यपि ॥ ३४ ॥

अहं धन्योऽस्मि सफलजन्माऽस्मि कृतकृत्य इति यावत् कृत्यशे-षाभावात् किमत्रकारणमित्याशङ्क्याह ।

विष्णुना ऽनुगृहीतोस्मीति ।

विष्ण्वनुग्रह एव कृतार्थत्वे हेतुरिति भावः ।

अथ विष्णोर्विशेषणम्—

प्रभविष्णुनेति ।

प्रभवनशीलेनेति "बहुस्यां प्रजायेय" इति श्रुतेः. यदि विष्णोरनु-

(१) सम्पादयित्वेतिपाठः प्रमादिकः, सम्पाद्यइति तु भवितुं युक्तम् ।

गृहीतो न स्यां तर्हि एतादृशदुर्लभस्य लाभो मम मन्दभाग्यस्य दुष्प्राप्यः स्यादित्यर्थः, ।

तदनुग्रहस्यैव को वा ज्ञापक इत्यपेक्षायामाह—

यच्छिरसि स्थितं नाम नियमानन्द इत्यपीति ।

यस्य पूर्वोक्तदोषाद्यसाधारणाश्रयस्यापि मम शिरसि नियमानन्द इति नाम स्थितमस्ति नियमानन्द दास इति लौकिक्यामपि वाण्यां नियमानन्द इति शब्दस्य नित्यसंबन्धो ज्ञात, एष नित्यसंबन्धः श्रीभगवदनुग्रहं विना दुर्लभ इत्यर्थः, यदि नाम संबन्धमात्रेणापि कृतार्थोऽस्मीति तर्हि पूर्णानुग्रहेण कृतार्थः स्यामिति किं वक्तव्यमिति कैमुत्यन्यायसूचको ऽप्यपीति शब्दः, यथा लोके राज्ञो नामाङ्कितपत्रधारिणमपि पुमांस लोका बहु मन्यन्ते किं पुनः साक्षात्संबन्धेन तद्वत् प्रकृतेऽपीति भावः ॥ ३४ ॥

अथ हर्षभरेण पुनस्तद्गुणान्वर्णयन् स्तौति ।

देवनद्यां समाश्लिष्ट इति ।

देवनद्यां समाश्लिष्टः शोभी सर्वाङ्गसुन्दरः ॥
निःस्पृहो निर्ममः शान्तः पूर्वाचारसमन्वितः ॥ ३५ ॥

देवनदी गोदावर्याख्या गङ्गा तस्यां सम्यक् स्नातः ।

किंच शोभीति ।

शोभास्यास्तीति शोभी,

तदेव दर्शयति

सर्वाङ्गसुन्दरः,

अङ्गप्रत्यङ्गनिरतिशयसौन्दर्याश्रयः, लावण्यमाधुर्यादीनामप्युपलक्षणमेतत् ।

एवं रूपाश्रितगुणानुक्त्वा स्वरूपगुणानाह—

निःस्पृह इति ।

स्वभावतो निर्गता स्पृहा यस्मात्सः आत्मरतित्वेनाप्तकामत्वाच्च "आत्मरतिरात्मक्रीड" इत्यादिश्रुतेः,

किञ्च निर्मम इति ।

ममकारास्पदस्य भगवदात्मकत्वेन तदीयत्वनिश्चयात्, ।

अक्षरं तु भवेन्मृत्युर्त्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्यु र्न ममेति च शाश्वतम् ।

इति सूत्रकारोक्तेः ।

किञ्च शान्त इति ।

संयतचित्तमनाः नित्यमुक्तत्वेन क्षोभादिहेतुप्रकृतिसम्बन्धास्पृष्टमाहात्म्यात् ।

किञ्च पूर्वाचारसमन्वित इति ।

पूर्वेषां श्रीसनत्कुमारनारदादीनामाचारः श्रीपञ्चरात्रनिरूपितभागवतधर्मस्तेन समन्वितः, तदनुष्ठानतत्परः लोकसंग्रहार्थमिति शेषः, तदर्थमेवावतारत्वात् , ॥ ३५ ॥

किञ्चगम्भीरमतिः ।

गम्भीरमतिर्गोस्वामी स्वाश्रयाणां सुखावहः ॥
द्वन्द्वातीतस्वभावश्च कार्पण्यहरणोत्सुकः ॥ ३६ ॥

गम्भीरा इयत्तावच्छेदेनाकलयितुमशक्या कुतर्कैर्मतिर्यस्य सः अक्षतज्ञानत्वात् ।

किञ्चगोस्वामीति ।

गवामिन्द्रियाणां स्वामी स्ववशकर्तृत्वात् , यद्वा गवां श्रुतीनां स्वामी तदुक्तार्थप्रवर्त्तकत्वात् गोः पृथिव्या वा स्वामी तद्भारभूताधर्मिनाशकत्वेन तद्रक्षकत्वात् ।

किञ्च स्वाश्रयाणां सुखावहइति ।

स्वमेव भगवांच्छ्रीमदाचार्य आश्रय उपायोपेयसम्बन्धाविरूपो येषां ते स्वाश्रया अस्मदादयः तेषां सुखं परमनिःश्रेयोलक्षणमावहति प्रापयतीति तथा ।

किञ्च द्वन्द्वातीतस्वभावश्चेति ।

द्वन्द्वानि शीतोष्णसुखदुःखानि तान्यतिक्रम्य स्थितः स्वभावो यस्य सः ।

किञ्चकार्पण्यहरणोत्सुक इति ।

स्वाश्रितानां कार्पण्यम् अनात्मज्ञत्वं "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण" इति श्रुतेः, तस्य हरणे नाशने उत्सुकः सद्योद्युक्तः ॥ ३६ ॥

किञ्च वेदाध्ययनविख्यात इति—

वेदाध्ययनविख्यातः परमार्थपरायणः ।
श्रीकृष्णप्रियदासश्च श्रीकृष्णे कृतमानसः ॥ ३७ ॥

वेदाध्ययनं जगति विख्यातं येन सः ।

परमार्थपरायणः ।

"परमार्थस्त्वमेव" इतिस्मृतेः परमार्थः परमपुरुषरूपः सर्वज्ञो जगज्जन्मादिहेतुर्मुक्तोपसृप्यो मुमुक्षुध्येयो ब्रह्मरुद्रेन्द्रादिवन्दितपादपीठः शास्त्रयोनिर्मुकुन्दो भगवाञ्छ्रीकृष्णः स्वतन्त्रसत्ताश्रय एवोत्कृष्टमयनं निवासस्थानं यस्य सः सदैव तत्करस्थत्वात्, यद्वा अयनं आश्रयो निष्ठास्पदं यस्य सः यद्वा परायणं प्राप्यं यस्य सः ।

तत्र हेतुमाह ।

श्रीकृष्णप्रियदास इति ।

दासेषु प्रियदासः श्रीकृष्णस्य प्रियदासस्तथोक्तः, यद्वा प्रियश्चासौ दासश्चेति तथोक्तः प्रेष्ठप्रेष्ठतमत्वयोरप्युपलक्षणं सर्वसम्बन्धाश्रयत्वात्,

अत एव श्रीकृष्णेकृतमानस इति ।

श्रीकृष्णे कृतं स्थापितं मानसं मनो येन सः एतेन तदनुयायिभिरपि मनः श्रीकृष्ण एव योजनीयमिति सूचितम् ॥ ३७ ॥

किञ्च वैष्णवैः श्लाघनीय इति ।

वैष्णवैः श्लाघनीयश्च वैष्णवानां प्रियङ्करः ॥
वैष्णवप्रियसर्वार्थो वैष्णवैकपरायणः ॥ ३८ ॥

वैष्णवैर्विष्णुदेवताकैस्तदनन्याश्रितैः साधुभिः साम्प्रदायिकैः स्तवनार्चनादिविषयीकर्त्तुं योग्य इत्यर्थः, ।

तत्र हेतुमाह ।

वैष्णवानां प्रियंकर इति ।

स्वप्रियकर्त्ता ऽवश्यमेव पूज्य इत्यर्थः ।

किञ्च वैष्णवप्रियसर्वार्थ इति ।

वैष्णवानां प्रियाः प्रेमविषयाः सर्वेऽप्यर्था आचारविशेषा यस्य सः, यद्वा सर्वश्चासावर्थः पुरुषार्थश्च सर्वार्थः वैष्णवानां प्रियश्चासौ सर्वार्थश्चेति विग्रहः, ।

तत्र हेतुः,

वैष्णवैकपरायण इति ।

वैष्णव एव एकं मुख्यं परमुत्कृष्टमयनं निष्ठाविषयो यस्य सः वैष्णवशब्दो ऽत्र विष्णोराराधनाख्यो धर्मो विवक्षितः, तस्यैव वैष्णवानां मुख्योत्कृष्टनिष्ठाविषयत्वात्, यद्वा विष्णोर्भावो वैष्णवस्तद्भावापत्तिलक्षणो मोक्षो विवक्षितः, मुक्तगम्यत्वात्, यद्वा विष्णोरिदं वैष्णवं वैकुण्ठाख्यं मुक्तप्राप्यं परमं धाम तदेव मुख्यमुत्कृष्टं निवासस्थानं यस्येतिविग्रहः, यद्वा वैष्णवानामेकं प्रधानं परं केवलमाश्रयत्वादयनं शरणं यस्य स तथोक्तः ॥ ३८ ॥

किञ्च वैष्णवोद्वेगहारीचेति—

वैष्णवोद्वेगहारी च सदा वैष्णवदुःखहा ॥
शोभाढ्यो वैष्णवाकीर्णः शोभते उडुराडिव ॥३९॥

वैष्णवानामुद्वेगः संशयविपर्ययमूलभूतो बुद्धिदोषस्तं हरणशीलः यद्वा उद्वेगः कदा प्राप्स्यामः कदा चक्षुषा साक्षात् पश्याम इत्यादिस्वरूपकः, यद्वा संसारचक्रभ्रमणासाधारणहेतुरात्मविषयकलक्षणो ऽविवेक उद्वेगशब्दाभिधेयस्तं हरणशीलः, यद्वा

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।

इत्यादिश्रीमुखोक्तेः, परेभ्य उद्विजनं परोद्वेजनं वा उद्वेगः स्वभावविशेषस्तं हरणशीलः, चकारात् उद्वेगादिकारणानादिदैवीमायासम्बन्धनिवारकोऽपीति ज्ञेयम्, अत एव

सदावैष्णवदुःखहेति ।

वैष्णवानां दुःखं हन्तीति तथा सः, दुःखं मोक्षप्रतिबन्धकमनादिकर्मरूपं बोध्यम्, सर्वदुःखमूलत्वात्, ।

किञ्च शोभाढ्य इति ।

अपवर्गलक्षणरूपस्वाराज्यश्रियाभिषिक्तः श्रीभगवदनवच्छिन्नानुभूतिलक्षणशोभासम्पन्नो वा वैष्णवाकीर्णः शोभतइति, वैष्णवैः स्वाश्रितैः साम्प्रदायिकैरावृतः विराजते इति,

अत्र दृष्टान्तमाह ।

उडुराडिवेति ।

तारागणैरावृतो निशाकरो यथा शोभते तद्वत् ॥ ३९ ॥

अथात्मदैन्यकथनपूर्वकं तस्य महिम्नो ऽपरिच्छिन्नत्वेन दुर्ज्ञेयत्वं व्यञ्जयन्स्तौति ।

बाल इत्यादिना ।

बालो लाल्यस्त्वया स्वामिन् देशकालविमोहितः ॥
न जानामि न जानामि कीदृशो महिमा तव ॥४०॥

हे स्वामिन् अहं त्वया लाल्यः अनुकम्पनीयः कीदृशोऽहं बाल स्तत्रापि देशकालविमोहितइति ।

देशकालादिविषयकमोहाश्रयः देशकालादिविवेकशून्यत्वादेवानुकम्प्य इत्यर्थः,

यदि देशकालादीनामेव ज्ञानं नास्ति तर्हि त्वन्महिमविषयकज्ञानाभाव इति का वार्तेति कैमुत्यं सूचयन्नाह ।

न जानामीति ।

कीदृशो महिमा तवेति कीदृशः किम्प्रकारकः केनोपमानीकर्तुमर्हः कियान् वा परिमाणत इति को वा स्वरूपत इति न जानामि अज्ञानोत्कर्षद्योतनाय वीप्सा ॥ ४० ॥

अथात्माभिप्रेतं विज्ञापयन् ग्रन्थमुपसंहरति—

लघुस्तवेनेति ।

लघुस्तवेन भो नाथ भो आचार्यशिरोमणे ॥
दासोऽयमिति मां ज्ञात्वा भक्तिं देहि पदाम्बुजे॥४१॥
इति श्रीवैष्णवाचार्यश्रीनिवासाचार्यविरचितं ॥
लघुस्तवराजस्तोत्रं सम्पूर्णम् *

लघुनि मिताक्षरपदानि यत्र स लघुः सचासौ स्तवस्तेन स्तुतिव्याजमात्रेणेति भावः, यद्यपि बालबुद्धित्वात् मम महिमवर्णनज्ञानानधिकरणं तथाप्ययं मम दासः दासत्वेन जगति विख्यातस्तस्मान्मया ऽऽत्मसात्करणीय इति मां ज्ञात्वा स्वपदाम्बुजे भक्तिं देहीति वाक्यार्थः ।

तत्रानुग्रहविशेषे त्वरां प्रार्थयन्संबोधयति ॥

ओमायच्छति ।

'भाग्यभाग्योपकारैश्वर्यादिषु' इत्यनेकार्थाद्भाग्यभाग्याद्यर्थमूलः परिपूर्णैश्वर्यौ वा भाग्यपदार्थौ विवक्षितौ, तत्र प्रथमभाग्यवेदानन्दज्ञानभक्त्यादेः प्रार्थना द्वितीयेन तद्दानयोग्यरूपसामर्थ्याविष्कार इति विवेकः,

ननु स्यादेतत् भक्त्यादीनां दातृत्वं तद्दानादिप्रकल्याणवत्त्वबोधश्च यदि कश्चिदन्यो मत्समोऽभ्यधिको वा आचार्यान्तरो न स्यात्तत्त्वेतदस्तीत्याशङ्क्य सम्बोधनान्तरमाह—

भो आचार्यशिरोमणे इति ।

आचार्येषु मुख्यस्त्वमेव सम्प्रदायप्रवृत्त्यर्थावतीर्णत्वात् अन्येषां तु तव मतैकदेशानुयायित्वादिति आचार्यशिरोमणित्वप्रयोगाभिप्रायः, ॥ ४१ ॥

श्रीश्रीनिवासगिरिजा श्राव्याचार्याधिगामिनी ।
श्रेयस्तनोतु साधूनां गुरुभक्तिसरिद्वरा ॥ १ ॥
श्रीगुर्वनुग्रहो ध्येयः संसाराब्धेश्च कुम्भजः ।
महाघतमसो भानुर्मुक्तिदाने हरिर्यथा ॥ २ ॥
वन्दे श्रीनियमानन्दं नियमेन निजाश्रितान् ।
आनन्दयन्तमाचार्यं चक्ररूपिणमीश्वरम् ॥ ३ ॥
वैकुण्ठाब्धिसमुद्भूतः श्रीनिवासार्यचन्द्रमाः ।
सताम्बुधौ जयत्यद्धा कर्मतापतमोपहः ॥ ४ ॥

इति ॐ तत् सदिति श्रीहयग्रीवानुग्रहजीवनेनस्वभूदेवपदाभ्याश्रितेनपुरुषोत्तमप्रसादाख्येन वैष्णवेन विरचिता गुरुभक्तिमन्दाकिनी समाप्ता ।

(१५) शिक्षावल्ली । ब्रह्मवल्ली च । श्रीशङ्कराचार्यविरचितवृत्तिसमेता (वेदः) १

(१६) मीमांसाबालप्रकाश जैमिनीयद्वादशाध्यायार्थसंग्रहः श्रीमद्नारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) १

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्त) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्यया स्वकृतटीकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् ३

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च ३

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १४

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । ३

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविट्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकरणं श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्रीश्रीपुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) [illegible]स्मृतिः । बालम्भट्टीटीकया[illegible] व्याख्या[illegible]मिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय–श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाटीकाद्वयसंवलिता । १२

(४७) व्याकरणसिद्धान्तसुधानिधिः । पर्वतीय विश्वेश्वरसूरिविरचितः । ६

(४८) वीरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतया लघुसंग्रहाख्यया टीकया समलंकृतः । ६

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) मीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यकृता । अवशिष्टाधिकरणनिरूपणपूर्वकं [illegible] परिष्कृत । १

(५२) [illegible]पादभाष्यटीकासंग्रहः । तत्र क[illegible]म् । श्रीशंकरमिश्रविरचितम् १

(५३) [illegible]दीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत २

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । २

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता । श्रीनिवासाचार्य विरचित न्यायसारसमाख्यया टीकया युता । २

प्राप्तिस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी